upto the end one metre which should change in the end. The महाकाव्य should have more than eight cantos ( रघुवंश has nineteen cantos ) which are neither too short nor too long ( रघु० has 53 verses in the 18th, 57 in the 19th, 93 in the 11th, 95 in the 1st and 8th, 103 in the 15th, 104 in the 12th ) and there may be a canto which contains a number of metres. The end of a canto should indicate the subject - matter of the next canto. [ स्वयंवर is hinted at in the last verse of the 5th. ] The following should be described in details as occasions arise : the twi-lights, the risings of the sun and the moon, day and night, darkness and broad day-light, morning, noon and evening, hunt, mountains, seasons, forests, seas, love in union and separation, sages, the heaven, cities, sacrifices, expeditions, battles, marriages, councils, birth of the son or sons and what not. The name of a महाकाव्य may be the name of the poet e. g. माघ-भारवि, the name of the plot e. g. कुमारसंभवम्, the name of the hero e. g. रघुवंश, नैषधं or any other thing connected with it e. g. भट्टिकाव्य. The name of the canto should be after what is 'chiefly described in it. e. g. अजस्वयंवराभिगमनम् नाम. Some other things not mentioned here may as well occur in a महाकाव्य. For example, with रस भावs– emotions affecting the human heart-may be described ; the metres used should be charming and delightful to the ear ; different figures of speech may be employed ; special signs showing the individuality of the poet may be

utilised ; e. g. भारवि and माघ begin their first canto with श्री; भारवि uses लक्ष्मी: and माघ uses श्री: in the last verse of every canto.

---

## WHAT IS THE OBJECT OF WRITING A काव्य ?

A poet writes poetry because he cannot help it. When the muse सरस्वती visits him, he goes on expressing in words what he feels. It is the inspiration which writes and not the poet. Poets are born and not made. But still by constant application, observation and studies, one can gain the favour of the muse and when he is thus favoured, he writes in order to get fame and money, to teach and preach, to remove an evil and get instantaneous joy, unmixed with pain. So says मम्मटाचार्य in काव्यप्रकाश:

काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे ॥

---

## THE POET कालिदास

Nothing definite is known about Kalidasa. " The life of Kalidasa, like that of Shakespeare, remains almost a blank and his very name a subject of contention." He was perhaps a Brahmana, may be a गौडसारस्वत, a Bengali or a Kashmirian. He travelled throughout the entire peninsula of India, was, perhaps, acquainted with the court-life and might have been a court poet with some king. He was well versed in almost all the branches of learning, such as grammer, poetics, dramaturgy, mythology, astronomy etc. He must

have been a great observer of nature. He writes a simple वैदर्भी style and his similes are very apt. He may have lived in the 5th century A. D. He wrote ऋतुसंहारं, मेघदूतं; रघुवंश, कुमारसंभवं; मालविकाग्निमित्रं, विक्रमोर्वशीयं and अभिज्ञानशाकुन्तलम्. The first two are खण्डकाव्यs, the next two महाकाव्यs, and the last three नाटकs. Some of his views regarding society, religion, education, philosophy etc. can be seen from the quotations given below from his works. The students are advised to. make a note *themselves* by reading them.

1. पुराणमित्येव न साधु सर्वं न चापि काव्यं नवमित्यवद्यम्
   सन्तः परीक्ष्यान्यतरद्भजन्ते मूढः परप्रत्ययनेयबुद्धिः ॥ मालविका०
2. प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ।
   स पिता पितरस्तासां केवलं जन्महेतवः ॥ रघु०
3. अपरिनिष्ठितस्य उपदेशस्य अन्याय्यं परीक्षणम् । कुमार०
4. श्रीश्च सरस्वतीच द्वय निसर्गभिन्नास्पदम् । रघु०
5. वेदान्तेषु यमाहुरेकपुरुषम् । विक्रमो०
6. त्वामामनन्ति प्रकृतिं पुरुषार्थं प्रवर्तिनीम् ।
   तद्दर्शिनमुदासीनं त्वामेव पुरुषं विदुः ॥ कुमार०

---

## SOME TRADITIONS ABOUT THE POET.

धन्वन्तरि क्षपणकामरसिंहशंकु
वेतालभट्टघटखर्परकालिदासाः ।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य ॥ १ ॥

1. The king विक्रमादित्य of Ujjain ( उज्जयिनी ), ruling about 56 B C., had the above nine jewels in his court and कालिदास was one of them.

2. He was one of the poets at the court of Bhoja of Dhara ( 11th C. A. D. )

3. He was a dullard and was married, through the mischievous agency of the minister of the king of वाराणसी, to the princess, वासन्ती by name, who did not accept the hand of the minister's son as she wanted to marry a great poet. On the very first night, however, she found out that she was cheated as Kalidasa could not answer her questions. She got angry and scolded him on account of which कालिदास left her and propitiated Kali. He returned afterwards and was asked by his wife whether he learned anything: अस्ति कश्चित् वाग्विशेष: And Kalidasa, in reply, composed three lengthy poems named कुमारसंभव, मेघदूत and रघुवंश, beginning with the same three words contained in her question.

4. Kalidasa was a contemporary of दण्डिन् and भवभूति. दण्डी and कालिदास once went to सरस्वती and asked her to declare which of the two was a real poet. सरस्वती said: कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशय: At this कालिदास got angry and exclaimed: कोऽहं रंडे on which she said: त्वमेवाहं न संशय:. भवभूति read out his उत्तररामचरित to Kalidasa, when he was playing at chess. Kalidasa, hearing the whole play said that भवभूति had spoilt the erotic sentiment by one अनुस्वार in the verse अविदितगतयामा रात्रिरेवं व्यरंसीत्.

These and many others are, however, traditions and as such they do not contain even a whit of authenticity in them.

## DATE OF KALIDASA.

Our poet is tossed from the 3rd C. B. C. to the 11th C. A. D. What we know definitely about him is, however, this. He refers to भास in मालविका० ( भाससौमिल्लकविपुत्रादीनां ) मनु, ( स एव धर्मो मनुना प्रणीतः । रघु० ) and Hunas ( तत्र हूणावरोधानां । रघु० ) and is referred to by बाणभट्ट in हर्षचरित ( निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु 7th C. A. D. ) and in the Aihole Inscription of 634 A. D. ( कविताश्रित कालिदासभारविकीर्तिः ) The dates of भास and मनुस्मृति range between the 2nd C. B. C. and 2nd C. A. D., the latter being accepted on all hands. So Kalidasa must have flourished between the 2nd C. A. D. and the 7th C. A. D. Hunas invaded India about 450 A. D. So he comes between that date and the 7th C. A. D. It is sufficient for our purpose to remember that he flourished somewhere between the 5th and the 7th centuries.

---

## SOME QUOTATIONS IN APPRECIATION OF THE POET.

1. भासो हासः कविकुलगुरुः कालिदासो विलासः । ( यस्याः )
   केषा नैषा कथय कविताकामिनी कौतुकाय ॥ — जयदेव.
2. पुरा कवीनां गणनाप्रसंगे कनिष्ठिकाधिष्ठितकालिदासा ।
   अद्यापि तत्तुल्यकवेरभावादनामिका सार्थवती बभूव ॥
3. उपमा कालिदासस्य ।
4. काव्येषु नाटकं रम्यं तत्रापि च शकुन्तला ।
5. मेण्ठो भारविकालिदासतरलाः स्कन्धः सुबन्धुश्चयः । — राजशेखर-
6. शिक्षासमयेपि मुदे रतलीलाकालिदासोक्ती । — गोवर्धन.

---

## WORKS ASCRIBED TO कालिदास

Apart from seven works, given above, a lot of works are taken to have been written by him. Some of them are these:

सेतुबंध, श्रुतबोध, नलोदय, राक्षसकाव्य, पुष्पबनविलास, शृंगारतिलक and ज्योतिर्विदाभरण.

---

## SOURCES OF रघुवंश.

Kalidasa modestly pays a high tribute to all the poets who have dealt with the Family of Raghu and these may be वाल्मीकि of रामायण, व्यास of रामोपाख्यान in महाभारत, the authors of पद्मपुराण, विष्णुपुराण and other पुराणs, भास, and perhaps the author of दशरथ जातक. The fifth canto is however his own invention.

## SUMMARY OF THE FIRST FIVE CANTOS.

दिलीप, a descendant of इक्ष्वाकु, had no son. So he went to the hermitage of वसिष्ठ and asked him why he was not fortunate enough to see the face of a son. वसिष्ठ told him that he did not salute the celestial cow when he was returning from the heaven after helping Indra and so he was cursed by her that he would not get a son so long as he did not serve her daughter नन्दिनी, living in the hermitage of वसिष्ठ. So दिलीप, with his wife सुदक्षिणा, served with all his souls the नन्दिनी, and through her boon got a son whom he named रघु. This रघु was a very great emperor. He helped his father in performing sacrifices and himself performed the well known विश्वजित् sacrifice after conquering the whole world. In

this he gave away to Brahmans all his possessions. After this, a student, named कौत्स, came to him and begged fourteen crores of gold coins of him to be given by him to his preceptor by way of the tution fees. Raghu, not having a single pie with him, decided to attack कुबेर, the god of wealth, whose country he had not invaded at the time of the world conquest. कुबेर, however, poured a shower of gold coins early in the morning before Raghu had marched. This was given by Raghu to कौत्स who, being pleased, favoured him with the boon of getting a son. Accordingly Raghu got a son whom he named अज. When अज came of age, he was sent with an army to विदर्भ for the स्वयंवर of इन्दुमती, the sister of भोज. While on his journey, he encamped on the bank of the Narmada where the incident of the elephant occurred. This mad elephant came out of the waters of the Narmada and rushed towards the army when अज killed him with his arrow. The elephant at once became a गन्धर्व and before going to the heaven presented अज with the सम्मोहन missile. भोज received अज duly and allotted a new tent to him to pass the night. Early in the morning अज was roused from his sleep by the enlogistic songs of the bards. He got himself suitably dressed and went to attend the स्वयंवर ceremony.

## COMMENTARIES ON रघुवंश.

A good many commentaries have been written on रघुवंश and the important amongst them are those writ-

ten by मल्लिनाथ, वल्लभ, चारित्रवर्धन, दिनकर, सुमतिविजय and हेमाद्रि. But the most popular is the संजीविनी of मल्लिनाथ of the 14th century and this is given by us in this work.

---

# संजीविनी प्रस्तावना.

मातापितृभ्यां जगतो नमो वामार्धजानये
सद्योदक्षिणदृक्पातसकुचद्वामदृष्टये ॥ १ ॥
अन्तरायतिमिरोपशान्तये शान्तपावनमचिन्त्यवैभवम् ।
त नरं वपुषि कुजरं मुखे मन्महे किमपि तुन्दिल महः ॥ २ ॥
शरण करवाणि शर्मदं ते चरणं वाणि चराचरोपजीव्यम् ।
करुणामसृणैः कटाक्षपातैः कुरुमामंब कृतार्थसार्थवाहम् ॥ ३ ॥
वाणीं काणभुजीमजीगणदवाशासीच्च वैयासिकी
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत् ।
वाचामाकलयद्रहस्यमखिल यश्चाक्षिपादस्फुरां
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥ ४ ॥
मल्लिनाथकविः सोऽय मदात्मानुजिघृक्षया ।
व्याचष्टे कालिदासीयं काव्यत्रयमनाकुलम् ॥ ५ ॥
कालिदासगिरा सार कालिदासः सरस्वती ।
चतुर्मुखोऽथवा साक्षाद्विदुर्नान्ये तु मादृशाः ॥ ६ ॥
तथापि दक्षिणावर्तनाथाद्यैः क्षुण्णवर्त्मसु ।
वय च कालिदासोक्तिष्ववकाशं लभेमहि ॥ ७ ॥
भारती कालिदासस्य दुर्व्याख्याविषमूर्छिता ।
एषा सजीविनी टीका तामद्योज्जीवयिष्यति ॥ ८ ॥
इहान्वयमुखेनैव सर्व व्याख्यायते मया ।
नामूल लिख्यते किंचिन्नानपेक्षितमुच्यते ॥ ९ ॥

( 1 ) A salutation if offered by मल्लीनाथ to the God Shiva and goddess Farwati, the parents of the universe.

अथ कालिदासो महाकाव्ये

# रघुवंशेऽज स्वयंवराभिगमनो नाम

# पंचमः सर्गः ।

तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोशजातम् ।
उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः ॥ १ ॥

Prose Order:—विश्वजिति अध्वरे निःशेषविश्राणितकोशजातं त क्षितीश उपात्तविद्यः वरतन्तुशिष्यः कौत्सः गुरुदक्षिणार्थी प्रपेदे ॥ १ ॥

मल्लिनाथकृतसञ्जीविनी टीका ।

तमिति । विश्वजिति विश्वजिन्नाम्नि अध्वरे यज्ञे । " यज्ञः सवोऽध्वरो यागः " इत्यमरः । निःशेष विश्राणितं दत्तं । श्रण दाने चुरादिः । कोशाना अर्थराशीना जातं समूहः येन तं तथोक्त । " कोशोऽस्त्री कुड्मले दिव्ये शास्त्रेऽर्थौघे गृहे ततौ " इति यादवः । " कोशोऽस्त्री कुड्मले खड्गपिधानेऽर्थौघदिव्ययोः " इत्यमरः । " जातं जनिसमूहयोः " इतिशाश्वतः । एतेन कौत्सस्य अनवसरप्राप्तिं सूचयति । तं क्षितीश रघुं उपात्तविद्यः लब्धविद्यः वरतन्तोः शिष्यः कौत्सः । "ऋष्यन्धक-" इति अण् । इञः अपवादः । गुरुदक्षिणार्थी " पुष्करादिभ्यो देशे " इति अत्र " अर्थाच्चासनिहिते " " तदन्ताच्च " इति इनिः । अप्रत्याख्येयः इति भावः । प्रपेदे प्राप ॥ अस्मिन्सर्गे वृत्त उपजातिः । तल्लक्षण तु—" स्यादिन्द्रवज्रा यदितौ जगौगः । उपेन्द्रवज्रा जतजास्ततो गौ । अनन्तरोदीरितलक्ष्मभाजौ । पादौ यदीयावुपजातयस्ताः " इति ॥ १ ॥

Compounds:—विश्वजिति विश्व जयति इति विश्वजित् उपपदसमासः । तस्मिन् adj. to अध्वरे । क्षितीशं क्षितेः ईशः क्षितीशः षष्ठी तत्पुरुषः । त object to प्रपेदे । निःशेष० जातं निःशेष नास्ति शेषः यस्मिन् यथा तथा बहु०

क्रियाविशे० निःशेषं यथा स्यात्तथा विश्राणितं सहसुपेति समासः । कोशानां जातं ष० त० स० । निः० णितं कोशजातं येन सः निः— तः बहुव्रीहिः तं adj. to क्षितीशं । उपात्ताः विद्याः येन सः उपात्तविद्यः बहु० adj. to कौत्सः । गुरवे दक्षिणा or गुरोः दक्षिणा गुरुदक्षिणा । " चतुर्थी " इति योगविभागात् च० त० स० or ष० त० स० अश्वघासा दिवत् ॥ तस्याः अर्थः ष० त० । सः अस्ति अस्य इति इनिः मत्वर्थीयः प्रत्ययः ॥ वरतन्तोः शिष्यः वर०ष्यः । ष० त० ॥ १ ॥

Explanation:—ऐक्ष्वाको राजा अयोध्याधीशो रघु र्दिग्विजयं कृत्वा साकेत प्राप्य विश्वजिन्नामयज्ञमकरोत् । तस्मिन्स सर्वस्वमेव दक्षिणारूपेण ब्राह्मणेभ्यो दत्तवान् । अत एव तस्य भांडागार रिक्त संजातम् । अथ वरतन्तोर्नाम कुलपतेरन्तेवासी कौत्सो निजाध्ययन समाप्याचार्यायोपायनमिति मया किंचिद्धनं दातव्यमिति मनसि कृत्वा तदर्थं भूपालं रघुं प्राप ॥ १ ॥

## NOTES.

" विश्वजित् सर्वस्वदक्षिणः " इति श्रुतिः । वि० is a sacrifice in which everything is given away to Brahmans. As the name indicates, it can be performed by one who has conquered the whole world. जि + क्विप् । This termination, added to roots, goes away leaving nothing ; but प् in it brings the augment तुक् = त् so that the form becomes जित् । the rule is " ह्रस्वस्य पिति कृति तुक् " i. e. If a कृत् termination having प् in it, comes after a root ending in a short vowel ( as जि, कृ etc. ), तुक् is inserted between the root and the termination. e. g सुकृत्, भूभृत् etc.

अध्वानं सत्पथं राति अध्वन् रा + क = अध्वरः = यज्ञः = यागः = सवः

क्षि + क्तिन् स्त्रियाम् क्षितिः fem. e. g. गतिः, ततिः, कृतिः = पृथ्वी, मही.

शिष् + घञ् = शेषः

वि + श्रण् दाने ( श्राणयति 10th conj. ) + क्त p. p. p. निष्ठायाम्.

कोषः or कोशः = भांडं, निधिः treasure.

जन् + क्त = जातम् " नपुंसके भावेक्तः " जात शब्देन वस्त्राद्यपि दत्त भवति ।
उप + आ + दा + क्त = आत्त or आदत्त p. p. p = आधिगत, गृहीत.
विद्याः lores. चतुर्दश. पुराण न्यायमीमासा धर्मशास्त्रागममिश्रिताः ।

चत्वारो वेदाः । शिक्षाकल्पोव्याकरण निरुक्तं
छन्दो ज्योतिषम् । इति षडगानि । एवचतुर्दश ।

दक्षिणा remuneration, fee = दान, शुल्कं, वेतनं ( 14 crores of golden coins as will be seen in the verse No. 21, कोटी श्चतस्रो दश चाहरेति )

कुत्सस्य गोत्रापत्यं पुमान्, कुत्स + अण् [ ण् occasions the वृद्धि of the first vowel and the final vowel is dropped. कौत्स् + अ = कौत्सः ) one कौत्स is mentioned in यास्क'sनिरुक्त of about the 7th century B. C. शास् + क्यप्ः, शिष्यः, छात्रः, शिक्षणीयः, उपदेश्यः.

## HOMONYMS.

जातं means birth and collection.

गुरुः means बृहस्पतिः and elderly persons.

कोशः = कुड्मलं land, खड्गपिधानं scalbard, अर्थौघ treasure, treasury, heavenly, dictionary and collection ( of poems. ) It is not feminine i. e. mas. and neuter. कोशः-षः and कोष-श.

### Sutras in the Tika

" ऋष्यन्धकवृष्णिकुरुभ्यश्च " अण् is appended to the words meaning ऋषि, e. g. वासिष्ठ, वृष्णिs = वासुदेव कुरु s = नाकुलः This is an exception अपवादः to the sutra " अतः इञ् " words ending in अ take इ, e. g. दक्ष + इञ् = दाक्षिः, दाशरथिः.

" पुष्करादिभ्यः देशे " is पाणिनेः सूत्र while " अर्थाच्चासंनिहिते " and " तदन्ताच्च " are कात्यायनस्य वार्तिकानि additional sutras formed by कात्यायन and mentioned in कौमुदी in explaining

पाणिनि's sutras. The possessive मत्वर्थीय termination इनि: is used after पुष्कर and other words in the sense of — when the word so formed means देश - a place पुष्करिणी, पद्मिनी. " देशे किम् " पुष्करवान् करी. In the explanation of this sutra इत्यत्र the other two sutras अर्थात् etc and तदन्ताच्च are given. They mean इनि: comes after अर्थ whether alone or at the end of a compound when the thing denoted by the word is not possessed असन्निहिते. e. g. अर्थी a beggar, हिरण्यार्थी, गुरुदक्षिणार्थी. But अर्थवान् when it does not mean " in need of. "

Suggestions by मल्लिनाथ.

एतेन etc. नि:शेष—shows that कौत्स came at a time to रघु when he could not fulfil his desire as he had given away his all. अप्रत्याख्येय: = कौत्स could not be refused as he had come to beg for his गुरु.

The metre is उपजाति: which is a combination of इन्द्रवज्रा and उपेन्द्रवज्रा in any order containing eleven syllables in each पाद; त त, ज and last two syllables गुरु + ज, त, ज and last two syllables गुरु.

This canto-सर्ग-begins with the verse beginning with the letter त which shows the accomplishment of the desired object. तकारे अर्थसिद्धिश्च प्राप्यते विपुलं धनम् । सर्वश्रेयो भवेत्तस्य सुस्थितं चोपजायते says बृहस्पति; and विपुलधन is obtained as will be seen later on.

अध्वरे—अधिकरणेसप्तमी । क्षितीश – कर्मणि द्वितीया ।

प्रपेदे—प्रपूर्वात् पद् गतौ इति दिवादिधातो: कर्तरि लिट: प्रथम पुरुषस्य एकवचनम् Third person, singular perfect, active Atmanepada, 4th conjugation. Decline अध्वन्, विश्वजित् विश्व, अर्थिन् and क्षिति.

Translation:— Kautsa, the disciple of Varatantu, who had completed his studies and who was ( consequently ) desirous of giving remuneration to his preceptor, came to him ( Raghu ), the lord of the earth, who had ( already ) given away ( in charity ) the whole lot of his treasure during the Visvajit sacrifice.

---

**स मृण्मये वीतहिरण्मयत्वात्पात्रे निधायार्घ्यमनर्घशीलः ।**
**श्रुतप्रकाशं यशसा प्रकाशः प्रत्युज्जगामातिथिमातिथेयः ॥ २ ॥**

Prose order:—अनर्घशील: यशसा प्रकाश: आतिथेय: स: वीत हिरण्मयत्वात् मृण्मये पात्रे अर्घ्यं निधाय श्रुतप्रकाश अतिथिं प्रत्युज्जगाम ॥ २ ॥

## संजीविनी टीका.

स इति । अनर्घशील: अमूल्यस्वभाव: । असाधारणस्वभाव: इत्यर्थ: । " मूल्ये पूजाविधौ अर्घ: " इति " शील स्वभावे सद्वृत्ते " इति च अमरशाश्वतौ । यशसा कीर्त्या । प्रकाशते इति प्रकाश: । पचादि अच् । अतिथिषु साधु: आतिथेय: । " पथ्यतिथिवसतिस्वपतेः ढञ् " इति ढञ् । स: रघु: । हिरण्यस्य विकार: हिरण्मयम् । " दाण्डिनायन—" इति आदिसूत्रेण निपात: । वीतहिरण्मयत्वात् अपगतसुवर्णपात्रत्वात् । यज्ञस्य सर्वस्वदक्षिणाकत्वात् । इति भाव: । मृण्मये मृद्विकारे पात्रे । अर्घार्थं इदं अर्घ्यम् । " पादार्घाभ्यां च " इति यत् । पूजार्थं द्रव्यं । निधाय श्रुतेन श्रूयते इति श्रुत शास्त्रम् । तेन प्रकाश प्रसिद्धम् । " श्रुत शास्त्रावधृतयो: " इति अमर: । अतिथिं अभ्यागतं कौत्सम् । अतिथि: ना गृहागते " इति अमर: । प्रत्युज्जगाम अभिमुखं ययौ ॥ २ ॥

Compounds:—वीतं हिरण्मयं ( पात्र ) यस्मात् or यस्य वीतहिरण्मय: बहु० । तस्य भाव. वी—यत्व, तस्मात् । नास्ति अर्घ: यस्य तत् बहु० । अनर्घं शीलं यस्य स: बहु. । श्रुतेन प्रकाश: त तृतीया तत्पुरुष: ।

Explanation:—विश्वजिति यज्ञे रघुणा सर्वस्व दत्तामासीत् । तस्मिन्दाने तेन चीनांशुकसुवर्णभाजनादिकभोग्यवस्तून्यपि ब्राह्मणेभ्यो वितीर्णानि । अत एव यदा कौत्स आगत इति तेन श्रुत तदाऽद्वितीयस्वभाव उज्ज्वलकीर्तिः स नृप:

पूजाद्रव्य पाद्यमुदकञ्च मृत्तिकामये भाण्डे निक्षिप्य तद्राजन गृहीत्वाऽऽसनादुत्थाय कतिचित् पदानि गत्वा वेदवेदांगाभिज्ञ तमभ्यागत स्वागतं व्याजहार । यतोऽतिथेः सत्कारः कर्तव्योगृहमेधिनेति धर्मशास्त्रं तेन ज्ञातमासीत् ॥ २ ॥

## NOTES.

अनर्घः । न is changed to अन् before a word beginning with a vowel. अनंतः, अनश्वः, but असत्यम् । पचादित्वात् अच् । अच् ( अ ) is appended to roots पच् and others. So प्रकाश् + अच् = प्रकाशः, पच् + अच् = पचः । अच् is a कृत् termination. अतिथि+ ढञ् (एय)= आतिथेयः । ञ् occasions वृद्धि of अ and final इ is dropped; एय, the substitute of ढञ् ( ढ ) being added to थ्. This is a तद्धितप्रत्यय. It is used in the sense of साधुः 'good for' after पथिन्, अतिथि, वसति and स्वपति and the forms are पाथेय, आतिथेयं, वासतेय and स्वापतेयम्.

हिरण्य + मयट्विकारार्थे । हर्य् 1st conj. to love + कन्यन् । हर्यतेः कन्यन् हिरच् । हिरच् + कन्यन् = हिरण्य. Sutra 6-4-174 of Ashtadhyayi दाण्डिनायनहास्तिनायन etc. gives a list of irregular words in which हिरण्मय is also mentioned. This is called निपातः । तस्य भावः हिरण्मयत्वम् । abstract noun can be formed by त्व, तल्, अण्, ष्यञ् etc. "तस्यभावस्त्वतलौ." मृद् fem. earth + मयट् विकारार्थे made of. मृण्मयम् पाद्य, अर्घ्य = पादार्थमुदकं पाद्यं, अर्घार्थं उदक or इदं = अर्घ्यम् the *termination* is यत् । आपः क्षीर कुशाग्रञ्च दधि सर्पिः सतण्डुलम् । यवः सिद्धार्थकश्चैव अष्टागोऽर्घः प्रकीर्तितः। Water, milk, a blade of grass, curds, ghee, rice, barley grains, white mustard, sandalpaste and flowers are the ingredients of अर्घ्य. श्रुतं p. p. p. of श्रु श्रवणे used as a noun like जातम्. It means शास्त्रं 'lore' and अवधृतं 'what is heard.'

आतिथिः अतति गच्छति इति । अत् 1st conj. सातत्यगमने + इथिन् ( Unadi ). मनु defines it thus: एकरात्र तु निवसन्नतिथिर्ब्राह्मणः

स्मृतः । अनित्य हि स्थितो यस्मात्तस्मादतिथिरुच्यते ॥ [ नास्ति तिथिः यस्य who can come any day ]. वित–त्वात् हेतौ पंचमी । पात्रे अधिकरणे सप्तमी । प्रति + उत् + जगाम Perfect-active–third person-singular–Parsmaipade of गम् ( गम्लृ गतौ ) भ्वादि 1st conj. to go.

अनुप्रासः अलंकारः The figure of speech is alliteration, the same letter or group of letters being repeated in the verse.

Translation:–On account of having no gold–vessels, he, the hospitable one of inestimable character and radiant with renown, put into an earthen pot the materials of worship and went forth to receive the *guest shining* with Vedic knowledge. 2

**तमर्चयित्वा विधिवद्विधिज्ञस्तपोधनं मानधनाग्रयायी ।**
**विशांपतिर्विष्टरभाजमारात्कृताञ्जलिः कृत्यविदित्युवाच ॥ ३ ॥**

Prose order:—विधिज्ञः मानधनाग्रयायी कृत्यवित् विशांपतिः विष्टरभाज तं तपोधनं विधिवत् अर्चयित्वा आरात् कृताञ्जलिः ( सन् ) इति उवाच ॥ ३ ॥

## संजीविनी टीका.

तं इति । विधिज्ञः शास्त्रज्ञः । अकरणे प्रत्यवायभीरुः इत्यर्थः । मानधनाना अग्रयायी अग्रेसर । अयशोभीरुः इत्यर्थः । कृत्यवित् कार्यज्ञः । आगमनप्रयोजनं अवश्यं प्रष्टव्य इति कृत्यवित् । विशांपतिः मनुजेश्वरः । " द्वौ विशौ वैश्यमनुजौ " इत्यमरः । विष्टरभाज आसनगतं । उपविष्टं इत्यर्थः । " विष्टरो विटपी दर्भमुष्टिः पीठाद्यमासनम् " इत्यमरः । " वृक्षासनयोर्विष्टरः " इति निपातः । तं तपोधनं विधिवत् विध्यर्हं । यथाशास्त्रमित्यर्थः । " तदर्हम् " इति वतिप्रत्ययः । अर्चयित्वा आरात् समीपे । " आरात् दूर समीपयोः " इत्यमरः । कृताञ्जलिः सन् इति वक्ष्यमाण प्रकारेण उवाच ॥ ३ ॥

**समासाः**—विधिना ज्ञः विधिज्ञः । ष० त० स० । मानः धन येषां ते मानधनाः । बहु० । अग्रे याति इति अग्रयायी । उपपद त० स० । मानधनाना

अग्रयायी मान० यी । ष० त० । कृत्य वेत्ति इति कृत्यवित् । उप० त० । विष्टर भजति इति विष्टरभाक् तम् । उप० । कृतः अञ्जलिः येन स कृताञ्जलिः । बहु० ।

Expl.— राजा रघुर्धर्मशास्त्रोक्तपूजाप्रकारं सम्यक्तयाऽजानात् । ऋषेः सत्कारेऽकृते दोषःस्यादिति वचनं तेनाधिगतम् । तथाच तेनेक्ष्वाकुकुलमपयशः-कलङ्कितं भवेदित्यपि तेनज्ञातम् । अत एव स नरेन्द्रः सभ्यतयाऽऽदरेण तं मुनिमासन उपावेशयत् । अथ यथाशास्त्रं तस्य मधुपर्कादिना पूजां कृत्वा तेनानुज्ञातस्तस्य समीप उपविश्य हस्तसंपुटं बध्द्वा वक्ष्यमाणप्रकारेण बभाषे ॥ ३ ॥

## NOTES.

जानाति इति ज्ञः । " इगुपधज्ञाप्रीकिरःकः " ज्ञा + क = ज्ञः This word is chiefly used in a compound. The समास need not be taken to be an उपपद as the word can be used of itself without any उपपद i. e. without being preceded by any word. See Mallinath on the first verse of the 13th canto of रघुवंश. वि + धा + कि = विधिः अकरणे...प्रत्यवायः means a sin in not doing a rite; he was afraid of committing a sin in not receiving him. अग्र + या + णिनिः यायिन् ( feminine is यायिनी ). कृ + तुक् + क्यप् = कृत्य + विद् + क्विप् । विशां पतिः is not a compound though it is taken to be अलुक् by some. विश् means वैश्यः or मनुष्यः.

विष्टरः is used in the sense of a tree or a seat even a handful of grass for sitting on. It is a निपात, स् of विस्तर is changed to ष् ( षत्व निपात्यते ). Not in the sense of a tree or a seat, the form would be विस्तरः । वि + स्तॄ + अप् = विस्तरः । भज् + ण्वि = भाज् । विधिवत् according to Shastra, scriptures. " तत् अर्हम् " विधिं अर्हति । The termination वति is appended to a noun in the above sense only if the word has reference to a verb, क्रियाचेत्. You

cannot use it in राजान अर्हति छत्रं and say राजवत् छत्रम् । In the text विधिवत् refers to अर्चयित्वा, a verbal form.

अर्चयित्वा absolutive. अर्च + क्त्वा । " समानकर्तृकयोः पूर्वकाले " । पूजयित्वा, अर्चनं कृत्वा.

आरात् indeclinable means both near and distant. उवाच Perfect, " परोक्षे लिट् " । of वच्. । अनुप्रासालङ्कारः । 2 The epithets in the stanza being significant, ( साभिप्राय विशेषणत्वात् ) The figure is परिकरः । The metre is उपेन्द्रवज्रा.

Decline तपस्, अग्रयायिन्, विश्, पतिः and विष्टरभाज्. Conjugate वच्, ज्ञा, स्तृ and कृ in perfect.

Translation:— Conversant with rituals, foremost among those to whom self-respect is wealth and well-versed in the rules of decorum, the lord of men honoured, according to preseribled forms, that sage-whose wealth was his asceticism-after he had occupied a seat and then folding his hands before him, spoke thus to him. 3.

Next seven verses give the speech of Raghu.

**अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते ।**
**यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः ॥ ४ ॥**

Prose order:—कुशाग्रबुद्धे[1] ( सः मन्त्रकृतां[3] ऋषीणा अग्रणीः ते गुरुः कुशली अपि ) । [ यतः त्वया अशेष[2] ज्ञान उष्णरश्मेः लोकेन चैतन्य इव आप्तम् ॥ ४ ॥

## सञ्जीविनी

अपीति । हे कुशाग्रबुद्धे सूक्ष्मबुद्धे । " कुशाग्रीयमतिः प्रोक्तः सूक्ष्मदर्शी च यः पुमान् " इति हलायुधः । मन्त्रकृतां मन्त्रस्रष्टृणा । " सुकर्मपापमन्त्र—" इत्यादिना क्विप् । ऋषीणा अग्रणीः श्रेष्ठः ते तव गुरुः कुशली अपि क्षेमवान् किम् । अपि प्रश्ने । " गर्हासमुच्चय प्रश्नशङ्कासंभावनास्वपि " इत्यमरः । यतः यस्मात्

गुरोः सकाशात् त्वया अशेषं ज्ञानं । लोकेन उष्णरश्मेः सूर्यात् चैतन्यं प्रबोधः इव । आत्त स्वीकृतम् ॥ ४ ॥

समासाः—अग्रे नीयते इति अग्रणीः उपपदस० । मन्त्रान् करोति इति मन्त्रकृत् उप० स० । तेषाम् । कुशस्य अग्र इव अग्रं यस्याः सा कुशाग्रा बहु० । कुशाग्रा बुद्धिः यस्य सः बहु० । न शेषः यस्य तत् बहु० । उष्णाः रश्मयः यस्य सः बहु० तस्मात् ।

Explanation:—सत्कारानन्तरं काकुत्स्थो भाषते । हे सूक्ष्ममते मुने, वेदसंहिताकारिणां भगवता महर्षीणा श्रेष्ठस्तवाचार्यः कुलपतिर्वरतन्तुर्लोकोपकाराय क्षेमवान् किम् ? न स केनापि व्याधिनाऽऽधिना वा पीडित इति मन्ये । यथा सविता संसारेऽस्मिन्सर्वेभ्यः प्रबोधं ददाति तथा भवताऽपि यस्माद्द्वेः सकाशात्सम‍ग्रमात्मनिष्ठ सत्तत्वं तथैव सकला विद्याः स्वीकृता अपि स ब्रह्मर्षिर्निरामयः सुखी वा ? ॥ ४ ॥

## NOTES.

अपि is used in these senses: गर्हा-censure, समुच्चय-and, प्रश्न-question, शङ्का-doubt, संभावना-possiblity, कामचारानुज्ञा-indifference; hope, drop ect. See Guide. अग्र+ नी + क्विप् । नस्यणत्वम् । मन्त्र + कृ + तुक् + क्विप् । क्विप् is apdended to कृञ् करणे when preceded by सु, कर्म, पाप, मन्त्र and पुण्य. " सुकर्मपापमन्त्रपुण्येषुकृञः " is the sutra. सुकृत्, पापकृत्, पुण्यकृत् । also शास्त्रकृत्, भाष्यकृत् । ऋषयः मन्त्रद्रष्टारः seers of vedas. " एतान्यपश्यन् गुरवः पुराणाः " ( भवभूतिः ) This is the orthodox view. मन्त्रकर्तारः composers of Vedas like व्यास वाल्मीकि and other poets. This is the other rational view. कालिदास is a rational poet.

कुशस्य अग्रं तद्वत्तीक्ष्णा बुद्धिर्यस्य तत्सेबुद्धिः thus analyses चारित्रवर्धन. कुशा० means one who has acute intellect.

बुध+ क्तिन् बुद्धि : e. g. गतिः, ततिः, शुद्धिः, ऋद्धिः ।

कुशलं अस्ति अस्य इति कुशलिन् इनिप्रत्ययः ।

गुरुः " सगुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति " defines याज्ञवल्क्य. " गुरुर्गोष्पतिपित्राद्यौ " गुरुः means elderly persons such as आचार्यः पिता, ज्येष्ठभ्राता, मातुलः, श्वशुरः पितृव्यः, माता etc.

ऋषीणां and ते ' शेषे ' सबंधे षष्ठी । त्वया कर्तरि तृतीया ।

यतः ' आख्यातोपयोगे ' इति पंचमी ।

ज्ञायते इति ज्ञानं ज्ञा + ल्युट्भावे । शिष् + घञ् शेषः ( शिष+ अच्=शेषः)

आप् + क्त निष्ठायाम् । आप्तम्

चेतनस्य भावः चेतन + ष्यञ् । चैतन्यम्

उपमा अलंकारः

Trans. :—Oh you of a sharp intellect ! is it well with your preceptor, the foremost of the sages, the authors of Vedic verses, and from whom is obtained by you entire knowledge, as by the world is obtained the spirit or vitality from the hot-rayed sun ? 4

**कायेन वाचा मनसापि शश्वद्यत्संभृतं वासवधैर्यलोपि ।**
**आपाद्यते न व्ययमन्तरायैः कच्चिन्महर्षेस्त्रिविधं तपस्तत् ॥५॥**

**अन्वयः**—कायेन वाचा मनसापि वासवधैर्यलोपि यत्तपः शश्वत्संभृतं महर्षेः त्रिविधं तत् तपः अन्तरायैः व्ययं न आपाद्यते कच्चित् ॥ ५ ॥

## संजीविनी

कायेन इति । कायेन उपवासादिकृच्छ्रचान्द्रायणादिना । वाचा वेदपाठेन मनसा गायत्रीजपादिना अपि । करणेन । वासवस्य इन्द्रस्य धैर्यं लुम्पति इति वासवधैर्यलोपि । स्वपदापहारशंकाजनक इत्यर्थः । यत् तपः शश्वत् असकृत् । " मुहुः पुनः पुनःशश्वत् अभीक्ष्ण असकृत्समाः " इत्यमरः । संभृतं संचितं महर्षेः वरतन्तोः त्रिविधं वाङ्मनःकायजं तत् तपः अन्तरायैः विघ्नैः इन्द्रप्रेरिताप्सरः शापैः व्ययं नाशं न आपाद्यते कच्चित् । न नीयते किम् । " कच्चित् कामप्रवेदने " इत्यमरः ॥ ५ ॥

समासाः—वासवस्य धैर्यं ष० त० । तत् लुंपति इति वास० पि उपपदस० । महांश्चासौ ऋषिश्च महर्षिः कर्म० । त्रयः or तिस्रः विधाः यस्य तत् बहु० । [ वि + धा + क or अच् विधः or विधा ]

Explanation:—तपश्चर्यारूपधर्मस्त्रिप्रकारकः। कायिकोवाचिकोमानसिकश्च। शरीरेणोपवासचान्द्रायणादि व्रतानि कर्तव्यानि। वाण्या वेदवेदाङ्गधर्मशास्त्रपुराणादीनि पठनीयानि। अन्तःकरणेन मुखोच्चारणेन विना गायत्र्यध्यानजपादिकं विधेयम्। एतदाचरणेन वैराग्य जायते। अयं तपस्वी मम स्थानान्माच्यावयेदिति शङ्कयाऽप्सरः प्रेषणेन मघवा विघ्नानुत्पादयति। अप्सरसां शापादिना निग्रहेण लोभादिनाऽनुग्रहेण वा तपसो नाशो भवति। अत एव रघोः प्रश्नः। ऋषिणा यत्पुण्य सचित तस्य क्षयो न केनापि कारणेन सजातः खलु ॥ ५ ॥

## NOTES.

कायेन, वाचा and मनसा करणे तृतीया। अन्तरायैः हेतौ तृ०।

चि + घञ् = कायः। चीयते अस्मिन् अस्थ्यादिकम्।

सम् + भृ + क्त = सम्भृतम्। व्यय् गतौ + अच्। व्ययतित्ते। व्ययः।

वसुः + अण् = वासवः। वसु. एव स्वार्थे or वसूनि सति अस्य।

धीर + ष्यञ् = धैर्यम्। धीरस्य कर्म भावो वा।

लुप् + णिनिः। लुप् ( लुप्लृ ) छेदने 6th conj. लुम्पति–ते। लोपिन् आ + पद् + णिच् + यक् + ते Third person, singular, passive, present, causal of पद् गतौ 4th conjugation, atmanepada.–आपाद्यते।

महत् is changed to महा in कर्म० and बहु० compounds मुहुः, पुनः, शश्वत्, अभीक्ष्ण, असकृत् are all synonyms: कच्चित् means " I hope." कत् + चित्। see Guide " अन्तरयः or अन्तरायः an impediment in the form of pronouncing a curse or the sight of damsels ) cf. त्राणाभावे हि शापास्त्राः कुर्वन्ति तपसोव्ययम्। रघु० XV. 3. इन्द्रवज्रावृत्तम्।

Trans. :— I hope the three-fold asceticism of that great sage, which has been accumulated by constant exercises of the body, speech and mind, and which disturbs Indra's composure or calmness, is not destroyed by impediments or temptations. 5

**आधारबन्धप्रमुखैः प्रयत्नैः संवर्धितानां सुतनिर्विशेषम्।**
**कच्चिन्न वाय्वादिरुपप्लवो वः श्रमच्छिदामाश्रमपादपानाम्॥ ६ ॥**

अन्वयः—आधारबन्धप्रमुखैः प्रयत्नैः सुतनिर्विशेषं संवर्धितानां श्रमच्छिदा वः आश्रमपादपानां वाय्वादिः उपप्लवः न कच्चित् ॥ ६ ॥

## संजीविनी

आधारेति । आधारबन्धप्रमुखैः आलवाल निर्माणादिभिः प्रयत्नैः उपायैः । " आधारः आलवालेऽम्बुबन्धेऽधिकरणेऽपिच " इति विश्वः । सुतेभ्यः निर्गतः विशेषः यस्मिन् कर्मणि तत्तथा । संवर्धितानां श्रमच्छिदा वः आश्रमपादपाना वाय्वादिः । आदिशब्दात् दावानलादिः । उपप्लवः बाधकः न कच्चित् नास्ति किम् ॥ ६ ॥

समासाः-आधारस्य बन्धः ष० त० । आधारबन्धः प्रमुखः येषा ते बहु० । निर्गतः विशेषः यस्मिन् कर्मणि यथा तथा बहु० अव्ययम् । सुतेभ्यः निर्विशेषम् पंचमी त० । वायुः आदिः यस्यसः बहु० । श्रमं छिन्दन्ति इति श्रमच्छिदः उप० । तेषाम् । पादैः पिबन्ति इति पादपाः उप० । आश्रमस्य पादपाः ष० त० तेषाम्.

Explanation:—भवतामाश्रमे तपोवने ये वृक्षाः सन्ति तेषु पुत्रेष्विव भवान् स्निह्यति । तेषां तले भवान् आलवालादिकं निर्माय जलदानेन तान् पोषयति । सर्वे ते द्रुमाः फलपुष्पच्छायाप्रदानेनाभ्यागताना मार्गखेदमपहरन्ति । परोपकारिणः खलु ते । अपि तेषा वातदावानलप्रभृतिभिः कापि बाधा न भवति ॥६॥

## NOTES

प्रमुखं " मुख तु वदने मुख्ये आदौ द्वाराभिपालयोः " आ + धृ + घञ्. आध्रियन्ते अस्मिन् क्रियाः इति आधार. a basin round the foot of a tree. It means recipient or location, support, power, relation etc.

प्रयत्नैः करणे तृतीया ।

संवर्धितः सम् + वृध् + णिच् (causal) + क्त Past passive participle.

पाद + पा + क + पादैः पिबन्ति इति पादपाः उपपदस०

छिद् + क्विप् = छिद्

उप + प्लु + अच् प्लवति-प्लवते प्लुङ् गतौ । उपप्लवः a calamity. These calamities can be दवदहनगजकुलिशवायुमूषकादयः । पादपाना and वः are संबधे षष्ठी ।

अस्ति is the finite verb understood: अप्रयुज्यमानोपिअस्ति.

Trans:—I hope the storm and other calamities do not befall the trees round your hermitage, which remove fatigue and which have been brought up by you with as much care as is given to sons, by digging water basins round their bottom and doing other like things.

**क्रियानिमित्तेष्वपि वत्सलत्वादभग्नकामा मुनिभिः कुशेषु**
**तदङ्कशय्याच्युतनाभिनाला कच्चिन्मृगीणामनघा प्रसूतिः ॥७॥**

**अन्वयः**—क्रियानिमित्तेषु अपि कुशेषु मुनिभिः वत्सलत्वात् अभग्नकामा तदङ्कशय्याच्युतनाभिनाला मृगीणां प्रसूतिः अनघा कच्चित् ॥ ७ ॥

## संजीविनी ।

क्रियेति । क्रियानिमित्तेषु अपि अनुष्ठानसाधनेष्वपि कुशेषु मुनिभिः वत्सलत्वात् मृगस्नेहात् अभग्नकामा अप्रतिहतेच्छा । तेषा मुनीना अङ्काः एव शय्याः तासुच्युतानि नाभिनालानि यस्याः सा तथोक्ता मृगीणा प्रसूतिः सन्ततिः अनघा अव्यसना कच्चित् । अनपायिनी किम् इत्यर्थः । " दुःखैनोव्यसनेषु अघम् " इति यादवः । ते हि व्यालभयात् दशरात्र अङ्के एव धारयन्ति ॥ ७ ॥

समासाः—क्रिया निमित्त येषा ते बहु० तेषु । वत्स ( हृदयं ) लाति ( गृह्णाति ) इति वत्सलः उपपद० । न भग्नः अभग्नः नञ स० । अभग्नः कामः यस्याः सा बहु० । तेषां अङ्काः तदङ्काः ष० त० । तदङ्काः एव शय्याः कर्म० । तदंकशय्यासु च्युतानि स० त० । नाभेः नालानि ष० त० । तदं—तानि नाभि—नि यस्याः सा बहु० । नास्ति अघ यस्यां सा बहु० ।

विवृतिः—भगवन् जानाम्यहं यथाऽऽश्रमनिवासिन ऋषयो हरिणेषु हरिणीषुच सुतनिर्विशेष स्निह्यन्ति । तेषा शावकान् सदैव ते निजक्रोडेषु लालयन्ति । जन्मकाले तेषा नाभिनालमपि तपस्विनामङ्क एव निपतति । यज्ञार्थमानीतैर्दर्भाङ्कुरैरपि ते तान् पोषयति । मन्ये सर्वे ते मृगास्तथा च हरिणशिशवो निर्बाधाः सन्ति ॥ ७ ॥

## NOTES.

वत्सलत्वात् – वत्सलस्य भावः । तस्मात् । हेतौपचमी ।
मुनिभिः कर्तरि तृतीया । कुशेषु वैषयिकीसप्तमी ।

क्रिया – कृ + शप्रत्ययः । क्रियानिमित्तेषु may be taken to be षष्ठी तत्पुरुष compound. भग्न p. p. p. of भंज् आमर्दने 7th conj. paras. च्युत p. p. p. of च्यु गतौ 1st conj. गलित. प्र + सू+क्तिन् । शय्या – शी + क्यप् = तल्पः a bed. नाभिः = उदरावर्तः । नाल = नाडी umbilical cord or navel strings ( मराठी नाळ ) अघ is used in these senses : दुःख एनः sin, व्यसन mishap. cf शाकु० मृगवधूर्यदा अनघप्रसवा भवति तदा कमपि विसर्जयिष्यथ IV तेहि etc. The sages allowed the fawns to sit on their laps through fear of snakes or other beasts of prey. They loved the fawns so much that they would allow them from their very birth to sit on laps, to eat the यज्ञियकुशs and do anything.

Trans.:— I hope the fawns of female - deer are quite well and safe, whose desire for sitting on or eating even the Kush-grass, required for rites, is always fulfilled by the sages through extreme love, and who drop down the umbilical cords on their laps serving as their beds. 7

---

**निर्वर्त्यते यैर्नियमाभिषेको येभ्यो निवापाञ्जलयः पितृणाम् ।**
**तान्युञ्छषष्ठाङ्कितसैकतानि शिवानि वस्तीर्थजलानि कच्चित् ॥ ८ ॥**

अन्वयः—यैः नियमाभिषेकः निर्वर्त्यते, येभ्यः पितृणां निवापाञ्जलयः निर्वर्त्यन्ते, उञ्छषष्ठाङ्कितसैकतानि वः तानि तीर्थजलानि शिवानि कच्चित् ॥ ८ ॥

## संजीविनी ।

निर्वर्त्यते इति । यैः तीर्थजलैः नियमाभिषेकः नित्यस्नानादिः निर्वर्त्यते निष्पाद्यते । येभ्यः जलेभ्यः उध्दृत्य इति शेषः । पितृणां अग्निष्वात्तादीनां निवापाञ्जलयः तर्पणाञ्जलयः । "पितृदानं निवापस्यात्" इत्यमरः । निर्वर्त्यन्ते । उञ्छानां प्रकीर्णोध्दृतधान्यानां षष्ठैः षष्ठभागैः पालकत्वात् राजग्राह्यैः अङ्कितानि सैकतानि पुलि-

नानि येषां तानि तथोक्तानि । वः युष्माकं । तानि तीर्थ जलानि । शिवानि भद्राणि कच्चित् । अनुपप्लुतानि किम् इत्यर्थः । " उञ्छो धान्याशकादानं कणिशाद्यर्जनं शिलम् " इति यादवः । " षष्ठाष्टमाभ्यां ञ च " इति षष्ठशब्दात् भागार्थे चात् अन् प्रत्ययः । अत एव अपूरणार्थत्वात् । " पूरणगुण—" इत्यादिना न षष्ठीसमासप्रतिषेधः । सिकताः येषु सन्ति सैकतानि । " सिकताशर्कराभ्यां च " इति अण् प्रत्ययः ॥ ८ ॥

समासाः—नियमेन अभिषेकः तृ० त० । निवापस्य अञ्जलयः ष० त० । उञ्छानां षष्ठाः ष० त० । उञ्छषष्ठैः अङ्कितानि तृ० त० । उञ्छषष्ठाङ्कितानि सैकतानि येषां तानि बहु० । तीर्थस्य जलानि ष० त० ।

विवृतिः—यैः पुण्योदकैर्नित्यस्नानादिकर्माणि क्रियन्ते तथैव येभ्यः पवित्रवारिभ्य उद्धृत्य मुनिभिर्देवानामृषीणामाचार्याणां तथाचाग्निष्वात्तादिसमस्तपितॄणां तर्पणाञ्जल्यो दीयन्ते येषां च जलसरोवराणां तीरेषु नृपोद्देशेनर्षयः प्रकीर्णोद्धृतधानान्यां षष्ठं भागं क्षिपन्ति तादृशानि युष्माकं वापीनदीदीर्घिकादीनां परिपूतसलिलानि पुनरनुपप्लुतानि सन्तीत्याशंसे ॥८॥

## NOTES.

" तीर्थं शास्त्राध्वरक्षेत्रोपायोपाध्यायमन्त्रिषु ।
अवतारर्षिजुष्टाम्भः स्त्रीरजःसु च विश्रुतम् " इति विश्वः ।

अभि+सिच्+ घञ् अभिषेकः = स्नानम्

येभ्यः " *ल्यब्लोपेकर्मण्युपसंख्यानम्* " इति पञ्चमी यानि उद्धृत्य । नि + वप् to offer + घञ् = निवापः an offering to the manes of deceased parents, a libation of water mixed with तिल sesamum at the Shradha ceremony, known as तिलाञ्जलिः उञ्छः एकैकस्य त्यक्तस्य कणस्योपादनम् । उ-छ to glean or gather bit by bit, 6th conj. P. + घञ् । " यस्मादारण्यका अपि उञ्छषड्भाग निर्वापयन्ति " इति श्रुतेः । यो स्मान् पालयति राजा तस्मै षष्ठोऽस्य विभागः इति उक्त्वा तीरे षष्ठं भागं क्षिपन्ति मुनयः । They offer the sixth not only of rice grains gathered by them but also the sixth portion of their merit. " तपःषड्भाग मक्षय्य ददत्या-

रण्यका हि नः " says दुष्यन्त in शाकुन्तलम् । शिलम् or उञ्छ or शिलोञ्छः means the same thing. " षष्ठा-" षष्ठ and अष्टम take ञ and अन्. षष्ठ + ञ = षाष्ठः, षष्ठ + अन् = षष्ठः. so also आष्टमः and अष्टमः । " पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन " पूरणाद्यर्थैः सदादिभिश्च षष्ठी न समस्यते । पूरण an ordinal number, गुणः a quality. Words indicating these are not compounded. सता षष्ठः, काकस्य कार्ष्ण्यम् etc In the verse before us, षष्ठ is compounded with उञ्छ because it is not a पूरण but a sixth portion. Being भागार्थ, the सूत्र " पूरण-" is not applicable. This sixth portion of grains placed on the bank is to be taken away by Revenue officers of the King. सिकता + अण् = सैकतम् । शर्करा gravel or pebble + अण्=शार्करम्.

निर् + वृत्त + णिच् + यक् + ( लट् ) ते. Passive third person singular present of the causal of वृत् with निर्.

Trans. :— I hope it is all right with your holy waters, by means of which daily ablutions are performed and from which handfuls of watery libations are given to the Manes and whose sandy shores are marked by the sixth portions of gleanings. 8.

---

**नीवारपाकादि कडङ्गरीयैरामृश्यते जानपदैर्न कच्चित् ।**
**कालोपपन्नातिथिकल्प्यभागं वन्यं शरीरस्थितिसाधनं वः ॥ ९ ॥**

अन्वयः— कालोपपन्नातिथिकल्प्यभागं वन्यं शरीरस्थितिसाधनं वः नीवारपाकादि जानपदैः कडङ्गरीयैः न आमृश्यते कच्चित् ॥ ९ ॥

## संजीविनी ।

नीवारेति । कालेषु योग्यकालेषु उपपन्नानां आगतानां अतिथीनां कल्प्याः भागाः यस्य तत् तथोक्तम् । वने भवं वन्यम् । शरीरस्थितेः जीवितस्य साधनम् । वः युष्माकं । पच्यते इति पाकः फलम् । धान्यमितियावत् । नीवारपाकादि ।

आदिशब्दात् श्यामाकादिधान्यसंग्रहः । जनपदेभ्यः आगतैः जानपदैः । “ ततः आगतः ” इति अण् । कडङ्गरीयैः । कडङ्गरं बुसं ( भुसा इति भाषाया ) अर्हन्तीति कडंगरीयाः । “ कडगरो बुसं क्लीबे धान्यत्वाचि तुषः पुमान् ” इत्यमरः । “ कडगरदक्षिणाच्छच ” इति छ प्रत्ययः । तैः गोमहिषादिभिः । न आमृश्यते कच्चित् । न भक्ष्यते किम् इत्यर्थः ॥ ९ ॥

समासा : — कालेषु उपपन्नाः स० त० : कालोपपन्नाः अतिथयः कर्म० । तेषा कल्प्याः ष० त० । कालो – कल्प्याः भागाः यस्य तत् बहु० । adj to नीवारपाकादि । शरीरस्य स्थितिः । शरीरस्थितेः साधनम् उभयत्र ष० त० । नीवारस्य पाकः ष० त० । नीवारपाकः आदिः यस्य बहु० । or प्रशस्ताः नीवाराः नीवारपाकाः नित्यसमासः “ प्रशंसावचनैश्च ” इति ( पाकाः प्रशस्ताः पवित्रत्वात् says हेमाद्रिः ) जनाना पदं = जनपदं ष० त०

विवृति :— आश्रमसमीपेऽरण्ये यद् धान्यफलमूलादिक प्राणयात्रानिदानमुनीनामुपजीविकोपायभूतमारोहति यस्मादेव पक्वान्नाद्वैश्वदेवसमय आगतानामागन्तुकाना भोजनसत्कारः क्रियते तत्सस्यं ग्राम्यगोमहिषादयः पशवो न कदाप्यागत्य भक्षयन्तीति मन्ये । “ वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत् । तस्मा अन्न यथाशक्ति प्रदद्यान्न बालिं हरेत् ” इत्यस्ति धर्मः ॥ ९ ॥

## NOTES.

नीवारः rice growing wild or without cultivation. नि + वृ + घञ् = नीवारः ( “ नौवृ धान्ये, ” “ उपसर्गस्य घञि अमनुष्येबहुलम् ; ” नि is lengthened before घञ् as the word does not mean ‘ a man. ’ निवारः = warding off, निवरा = girl.) पच् + घञ् = पाकः a fruit or corn. आदि includes श्यामाक and other kinds of corn कडंगरः chaff or straw बुसं ( मराठी भुसा ) ( क्लीबे– in neuter and पुमान् masculine ; तुषः means husk ) कडंकर ( कडंगर ) and दक्षिणा take छ and यत्; कड करोति ( कडं stupid ) कडकरः, कड + कृ + खच् + छ ( ईय ); माषमुद्गादिकाष्ठं अर्हति इति कडंकरीयः or कडंकर्यः; कडंकर is given by Panini. कालिदास uses कडगर lower animals eating chaff दक्षिणीय or दक्षिण्यः वन +

यत् = वन्यम् । " ततः आगतः " coming from that; जनाना पदं यत्र स जनपदः देशः ग्रामः + अण् = जानपदः । भज + घञ् = भागः । उप + पद् + क्त – न = पन्न " रदाभ्यां निष्ठातो नः पूर्वस्यच दः " त and द are changed न.

क्लृप् + यत् = कल्प्याः देयाः । स्था + क्तिन् = स्थितिः । साध्यते अनेन इति साधनम्, साध् + ल्युट् ( अन ) आमृश् 6th P. to touch. इन्द्रवज्रा वृत्तम्.

Trans.:— I hope your Nivara and other kinds of corn, fruits, etc. growing in the forest, the means of maintenance of your body, out of which you give portions to guests coming in time, is never touched ( eaten up ) by country cattle living upon chaff. *9.*

---

**अपि प्रसन्नेन महर्षिणा त्वं सम्यग्विनीयानुमतो गृहाय ।**
**कालो ह्ययं संक्रमितुं द्वितीयं सर्वोपकारक्षममाश्रमं ते ॥ १० ॥**

अन्वयः—त्वं प्रसन्नेन महर्षिणा सम्यग्विनीय गृहाय अनुमतः किम् ? सर्वोपकारक्षम द्वितीय आश्रमं संक्रमितुं ये अथं कालः हि ॥ १० ॥

## संजीविनी

अपीति । किं च त्वं प्रसनेन सता महर्षिणा सम्यग्विनीय शिक्षयित्वा । विद्या उपदिश्य इत्यर्थः । गृहाय गृहस्थाश्रमं प्रवेष्टु । " क्रियार्थोपपद—" इत्यादिना चतुर्थी । अनुमतः अपि अनुज्ञातः किम् । हि यस्मात् ते तव सर्वेषां आश्रमाणा ब्रह्मचर्यवानप्रस्थयतीना उपकारे क्षमं शक्तं । " क्षमं शक्ते हिते त्रिषु " इत्यमरः । द्वितीय आश्रमं गार्हस्थ्यं संक्रमितुं प्राप्तुं अय कालः । विद्याग्रहणानन्तर्यात्तस्य इति भावः । " कालसमयवेलासु तुसुन् इति तुमुन् । सर्वोपकारक्षमं इत्यत्र मनुः " यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः। वर्तन्ते गृहिणस्तद्वदाश्रित्येतर आश्रमाः " इति ॥ १० ॥

समासाः—सर्वेषां उपकारः ष० त० । तास्मिन् क्षमः स० त० तम् ,

विवृतिः—अपि भवता सर्वा वेदवेदागाविद्याः सर्वाणि शास्त्राणि च गुरोः साधु शिक्षितानि ? अपि भवदाचार्यः सन्तुष्टो भवते शिक्षाप्रदानेन ? अपि गृहस्थाश्रमं

प्रवेष्टुं भवानुपाध्यायेनानुज्ञातः ? भवतो वयोऽवस्था दृष्ट्वा जाने यथाऽधुना भवता गृहमेधिना भूत्वाऽखिलजीवाना भोजनादिकेन साहाय्य कर्तव्यम् ॥ १० ॥

## NOTES.

प्र + सद् + क्त = प्रसन्न p. p. p. सम्यक् = योग्यतया, साधु; अव्ययम् । वि + नी + ल्यप् " समानकर्तृकयो. पूर्वकाले " " समासेऽनञ् पूर्वे क्त्वोल्यप् "। absotutive. अनु + मन् + क्त । गृहायगृह प्रवेष्टुम् । " क्रियार्थोपपदस्य च कर्मणि स्थानिनः " । क्षम adjective meaning fit, able. क्षमते इति । क्षम् + अच्. तुमुन् Infiintive termination; an infinitive form may be used with words meaning time. ( see Guide ). मनु says: just as all creatures depend upon their mother for food, so the people in ब्रह्मचर्य, वानप्रस्थ and सन्यास orders look to a householder for food. But the verse quoted by मल्लिनाथ from मनु is not found in the निर्णयसागर edition of the स्मृति. There we have " यथा वायु समाश्रित्य वर्तन्ते सर्वे जन्तवः । तथा गृहस्थमाश्रित्य वर्तन्ते सर्वे आश्रमाः ॥ ३·७७ ॥ यथा नदीनदाः सर्वे सागरे यान्ति संस्थितिम् । तथैवाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् ॥ ६·९० ॥ गृहस्थ उच्यते श्रेष्ठः स त्रीनेतान् बिभर्ति हि ॥ ६·८९ ॥

Change of voice: अपि प्रसन्नः महर्षिस्त्वा सम्यग्विनीय गृहायानुमतवान्? हि ते...अनेन कालेन भूयते ॥ १० ॥

Trans.:--Are you allowed to enter on the stage of a house-holder by the great sage, pleased on account of taking you properly ( right ) through the course? For it is now time for you to take up the second stage of life, capable of service to all (beings) 10.

---

**तवार्हतो नाभिगमेन तृप्तं मनो नियोगक्रिययोत्सुकं मे ।**
**अप्याज्ञया शासितुरात्मना वा प्राप्तोऽसि संभावयितुं वनान्माम् ॥**

अन्वयः–अर्हतः तव अभिगमेन मे मनः न तृप्त, नियोगक्रियया उत्सुकम् । शासितुः आज्ञया अपि आत्मना वा मा सभावयितु वनात् प्राप्तः असि? ॥११॥

## संजीविनी.

कुशलप्रश्नं विधाय आगमनप्रयोजनप्रश्नं चिकीर्षुः आह । तवेति । अर्हत पूज्यस्य प्रशंस्यस्य । " अर्हः प्रशसायाम् " इति शतृप्रत्ययः तव अभिगमेन आगमनमात्रेण मे मनः न तृप्त न तुष्टम् । किंतु नियोगक्रियया आज्ञाकरणेन उत्सुकं सोत्कण्ठम् । " इष्टार्थोद्युक्त उत्सुकः " इत्यमरः । " प्रसितोत्सुकाभ्यां तृतीया च " इति सप्तम्यर्थे तृतीया । शासितुः गुरोः आज्ञया अपि आत्मना स्वतः वा । " प्रकृत्यादिभ्यः उपसङ्ख्यानम् " इति तृतीया । मा सभावयितुं वनात् प्राप्तः असि । गुर्वर्थं स्वार्थं वा आगमन इत्यर्थः ॥ ११ ॥

समासाः—नियोगस्य क्रिया ष० त० ।

निवृतिः— सुदिनः खलु स यस्मिन् भवादृशाः सज्जना गृहमागच्छन्ति । अत आनन्दितोऽह यतः पूज्येन भवता पादस्पर्शेन मम प्रासादः पवित्रीकृतः । तथापि भवत आज्ञायाः श्रवणेन करणेन च द्विगुणितो ममानन्दः स्यात् । आज्ञापय भगवन् किं मया विधेयमिति । केन हेतुना भवानाश्रमादत्रागतः ? मामनुग्रहीतुमेव ? भवदर्थं गुर्वर्थं वा सेवकेन मया किं कर्तव्यम् ॥ ११ ॥

### Notes.

कुशल— Asking after his health first, Raghu, desirous of knowing the cause of his coming, says. This is an introduction to the verse by मल्लिनाथ. अर्ह् पूजायाम् to deserve 1st conj. P. takes शतृ ( अत् pre. part. term. ) in the sense of " praise " ). तव " शेषे " षष्ठी । अभि + गम् + अप् ( भावे ). अभिगमेन हेतौ तृ० । तृप् + क्त । नि+ युज् + घञ् = नियोगः । कृ + श = क्रिया । उत्सुक adj. eagerly expecting, used with instr. or loca. or in a compound.; प्रसित means the same thing and used with the same cases. नियोगक्रिययोत्सुक may be taken to be an attributive adjective; my mind, eager to execute your command, is not content. This shows his kindness and very good nature. शास् अनुशिष्टौ to teach 2nd conj. P. + तृच् । प्रकृति and other

words govern the ins trumental. । सभावयितुम् Infinitive of the causal of भू with सम् = संमानयितुम् । वनात् अपादाने पंचमी । प्र + आप् + क्तः निष्ठायाम् कर्तरि meaning प्राप्तवान्, अकर्मकत्वात् । very easy verse in वैदर्भी style. प्रेयः नाम अलंकारः । " प्रेयः प्रियतराख्यानम् । "

Trans:—With the mere arrival of your worthy self my mind is not cotnent; it is anxiously awaiting to do your bidding. Is it by your tutor's order or of your own accord that you have come down from the forest to honour me? 11.

---

The speech of Raghu is over; that of कौत्स is given in verses from 13 to17.

**इत्यर्घ्यपात्रानुमितव्ययस्य रघोरुदारामपि गां निशम्य ।**
**स्वार्थोपपत्तिं प्रति दुर्बलाशस्तमित्यवोचद्वरतन्तुशिष्यः ॥१२॥**

अन्वयः–अर्घ्यपात्रानुमितव्ययस्य, रघोः इति उदारां अपि गां निशम्य वरतन्तुशिष्यः स्वार्थोपपत्तिं प्रति दुर्बलाशः तं इति अवोचत् ॥ १२ ॥

## संजीविनी.

इति इति । अर्घ्यपात्रेण मृण्मयेन अनुमितः [ ज्ञातः ] व्ययः सर्वस्वत्यागः यस्य तस्य रघोः इति उक्तप्रकारा उदारा औदार्ययुक्ता अपि गा वाच । " मनोनियोगक्रिययोत्सुकं मे " इति एवंरूपां । " स्वर्गेषुपशुवाग्वज्रदिङ्नेत्रघृणिभूजले । लक्ष्यदृष्ट्या स्त्रिया पुंसि गौः " इत्यमरः । निशम्य श्रुत्वा वरतन्तुशिष्यः कौत्सः स्वार्थोपपत्तिं स्वकार्यसिद्धिं प्रति दुर्बलाशः सन् मृण्मयपात्रदर्शनात् शिथिल मनोरथः सन् तं रघु इति वक्ष्यमाणप्रकारेण अवोचत् ॥ १२ ॥

समासाः–अर्घ्यस्यपात्र ष० त० । तेन अनुमित तृ० त०। अर्घ्य० त : व्ययः यस्य बहु० । तस्य । स्वः अर्थः कर्म० । तस्य उपपत्तिः ष० त० । ताम् । दुर्बला आशायस्य बहु० । सः ।

विवृतिः–मृण्मयपूजाभाजनेनैव रघुणा सर्वस्वं त्यक्तमिति ज्ञातमृषिणा । मम कार्यस्य सिद्धिरत्र न भवतीति तेन निश्चितच । तथापि नृपस्य सूनृतां वाचं श्रुत्वा कौत्सो वक्ष्यमाण प्रकारेणाब्रवीत् ॥ १२ ॥

## NOTES·

अनु + मा + क्त; नि + शम् + ल्यप्; निशाम्य or निशमय्य; उप + पद् + क्तिन्; प्रति governs the accusative; अवोचत् aorist third person, singular; वच् is changed to वोच् in second variety The word गो is used in these senses:–स्वर्ग: heaven इषु: arrow, पशु: a cow or a bull, वाक् speech, वज्र:–ज्रं thunderbolt, दिश् quarter, नेत्रं eye, घृणि: ray of light,, भू: earth, जल water; mas. and femi. according to its use ( लक्ष्यदृष्टया ). It also means the sun, the moon, the mother, diamond.

Trans.:–Hearing the words, though noble, of Raghu, whose bestowal of all could be inferred from the earthen pot of worship-materials, Varatantu's pupil, less hopeful in gaining his object spoke to him thus. 12.

---

**सर्वत्र नो वार्तमवेहि राजन् नाथे कुतस्त्वय्यशुभं प्रजानाम् ।**
**सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ॥१३॥**

अन्वय:–राजन् सर्वत्र नो वार्तं अवेहि; त्वयि नाथे प्रजानां अशुभं कुत: ? सूर्ये तपति तमिस्रा लोकस्य दृष्टे: आवरणाय कथ कल्पेत ? ॥ १३ ॥

## संजीविनी.

सर्वत्र इति । हे राजन् सर्वत्र [ गुर्वाश्रमतरुप्रभृतिषु ] नः अस्माकं वार्तं स्वास्थ्य त्वं अवेहि जानीहि । " वार्तं वल्गुनि अरोगे च " इत्यमर: " वार्तं पाटवमारोग्यं भव्यं स्वास्थ्यमनामयम् " इति यादव: । नच एतद् आश्चर्यं इत आह–नाथे इति । त्वयि नाथे ईश्वरे सति ( " यस्यच भावेन भावलक्षणम् " ) प्रजाना अशुभ दु:ख कुत: । तथाहि । अर्थान्तरंन्यस्यातिसूर्ये इत्यादिना । सूर्ये तपति प्रकाशमाने सति तमिस्रा तमस्तति: " तमिस्रं तिमिर कोपे तमिस्राच तमस्ततौ । कृष्णपक्षनिशाया च " इति विश्व: । लोकस्य जनस्य ।

" लोकस्तु भुवने जने " इत्यमरः । दृष्टेः आवरणाय ( आच्छादनाय ) कथं कल्पेत संपद्येत । न कल्पते, दृष्टिं आवरितुं न अल इत्यर्थः । क्लृपेः अल अर्थत्वात् तद्योगे " नमः स्वस्ति–" इत्यादिना चतुर्थी । " अलं इति पर्याप्त्यर्थग्रहणं " इति भगवान् भाष्यकारः । अथ वा क्लृपि सपद्यमाने च " इति चतुर्थी ॥१३॥

समासाः– न शुभं अशुभम् नञ समासः ।

विवृतिः–हे भूपाल, प्रत्येकविषये तपस्विनो वयं सर्वे ' स्वस्थाः । न भवता काचन चिन्ता कर्तव्या । यस्मिन्देशे त्वादृशो–धीशो विद्यते तस्मिन् को–वकाशो दुःखस्य ? तस्मिन्विषयेऽन्धकारो जनाना नेत्र कदापि नाच्छादयति यस्मिन् दिवाकरः प्रकाशते । यत्र नोदेति सविता तत्रैव तमः । अतः कुशल यत्र तत्र तव राज्य इति जानीहि ॥ १३ ॥ ·

## NOTES.

सर्व + त्रल् सप्तम्याः=सर्वस्मिन् विषये everywhere.

वार्त = वृत्ति + अण् = वल्गु skill and अरोगः good health; पाटवं skill, आरोग्यं welfare, भव्यं beautiful, स्वास्थ्य ease, अनामय well–being. तमिस्र = darkness, anger; तमिश्र expansive darkness and night of the dark fortinight. लोकः The world and the people. अव + इ + लोट् Imperative second person singular. इण् गतौ 2nd conj. P. to go. प्र + जन् + ड टाप् । " प्रजा स्यात् संततौ जने " । सूर्य " राजसूयसूर्यमृषोद्यरुच्य–" इत्यादिना निपातः Irregular. सरति आकाशे from स or सुवति कर्माणि लोकं प्रेरयति from षू सु प्रेरणे 6th conj. + क्यप् and रुट् । नाथे त्वयि and सूर्ये तपति are locative absolute constructions. आ + वृ +ल्युट् आवरणम् = आव्रियते अनेन वृ to cover 5th, 9tn and 10th conjugations. दृश् + क्तिन् = दृष्टिः । तमिस्राः तमः अस्ति अत्र निपातनात् साधुः कल्पेत means अल sufficient पर्याप्तिः so says पतञ्जलि, the well known writer of भाष्य on grammar, and so it governs the चतुर्थी of आवरण; or आवरण may have taken चतुर्थी by the sutra " क्लृपिसपद्यमानेच " for which see " Guide ".

अर्थान्तर न्यस्यति refers to the Figure of speech अर्थान्तर-न्यास: corroboration which means, supporting a particular proposition by a general one. सूर्ये etc. has passed into a maxim.

Trans.:-In every particular, with us it is well, oh King. You being their protector, whence can the subjects have any evil? When the sun is shining how can a mass of darkness obscure the sight of the people? 13

---

**भक्तिः प्रतीक्ष्येषु कुलोचिता ते पूर्वान्महाभाग तयातिशेषे ।**
**व्यतीतकालस्त्वहमभ्युपेतस्त्वामर्थिभावादिति मे विषादः ॥ १४ ॥**

अन्वयः—प्रतीक्ष्येषु भक्ति. ते कुलोचिता; महाभाग, तया पूर्वान् अतिशेषे। ( किं ) तु अहं व्यतीतकालः अर्थिभावात् त्वा अभ्युपेतः इति मे विषादः ॥१५॥

## संजीविनी

" तवार्हतः " इत्यादिनोक्त यत् तत् न चित्रम् इति आह । भक्तिः इति । प्रतीक्ष्येषु पूज्येषु । " पूज्यः प्रतीक्ष्यः " इत्यमरः । भक्तिः अनुरागविशेषः ते तव कुलोचिता कुलाभ्यस्ता । " अभ्यस्तेऽपि उचित न्याय्यं " इति यादवः । हे महाभाग सार्वभौम तया भक्त्या पूर्वान् [ पूर्वजान् ] अतिशेषे अतिवर्तसे । किं तु सर्वत्र वार्त्त चेत् तर्हि कथ खेदखिन्नः इव दृश्यसे अतः आह—व्यतीतेति । अह व्यतीतकालः अतिक्रान्तकालः सन् अर्थिभावात् ( याचकरूपेण ) त्वां अभ्युपेतः ( आगतः ) इति मे मम विषादः ( खेदः ) ॥ १४ ॥

समासाः—कुले उचिता स० त० । महान् भागः यस्य बहु० सबुद्धिः । व्यतीत: कालः येन स बहु० । अर्थिन भावः ष० त० ।

विवृत्तिः– हे श्रीमत्सार्वभौम रघो, इक्ष्वाकुणा वंशे ये राजानः संजाताः सर्वे ते वन्द्यातिथीन् महाप्रेम्णाऽभ्यर्चयामबभूवुः । तथापि त्वं पुनः सर्वेषु तेषु नृपेषु प्रेमपूर्वकसत्कारविषये श्रेष्ठ इति प्रसिद्धम् । अहमेवाधन्योयो योग्यसमये त्वां भिक्षार्थं न प्राप्तः । अधुनाऽत्र कार्यसिद्धिर्विलंबेन हेतुना न भवतीति मम मनसि दुःखं जायते ॥ १४ ॥

## NOTES.

भज् + क्तिः = भक्तिः । प्रति + ईक्ष् + यत् Potential Pas· Parti Venerable प्रतीक्ष्यः = पूज्यः । उच् 4th conj. P. to be used to,+ क्त = उचित P. P. P. = न्याय्यं or अभ्यस्तं । भज् + घञ् = भागः = दैवम् अतिशेषे second per. sing. pre. of शी 2nd conj. ( शीङ्स्वप्ने ) Atm. with अति to surpass. वि + अति + इ to go + क्त = व्यतीत P. P. P. । अभि + उप + इ + क्त । P. P. P. used in active sense. । भू + घञ् = भावः । वि + सद् + घञ् । प्रतीक्ष्येषु अधिकरणे सप्तमी । ते and मे शेषे संबंधे षष्ठी । तया हेतौ तृतीया । अर्थिभावात् हेतौ पञ्चमी । Some take महाभागतया as one word in तृ० हेतौ of महाभागता; but that does not appear to be correct.

Trans.:–Reverence for the worthy is hereditary in your family and, oh fortunate prince, you surpass *your ancestors thereby. It pains me, however, that* I have come to you in the capacity of a beggar when it is too late. 14.

---

**शरीरमात्रेण नरेन्द्र तिष्ठन्नाभासि तीर्थप्रतिपादितर्द्धिः ।**
**आरण्यकोपात्तफलप्रसूतिः स्तंबेन नीवार इवावशिष्टः ॥ १५ ॥**

अन्वयः—नरेन्द्र, तीर्थप्रतिपादितर्द्धिः शरीरमात्रेण तिष्ठन् आरण्यकोपात्तफलप्रसूतिः स्तबेन अवशिष्टः नीवार इव आभासि ॥ १५ ॥

### संजीविनी

शरीरेति । हे नरेन्द्र, तीर्थे सत्पात्रे प्रतिपादिता ऋद्धिः [ संपत्तिः ऐश्वर्यं ] येन सः तथोक्तः । " योनौ जलावतारे च मन्त्राद्यष्टादशस्वपि । पुण्यक्षेत्रे तथा पात्रे तीर्थं स्यात् दर्शनेषु च । इति हलायुधः । शरीरमात्रेण तिष्ठन् [ वर्तमानः ] आरण्यकाः अरण्येभवाः मनुष्याः मुनिप्रमुखाः । " अरण्यात् मनुष्ये " इति वुञ् [अक] प्रत्ययः । तैः उपात्ता [ गृहीता ] फलं एव प्रसूतिः यस्य सः स्तंबेन काण्डेन अवशिष्टः । " प्रकृत्यादिभ्य उपसंख्यानं " इति तृतीया । नीवारः इव आभासि शोभसे ॥ १५ ॥

समासाः--शरीरं एव शरीरमात्रम् मयूरव्यंसकादित्वात् नित्यसमासाः तत्पुरुषः। नराणा इन्द्रः ष० त० । तीर्थे प्रतिपादिता स० त० । तीर्थप्रतिपादिता ऋद्धि येन सः बहु० । आरण्यकैः उपात्ता तृ० त० । फलं एव प्रसूतिः रूपक कर्म० । आरण्यकोपात्ता फलप्रसूतिः यस्य सः बहु० ।

विवृतिः--हे लोकश्रेष्ठ राजन्, यथा वने जातस्तण्डुलवृक्षक आत्मनः सर्वाणि फलानि बीजानिच वानप्रस्थाश्रमिमुनिप्रमुखेभ्यो जनेभ्यो दत्वा काण्डमात्रेण तिष्ठति तथैव त्वमपि निजनिखिलवित्त योग्ययाजकयाचकेभ्यः समर्प्याधुना देहेनैव वससि अत एव ममाभीष्ट पूरयितुं न शक्नोषि ॥ १५ ॥

## NOTES.

शॄ + ईरन् शीर्यते इति that which wastes away.

स्था + शतृ ( अत् ) तिष्ठत् Present Parti. भा दीप्तौ to shine 2nd conj. P. प्रति + पद् + णिच्+क्त P. P. P of the causal of पद् । ऋध् वृद्धौ 4 conj. P. to prosper + क्तिन् भावे । अरण्य + वुञ् = आरण्यकः in the sense of a man and पथि, अध्याय, न्याय, विहार, हस्ति and गोमय । The last senses of road etc are added by कात्यायन. । उप + आ + दा + क्त = उपात्त or उपादत्त । प्र + सू + क्तिन् । अव + शिष् + क्त. P. P. P. अवशिष्ट । शिष् असर्वोपयोगे to leave as a remainder. शेषति, शेषयति and शिनष्टि, 1 7, 10 conj. उपमालङ्कारः । The word तीर्थ is used in these senses : योनिः vulva, descent into a river-ghat, the officials eighteen in number connected with the king—18 departments, holy place, proper person and systems of philosophy.

Trans :- Standing in person alone, oh lord of men, with your wealth given away to worthy recipients, you appear like a Nivara-plant, with its produce of crops taken away by foresters, left with its stem 15.

**स्थाने भवानेकनराधिपः सन्नकिंचनत्वं मखजं व्यनक्ति ।**
**पर्यायपीतस्य सुरैर्हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः ॥१६॥**

अन्वयः—भवान् एकनराधिपः सन् मखज अकिंचनत्वं व्यनक्ति स्थाने । सुरैः पर्यायपीतस्य हिमांशोः कलाक्षयः श्लाघ्यतरः हि ॥ १६ ॥

## संजीविनी

स्थाने इति । भवान् एकनराधिपः सार्वभौमः सन । मखज यज्ञजन्य। न विद्यते किंचन यस्त इति अकिंचनः। मयूरव्यंसकादित्वात् तत्पुरुषः । तस्य भावः तत्व निर्धनत्व व्यनक्ति प्रकटति । [ तत् ] स्थाने युक्तम् । " युक्ते द्वे साम्प्रतं स्थाने " इत्यमरः । तथाहि । सुरैः देवैः पर्यायेण क्रमेण पीतस्य हिमांशोः कलाक्षयः [ कला तु षोडशो भागः ] वृद्धेः उपचयात् श्लाघ्यतरः ( प्रशस्यतरः ) हि वर खलु ॥ " मणिः शाणोल्लीढः समरविजयी हेतिनिहतो । मदक्षीणो नागः शरदि सरितः श्यानपुलिनाः । कलाशेषश्चन्द्रः सुरतमृदिता बालवनिता। तनिम्ना शोभन्ते गलित-विभवाश्चार्थिषु नृपाः " ॥ इतिभावः ॥ अत्र कामन्दकः " धर्मार्थ क्षीणकोशस्य क्षीणत्वमपि शोभते । सुरैः पीतावशेषस्य कृष्णपक्षे विधोरिव " । इति ॥ १६ ॥

समासाः—अधिकं पाति इति अधिपः उप० नराणा अधिपः ष० त० । एकश्चासौ नराधिपश्च कर्म० । अकिंचनः मयूरव्यसकादित्वात् त० । तस्यभावः तत्वम् मुखात् जायते इति मखजम् उप० । पर्यायेण पीतः तृ० त० । हिमाः अशवः यस्य बहु० स० । कलाना क्षयः ष० त० ।

विवृतिः—हे सार्वभौम, चन्द्रे किल षोडश लेखा विद्यन्ते, कृष्णपक्षे तस्य पंचदश लेखा वह्रिविश्वेदेवप्रभृतयो देवाः प्रत्यह क्रमेणैका पिबन्त्यश्नन्ति वा । वा । एवममावास्यायां तारापतिः सर्वान् निजांशान् दिविष्ठेभ्यो ददाति प्रतिपदि च तस्यैकैव कलाविद्यते । तथापि क्षीणमपि त सर्व एव नमस्कुर्वन्ति । यथा कला शेषश्चन्द्रस्तनिम्ना शोभते तथैवार्थिषु दत्तसंपदो नृपा अपि शोभन्ते । त्वयापि स्वसर्वधन यज्ञे ब्राह्मणेभ्यो वितीर्णम्। तत्तुयुक्तमेव। कृशवित्तत्वेनैव महाराजो विराजते।

## NOTES.

स्थाने— अव्ययम् Indeclinable,— साम्प्रत and स्थाने are used in the sense of " proper " युक्त or उचितम् । भवान् nomi. sing. masc. of भवत् which is not the pres. parti. of भू

but a pronoun from भू meaning " your honour· " भू + डवतु = भवत् अविपाति इति अधिपः । अधि + पा + क। सन् pre parti. of अस् to be शतृप्रत्ययः । अकिंचन is mentioned by Panini in the list of irregular तत्पुरुष compounds beginning with मयूरव्यंसक and containing in it उच्चावचं, उच्चनीचं, अकिंचन, अश्नीतपिबता, खादतमोदता, अहमहमिका, यदृच्छा, द्रव्यान्तरम् etc. । अकिंचनत्वं abstract noun. मख + जन् + ड before which the टि--final consonant with the preceding vowel i.e. अन् is dropped. वि + अञ्ज् = अञ्ज् = व्यक्तिम्रक्षणकान्तिगतिषु 7 th conj. P. to manifest. पा पाने + क्त = पीत p. p. p. क्षि + अच्= क्षयः = नाशः। श्लाघ्य + तरप् comparative. श्लाघ् कत्थने to praise 1 st conj. Atm. + ण्यत् = praiseworthy, Potential passive participle. वृध् + क्तिन् = वृद्धिः । compare " प्रणमन्त्यनपायमुत्थितं प्रतिपच्चन्द्रमिव प्रजा नृपम् " from किरात's second canot. मणिः शाणो-- is a quotation from शृंगारशतक of भर्तृहरि. It means a jewel polished on a stone, a conquerer· on the battlefield killed by weapons, an elephant reduced on account of the flow of rut, rivers with sandy banks shrunk in autumn, the moon with one digit left, a young lady squeezed on account of sexual enjoyment and kings with their property given away in charity to beggars do shine all the more on account of their reduction. कामन्दक in his नीतिसार says : Even the poverty of. a king whose treasury has become empty in virtuous deeds shines well, just as the wane of the moon in the dark fortnight shines as her 'digits are drunk up by gods. These digits are drunk by the fire, the sun, the विश्वेदेव's, वरुण, वषट्कार, वासव, the celestial seers, अज एकपात्, यम, वायु, उमा, the Manes, कुबेर, शिव and ब्रह्मा.

दृष्टान्तः अलंकारः Exemplification.

Trans :— It is but proper that your majesty, though a supreme sovereign, manifests poverty resulting from the sacrifice. The wane of the digits of the cool-rayed moon, drunk gradually by the gods, is indeed more praiseworthy than the waxing. 16

---

**तदन्यतस्तावदनन्यकार्यो गुर्वर्थमाहर्तुमहं यतिष्ये ।**
**स्वस्त्यस्तु ते निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि ॥१७॥**

अन्वयः— तत् तावत् अनन्यकार्यः अहं अन्यतः गुर्वर्थं आहर्तुं यतिष्ये । ते स्वस्ति अस्तु; चातकोऽपि निर्गलितांबुगर्भं शरद्घनं न अर्दति ॥ १७ ॥

## संजीविनी.

तद् इति । तत् तस्मात् तावत् अनन्यकार्यः । " यावत् तावत् च साकल्येऽवधौ मानेऽवधारणे " इति विश्वः । प्रयोजनान्तरहितः अहं अन्यतः वदान्यान्तरात् गुर्वर्थं गुरुधनं आहर्तुं अर्जयितुं यतिष्ये उद्योक्ष्ये । ते तुभ्यं स्वस्ति शुभं अस्तु । " नमःस्वस्ति—" इत्यादिना चतुर्थी । तथा हि चातकः अपि । " धरणीपतित तोयं चातकानां रुजाकरम् " इति हेतोः अनन्यगतिकः अपि इत्यर्थः । निर्गलित अंबु एव गर्भः यस्य तं शरद्घनं न अर्दति न याचते । " अर्द गतौ याचने च " इति धातुः । " याचनार्थे रणेऽर्दनम् " इति यादवः ॥ १७ ॥

समासाः— अन्यत् कार्यं कर्म० । न अन्यकार्यं यस्य बहु० । गुरोः अर्थः गुर्वर्थः ष० त० । अंबु एव गर्भः कर्म० रूपकम् । निर्गलितः अंबुगर्भः यस्य बहु० । शरदः घनः तम् ष० त० ।

विवृतिः— तव किमपि धनं न विद्यते । मया त्वध्यापकाय दक्षिणा दातव्या । तदेव मदागमनप्रयोजनम् । तस्मात् तत्प्राप्तुमहमपरं धनिनं गच्छामि । कल्याणं तव भूयात् । जीव चिरम् । शरदृतौ यदा मेघे जलं न विद्यते तदाऽनन्यगतिकोऽपि चातकपक्षी तं जलं न याचते । पक्षिणोऽपीदृशी बुद्धिः । अहं च मनुष्यः । अन्यस्माद् भिक्षां प्राप्स्यामि ॥ १७ ॥

## NOTES.

" यावत् etc. is not from विश्व but from अमरकोश. It means totality, limit, measure and resolution. See Guide. " यावत्तावत्परिच्छेदे कार्त्स्न्यमानावधारणे " says विश्व. अन्य + तसिल् = अन्यत: adv. from another. कृ + ण्यत् = कार्यम् । आ + हृञ् [ हरणे 1st conj. हरति–ते ] + तुमुन् । यत् ( यती प्रयत्ने ) 1st conj. Atm. यतिष्ये Future. स्वस्ति a particle meaning " may it be well with. " " स्वस्ति आशी: क्षेम–पुण्यादौ " इत्यमर: । सु + अस्ति = स्वस्ति । = Good bye. गल् अदने स्रवणेच 1st conj. P. to ooze + क्त = गलित । वदान्य: a generous person. See Giude for " नम: स्वस्तिस्वाहास्वधालंवषड् योगाच्च; " all these words govern the Dative. " धरणी—" means the water fallen from clouds on the earth sickens the चातक. चातक cannot go to another; it lives on rain drops before they touch the earth while I can go to another. किं पुनर्विद्यमानोपायोऽह त्वामित्यर्थ: । अपि shows जलदैकशरणत्व of the bird. अर्द् is used in the sense of going and begging like अर्थ. 1st conj. P. अर्दन is used, says यादव, in the sense of begging and going. Past Passive Participle is अर्दित or अर्ण as in अभ्यर्ण = समीप ।

Decline अन्य m. f. n., अम्बु and शरद्.

Give the different meanings of अपि with examples. See Guide.

अर्थान्तरन्यास: अलंकार: । चातक: etc. is a general proposition: a proverb.

Trans.:—Therefore with nothing else to do till I reward my tutor I will try to procure, from some other source, the money which I must pay him. Hail to you ! Even the chataka bird does not beg of the

autumnal cloud the watery contents of which has been showered out. 17.

**एतावदुक्त्वा प्रतियातुकामं शिष्यं महर्षेर्नृपतिर्निषिध्य ।**
**किं वस्तु विद्वन् गुरवे प्रदेयं त्वया कियद्वेति तमन्वयुङ्क्त ॥ १८ ॥**

अन्वयः––एतावद्उक्त्वा प्रतियातुकामं महर्षेः शिष्यं नृपतिः निषिध्य विद्वन् त्वया गुरवे प्रदेय वस्तु किं कियत् वा इति तं अन्वयुङ्क्त ॥ १८ ॥

## संजीविनी.

एतावत् इति । एतावद्वाक्यं उक्त्वा प्रतियातु कामः यस्य तं प्रतियातुकामं गन्तुकाम । " तुकाममनसोरपि " इति मकारलोपः । महर्षेः वरतन्तोः शिष्यं कौत्सं नृपतिः रघुः निषिध्य निवार्य हे विद्वन् त्वया गुरवे प्रदेयं वस्तु किं किमात्मकं कियत् किंपरिमाण वा इति एवं तं कौत्सं अन्वयुङ्क्त अपृच्छत् । " प्रश्नोऽनुयोगः पृच्छा च " इत्यमरः ॥ १८ ॥

समासाः– प्रतियातुं कामः यस्य बहु० । महान् च असौ ऋषिः च महर्षिः कर्म० । नृणां पतिः ष० त० ।

विवृतिः– एतावन्मात्र वचनमाख्याय कौत्सो मुनिश्रेष्ठवरतन्तुछात्रो गन्तु प्रारब्धः । किन्तु रघुस्तमाह हे पण्डितमुने न गन्तव्यं भवता । कथयतु भवान् किमात्मकं किंसख्याकं किंपरिमाण वा धन भवानाचार्याय वितरीतुमिच्छति । अहं यतिष्ये भवते तद दातुमिति ॥ १८ ॥

## NOTES.

एतत् + मतुप् = एतावत् । किं + मतुप् = कियत् । " तदस्यास्त्यस्मिन्निति मतुप्; " " मादुपधायाश्च मतोर्वोऽयवादिभ्यः " " आसर्वनाम्नः " । उक्त्वा absolutive, वच् + क्त्वा, संप्रसारण–– व is changed to उ । प्रतियातुकाम : an infinitive can be compounded with काम and मनस् alone and म् is dropped before them.

शास् + क्यप् = शिष्यः a pupil. नृणां पतिः–– पा to protect + इतिः । नि + षिध् गत्याम् = सिध् 1 st conj. सेधति + ल्यप् = निषिध्य । स्. of सिध् is changed to ष् coming after इ of नि । विद् ज्ञाने 2 nd conj. P. P क्वसु = विद्वस्. Nomi. Sing. विद्वान् m. विदुषी f.

विद्वत्, n. । गुरवे संप्रदाने चतुर्थी । प्र + दा + यत् = प्रदेय Poten. Pas. P. of दाण् or डुदाञ् = दा दाने = should be given. । त्वया कर्तरि तृ० । अनु + युज् means to ask. युजिर् योगे 7 th conj. P. A. युनक्ति-युङ्क्ते। अन्वयुङ्क्त third person singular, Imperfect लङ्, Atmanepada.

Trans.:-- The king prevented the great sage's pupil who, after saying this, was desirous of going--about to return--and said, " Learned sir, what thing and how much of it is to be given by you to your preceptor ? " 18

---

**ततो यथावद्विहिताध्वराय तस्मै स्मयावेशविवर्जिताय ।**
**वर्णाश्रमाणांगुरवे स वर्णी विचक्षणः प्रस्तुतमाचचक्षे ॥१९॥**

अन्वयः-ततः यथावत् विहिताध्वराय स्मयावेशविवर्जिताय वर्णाश्रमाणा गुरवे तस्मै विचक्षणः वर्णी सः प्रस्तुत आचचक्षे ॥ १९ ॥

## संजीविनी.

ततः इति । तत. [ तदनन्तरं ] यथावत् यथार्हम् । अर्हार्थे वतिः । विहिताध्वराय विधिवत् अनुष्ठितयज्ञाय । सदाचाराय इत्यर्थः । स्मयावेशविवर्जिताय गर्वाभिनिवेशशून्याय । अनुद्धताय इत्यर्थः । वर्णाना ब्राह्मणादीना आश्रमाणा ब्रह्मचर्यादीना च गुरवे । [ क्रियया यमभिप्रैति सोऽपि सम्प्रदानमिति चतुर्थी ] नियामकाय । " वर्णाः स्युः ब्राह्मणादयः " इति " ब्रह्मचारी गृही वानप्रस्थो भिक्षुचतुष्टये । आश्रमोऽस्त्री " इति च अमरः । सर्वकार्यनिर्वाहकाय इत्यर्थः । तस्मै रघवे विचक्षणः [ कुशलः ] विद्वान् वर्णी ब्रह्मचारी । "वर्णिनः ब्रह्मचारिणः" इत्यमरः । " वर्णात् ब्रह्मचारिणि " इति इनि प्रत्ययः । सः कौत्सः प्रस्तुतं प्रकृतं ( गुरुदक्षिणारूपं ) आचचक्षे ( अकथयत् ) ॥ १९ ॥

समासाः-विहितः अध्वरः येन बहु० । स्मयस्य आवेशः ष० त० । तेन विवर्जितः तृ० त० । वर्णाश्च आश्रमाश्च द्वन्द्व स० ।

विवृतिः—नृपस्य प्रश्नमाकर्ण्य विद्वान् ब्रह्मचारी स कौत्सो निजवाञ्छित तस्याग्रे प्रकटयामास । यतस्तेन दृष्ट यथाऽयं राजा सदाचारः । अनेन यज्ञसमयेऽगणिता

दक्षिणा दत्ताः। तथापि गर्वस्य गन्धोऽप्यस्मिन्न दृश्यते। सर्वेषा ब्राह्मणक्षत्रियविट्शूद्राणां ब्रह्मचारिगृहस्थवानप्रस्थसन्यासिनामयमेव सर्वाणि कर्माणि निर्वाहयति। तस्मान्ममापि कार्यमनेन क्रियते। इति विचार्य तेनोक्तम्॥ १९॥

## NOTES.

यथा + वति = यथावत्। वत् is added in the sense अर्ह proper by the sutra "तदर्हम्;' यथा अर्हति इति यथावत्. It must be connected with a verb. क्रियाचेत्। वि + धा + क्त= विहितः। अध्वानं राति अध्वरः रा + क। स्मि + अच् = स्मयः=गर्वः। आ + विश्+घञ्= आवेशः=प्रभावः। वि + वृज्-वृजी वर्जने 10th conj. to avoid + क्त = विवर्जितः = विरहितः। वि + चक्ष् + ल्यु = विचक्षणः learned. प्र + स्तु + क्त = प्रस्तुतं The subject matter-the object of his coming आ + चक्ष् – चक्षिङ् व्यक्तायां वाचि + लिट् to tell 2nd conj. Atm. present चष्टे, चक्षाते, चक्षते; Perfect चचक्षे, चख्ये, चख्यौ, चक्शे and चक्शौ.। वर्णाः ब्राह्मणादयः चत्वारः।आश्रमः ब्रह्मचर्यादयः चत्वारः। वर्ण takes the termination इनि in the sense of ब्रह्मचारिन्। "स वर्णिलिंगी विदितः समाययौ" किराते where also वर्णिन् means ब्रह्मचारिन् वर्णः प्रशस्तिः अस्य अस्ति इति वर्णी। स्मरणकीर्तनाद्यष्टविधमैथुनाभावः प्रशस्तिः। A real celibate never thinks of a girl even in his dreams. अनुप्रासोलंकारः as the verse has the repetition of व् in it.

Trans:-The learned celibate told his object to the ruler of castes and stages of life, who had performed the sacrifice according to scriptures and who was free from the influence of pride. 19.

---

**समाप्तविद्येन मया महर्षिर्विज्ञापितोऽभूद्गुरुदक्षिणायै।**
**स मे चिरायास्खलितोपचारां तां भक्तिमेवागणयत्पुरस्तात्॥२०॥**

अन्वयः—समाप्तविद्येन मया महर्षिः गुरुदक्षिणायै विज्ञापितः अभूत्। सः चिराय अस्खलितोपचारा तां मे भक्तिं एव पुरस्तात् अगणयत्॥ २०॥

## संजीविनी

समाप्तेति । समाप्तविद्येन मया महर्षिः गुरुदक्षिणायै गुरुदक्षिणास्वीकारार्थं विज्ञापितः अभूत् । सः च गुरुः चिराय अस्खलितोपचारां तां दुष्करां मे भक्तिं एव पुरस्तात् प्रथमं अगणयत् संख्यातवान् । भक्त्या एव सन्तुष्टः किं दक्षिणया इति उक्तवान् इत्यर्थः । अथ वा भक्तिं एव तां दक्षिणां अगणयत् इति योज्यम् ॥२०॥

समासाः—समाप्ताः विद्याः येन सः बहु० महान् ऋषिः कर्म० । गुरोः दक्षिणा ष० त० । न स्खलिताः अस्खलिताः नञ् । अस्खलिताः उपचाराः यस्यां सा बहु० ।

विवृतिः—राजन् यदा ममाध्ययनं परिपूर्णं संजातं तदा मयोक्तम् । भगवन् आचार्य, अध्यापनार्थं मया भवते किं नु दातव्यम् ? भवतोऽभिलाषः पूर्णः कर्तव्य इति ममेच्छा । सा तु पूरयितव्येति । तदाऽऽचार्यो विचिन्त्याब्रवीत् । वत्स, सतुरा खलु त्वयाऽहं सेवितः । सेवायां त्वया न कोऽपि प्रमादः कृतः । तस्मात् प्रसन्नोऽहं तां तव दीर्घकालकृतां परिचर्यामेव दक्षिणां पश्यामि । नास्ति किमप्यन्यन्मम मनसि इति ॥ २० ॥

## NOTES.

सम् + आप् ( आप्लृ व्याप्तौ ) to obtain + क्त । विद् ज्ञाने + क्यप् = विद्या shortened to विद्य at the end of a बहुव्रीहि, adjective to मया which is कर्तरि तृतीया । वि + ज्ञा अवबोधने to know + णिच् causal ( पुक् = प ) + क्त was begged. अभूत् aorist third person singular of भू सत्तायाम् । गृणाति हितं उपदिशति इति गुरुः or गिरति अज्ञानम् " स गुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति " आचार्यः गृ + कु उच्च । " चिराय चिररात्राय चिरस्याद्याश्चिरार्थकाः " चिर, चिरेण, चिरात् all indeclinables meaning for a long time. स्खल संचलने + क्त 1st conj. to slip स्खलति । उप + चर् + घञ् = उपचारः = सेवा । गण् संख्याने to count 10th conj. P. A. अगणयत् Imperfect. पूर्व + अस्ताति ( पुरादेशः ) = अग्रतः Ind.= at first = पुरस्तात् ।

Translate:-The great sage was humbly asked regarding the tutorial honorarium by me when I finished my course of studies. He at first or already looked

upon my loving devotion of long standing and of unfailing operation as the only remuneration. 20

---

**निर्बन्धसंजातरुषार्थकार्श्यमचिन्तयित्वा गुरुणाहमुक्तः ।**
**वित्तस्य विद्यापरिसंख्यया मे कोटीश्चतस्रो दश चाहरेति ॥ २१ ॥**

अन्वयः—निर्बन्ध संजातरुषा गुरुणा अर्थकार्श्यं अचिन्तयित्वा अहं वित्तस्य चतस्रः दश च कोटीः मे आहर इति विद्या परिसंख्यया उक्तः ॥ २१ ॥

## संजीविनी

निर्बन्धेति । निर्बन्धेन प्रार्थनातिशयेन सज तरुषा सजातक्रोधेन गुरुणा । अर्थकार्श्यं दारिद्र्य अचिन्तयित्वा अविचार्य अहम् । वित्तस्य धनस्य चतस्रः दश च कोटीः चतुर्दशकोटीः मे मह्य आहर आनय इति विद्यापरिसंख्यया विद्यापरिसंख्यानुसारेण एव उक्तः । अत्र मनुः– " अगानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः । पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश " इति ॥ २१ ॥

समासाः—निर्बन्धेन सजाता तृ० त० । निर्बन्धसंजाता रुट् यस्य तेन बहु० । अर्थस्य कार्श्यं ष० त० । न चिन्तयित्वा नञ् । विद्याना परिसंख्या ष० त० ।

विवृतिः—यद्यपि गुरु नाह किमपीच्छामीत्युक्तवांस्तथापि तस्य पुनः पुनरहं तामेव प्रार्थनाकृतवान् । तदा तेन तस्य क्रोधः समुत्पन्नः । अहं दरिद्र इति तेन न विचारितम् । स आह मया त्व वेदवेदागादिचतुर्दशविद्या अध्यापितः । अत एव चतुर्दशशतलक्षमितसंख्याक धन मह्य देहीति ॥ २१ ॥

## NOTES.

निर् + बन्ध् + घञ् = निर्बन्धः = आग्रहः Importunity. सम् + जन् + क्त – संजातः = उत्पन्नः । रुष् + क्विप् = रुष् = क्रोधः । It is feminine रुट् – रुषौ – रुषः etc. कृश् + क्त = कृश = अल्प । कृशस्य भावः कार्श्यम् ष्यञ् प्रत्ययः । वच् + क्त = उक्तः । गुरुणा अह उक्तः Passive, गुरुः मी – मां उक्तवान् active. वित्त = धनम् । विद् to get 6th conj. + क्त = वित्त when it means wealth, otherwise विन्न । " वित्तो " भोगप्रत्यययोः " भोग्ये प्रतीते च अर्थे । आहर Imperative 2nd pers. sing. of हृ – हृञ् हरणे with आ meanings to bring. Remember the different meanings of इति with exam-

ples. See Guide. Decline चतुर, दृश् and दश in all cases. Fourteen विद्याs are given before.

Translate:-Enraged at my importunities the preceptor heedless to the scantiness of my means said, " bring me four and ten crores of money in accordance with the number of lores. 21

---

**सोऽहं सपर्याविधिभाजनेन मत्वा भवन्तं प्रभुशब्दशेषम् ।**
**अभ्युत्सहे संप्रति नोपरोद्धुमल्पेतरत्वाच्छ्रुतनिष्क्रयस्य ॥ २२ ॥**

*अन्वयः*— सः अहं सपर्याविधिभाजनेन भवन्तं प्रभुशब्दशेषं मत्वा श्रुतनिष्क्रयस्य अल्पेतरत्वात् संप्रति उपरोद्धुं न अभ्युत्सहे ॥ २२ ॥

## संजीविनी.

सः इति । सः अहं सपर्याविधिभाजनेन अर्ध्यपात्रेण भवन्तं प्रभुशब्द एव शेषः यस्य तं मत्वा निःस्वं निश्चित्य इत्यर्थः । श्रुतनिष्क्रयस्य विद्यामूल्यस्य अल्पेतरत्वात् अतिमहत्त्वात् संप्रति उपरोद्धुं निर्बन्धुं न अभ्युत्सहे ॥ २२ ॥

समासाः-- सपर्यायाः विधिः ष० त० । सपर्याविधेः भाजनं ष० त० [ प्रभुः एव शब्दः कर्म० । प्रभुशब्दः शेषः यस्य बहु० । अल्पात् इतरत् अल्पेतरम् प० त० । श्रुतस्य निष्क्रयः ष० त० ।

*विवृतिः*—ऐक्ष्वाक, तद्धनसंपादनार्थमागतोऽहमत्र । किन्तु भवतो मृण्मयपूजापात्रं स्पष्टं सूचयति यथा राज्ञोऽपि भवतो वित्तं न विद्यते । विद्यामूल्यं तावदतिमहदस्ति । अत एवान्यत्र गच्छामि । किमर्थमधुना भवन्तं प्रार्थये ॥ २२ ॥

## NOTES.

सोऽहम् । The visarga of सः and एषः is dropped except before अ. So here it is changed to उ which, with the preceding अ is changed to ओ, and the following अ is substituted by अवग्रह. सपर्या = पूजा, नमस्या, अपचिति, सपर्या, अर्च्चा, अर्हणाः समाः । सपर + यक् + अ + टाप् । वि + धा + कि = विधिः rite. भाज्यते अनेन इति भाजनम् । भाज् + ल्युट् (अन). 'युवोरनाकौ" यु and वु in terminations are changed to अन and अक ।

मन् + क्त्वा = मत्वा absolutive. अभि + उत् + सह + लट् present tense. षहमर्षणे to bear. सहते । सम् + प्रति अव्ययम् ( समाहारद्वन्द्वः ) । उप् + रुध् – रुधिर् आवरणे to obstruct 7th conj. P. A. रुणद्धि – रुन्धे । श्रु + क्त = श्रुतम् नपुंसके भावे क्तः । निस् + क्री + अच् भावे = निष्क्रयः इन्द्रवज्रावृत्तम् as the first syllables of all the four feet are heavy : सो, म, अ and अ; म, अ and अ are heavy गुरु being followed by a conjunct.

Translate:— Concluding from the pot of the rite of worship that your Highness has had only the title of lord remaining to you, I, under these circumstances dare not press you just at present on account of the heaviness of the price of my learning. 22.

---

**इत्थं द्विजेन द्विजराजकान्तिरावेदितो वेदविदां वरेण ।**
**एनोनिवृत्तेन्द्रियवृत्तिरेनं जगाद भूयो जगदेकनाथः ॥ २३ ॥**

अन्वयः— द्विराजकान्तिः एनोनिवृत्तेन्द्रियवृत्तिः जगदेकनाथः वेदविदां वरेण द्विजेन इत्थं आवेदितः एनं भूयः जगाद ॥ २३ ॥

## संजीविनी.

इत्थं इति । द्विजराजकान्तिः चंद्रकान्तिः । " द्विजराजः शशधरो नक्षत्रेशः क्षपाकरः " । " हिमांशुश्चन्द्रमाश्चन्द्र इन्दुः कुमुदबान्धवः " । इत्यमरः । तस्मात् सोमो राजानो ब्राह्मणानाम् " इतिश्रुतेः । द्विराजकान्तित्वेन [ चन्द्रसमदीप्तित्वेन ] तदर्थावाप्तिवैराग्य वारयति । एनसः पापात् निवृत्ता इन्द्रियवृत्तिः यस्य सः । [ एतेन धार्मिकत्वम् ] जगदेकनाथः रघुः वेदविदां वरेण श्रेष्ठेन द्विजेन कौत्सेन इत्थं आवेदितः निवेदितः सन् एनं कौत्सं भूयः पुनः जगाद [ उवाच ] ॥ २३ ॥

समासाः— द्विः जायते इति द्विजः उपपद० । द्विजानाराजा ष० त० द्विजराजस्य कान्तिः इव कान्तिः यस्य सः बहु० । वेदान् वेत्ति इति वेदविद् उप० । एनसः निवृत्ता पंचमी त० । इन्द्रियाणां वृत्तिः ष० त० । एनोनिवृत्ता इन्द्रियवृत्तिः यस्य सः बहु० । एकः नाथः कर्म० । जगता एकनाथः ष० त० ।

विवृतिः— चन्द्रो यथा सूर्यात्तेजोगृहीत्वा विश्वं प्रकाशयति तथैव राजाऽपि

लोकेभ्य: कररूपेण धनं गृहीत्वाऽर्थिभ्योददाति । अत एव रघू राजा चन्द्रसमान-लक्ष्मीक: । पात्रायधन दातव्यम् । कौत्स: पुनराधिगतवेदशास्त्राणां श्रेष्ठस्तथाच ब्राह्मग: । तस्मात् तस्य याचितं पूरयितव्यम् । अथ तेन विदुषा विप्रेण प्रार्थितो धार्मिको जितेन्द्रियो रघु: पार्थिव: सार्वभौम: पुनस्तमुवाच ॥ २३ ॥

## NOTES.

इत्थं = अनेन प्रकारेण । इदं + थमु । अव्ययम् । " जन्मना जायते शूद्र: संस्कारैर्द्विज उच्यते । विद्यया याति विप्रत्वं त्रिभि: श्रोत्रिय उच्यते " इति स्मृति: । " दन्तविप्राण्डजा द्विजा: " । द्विजराज: राजन् at the end of a तत्पुरुष compound takes the augment टच् and is changed to राज to be declined like राम । कम् + क्तिन् = कान्ति: शोभाया दीप्तौ च । आ + विद् + णिच् ( causal ) क्त । वेद + विद् + क्वि । एनस् = पाप " कलुष वृजिनैनोघमंहोदुरित दुष्कृतम् " इति अमर: । इण् इ to go + असुन् ( नुट् ) = एनस् neu. नि + वृत् + क्त । इन्द्रियाs are eleven. श्रोत्रं त्वक् चक्षुषी जिव्हा नासिका चैव पचमी । पायूपस्थं हस्तपादं वाक् चैव दशमी स्मृता ॥ मनश्च । इन्द्र + घ = इन्द्रियम् + इन्द्रेणापि दुर्जयम् । वृत् + क्तिन् । जगाद third person singular of the perfect of गद् to speak व्यक्तायां वाचि । भूय: अव्ययम् । नाथति इति नाथ: ईश्वर: । नाथैक: or एकनाथ: । अनुप्रासालङ्कार: ।

Translate:—Thus informed by the twice-born, foremost among those versed in the Vedas, the sole lord of the world, fair as the moon – the lord of Brahmanas – and the functions of whose organs of sense and action were turned away from sin, again spoke to him. 23.

---

**गुर्वर्थमर्थी श्रुतपारदृश्वा रघो: सकाशादनवाप्य कामम् ।**
**गतो वदान्यान्तरमित्ययं मे मा भूत्परीवादनवावतार: ॥ २४ ॥**

अन्वय:—श्रुतपारदृश्वा गुर्वर्थं अर्थी रघो: सकाशात् कामं अनवाप्य वदान्यान्तरं गत: इत्ययं परीवादनवावतार: मे मा भूत् ॥ २४ ॥

## संजीविनी

गुर्वर्थ इति । श्रुतस्य पार दृष्टवान् श्रुतपारदृश्वा । "दृशेः क्वनिप्" इति क्वनिप् । गुर्वर्थं गुरुदक्षिणार्थं यथा तथा अर्थी याचकः । विशेषणद्वयेनापि अस्य अप्रत्याख्येयत्व आह । रघोः सकाशात् काम मनोरथं अनवाप्य अप्राप्य वदान्यान्तर दातन्तरं गतः । " स्युः वदान्यस्थूललक्ष्य दानशौण्डाः बहुप्रदे " इत्यमरः । इति एवरूपः अयं परीवादस्य अपवादस्य नवः नूतनः प्रथमः अवतारः आविर्भावः मा भुत् मा अस्तु । रघोः इति स्वनामग्रहण संभावितत्वद्योतनार्थम् । तथा च "संभावितस्य चाकीर्तिर्मरणादतिरिच्यते " इति भावः । [ अतः एव विधिः नाम अलकारः ] २४

समासाः—गुरोः अर्थः यस्मिन् कर्मणि यथा स्यात् तथा बहु० क्रियाविशेषणम् । श्रुतस्य पारं=श्रुतपारं ष० त० श्रुतपार दृष्टवान् इति श्रुतपारदृश्वा उपपद०। अथवा पारं दृष्टवान् and them श्रुतस्य पारदृश्वा । न अवाप्य अनवाप्य नञ् । अन्यः वदान्यः वदान्यान्तरम् " मयूरव्यंसकादित्वात् " नित्य समासः । नवः अवतारः कर्म० । परीवादस्य नवावतारः ष० त० ।

विवृतिः—कौत्सनामा ब्रह्मचारी श्रोत्रियो वेदवेदान्तनिपुणो निजाचार्यदक्षिणाकाङ्क्षया रघुराजमागत्य भिक्षां याचितवान् । रघुराजस्य तु किमपि नासीत् । अत एवापूरितमनोरथः स कीर्तिकलङ्क दत्वा यातवानित्येवरूप ममायशो न भवेदित्यहमिच्छामि । संभावितस्य मम रघोरकीर्तिर्मरणादतिरिच्यते ॥ २४ ॥

## NOTES.

पारः—र = तीर, पर एव पारं । पर + अण् or पृ + घञ् = पारः the opposite bank. दृश् + क्वनिप् = दृश्वा । कर्मणि भूते इत्येव । दृश् takes क्वनिप् i e. is changed to दृश्वन् only when it has its object with it, forms a compound with it and refers to a past time.

सकाशात् = समीपात् = अन्तिकात् । काशेन सह । कश् + घञ् । अनवाप्य = अन् + अव + आप् + ल्यप् absolutive. कम् + घञ् = कामः = मनोरथः । वद + अन्य = वदान्यः = भूरिदानशीलः । अन्यत्वद किं इच्छसि इति । परि + वद् + घञ् = परिवादः or परीवादः । नु + अच् :

नवः or नु + अप् = नवः । अव + तॄ + घञ् भावे = अवतारः = प्रादुर्भावः। मा अभूत् = अभूत् third pers. sing. aorist of भू; अ of अभूत् is dropped as it is connected with the prohibitive particle मा. " न माङ् योगे " अडाटौ न स्तः । मा भवान् भूत् । मास्म भवत् भूद्रा । श्रुत etc. and गुर्वर्थ अर्थी: these two adjectives indicate that the refusal will not do; he should be given what he – कौत्स – wants. रघोः Raghu mentions his own name to show that he is a respectable gentleman and so he will feel a blot on his name and fame more injurious than death. The quotation is from भगवद्गीता अध्याय II verse 34. नवावतारः shows that Raghu had never refused uptil then any thing to any one. cf. " न ह्यर्थिनः कार्यवशादुपेताः काकुत्स्थगोत्रे विमुखाः प्रयान्तिः । " Remember with reference to this thd lives of शिबि, हरिश्चन्द्र etc.

Translate:— Asking wealth for his preceptor, a cartain suitor who had mastered the vedas, not obtaining his desired object from Raghu went to another donor. Let there not be this new appearance of stigma about me. 24.

---

**सत्वं प्रशस्ते महिते मदीये वसंश्चतुर्थोऽग्निरिवाग्न्यागारे ।**
**द्वित्राण्यहान्यर्हसि सोढुमर्हन्यावद्यते साधयितुं त्वदर्थम् ॥ २५ ॥**

अन्वयः— स त्वं महिते प्रशस्ते मदीये अग्न्यगारे चतुर्थः अग्निः इव वसन् द्वित्राणि अहानि सोढुं अर्हसि । हे अर्हन् त्वदर्थं साधयितुं यावत् यते ॥ २५ ॥

## संजीविनी.

स इति । स त्व महिते पूजिते प्रशस्ते प्रसिद्धे मदीये अग्न्यगारे त्रेताग्निशालाया चतुर्थः अग्निः इव वसन् द्वित्राणि द्वे त्रीणि वा अहानि दिनानि । "संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये " इति बहुव्रीहिः । " बहुव्रीहौ संख्येये डच अबहुगणात् " इति डच प्रत्ययः समासान्तः । सोढुं अर्हसि । हे अर्हन् मान्य त्वदर्थं

तव प्रयोजनं साधयितुं यावत् यते यतिष्ये । " यावत् पुरानिपातयोर्लट् " इति भविष्यदर्थे लट् ॥ २५ ॥

समासाः-- अग्नेः अगारम् प० त० । द्वे वा त्रीणि वा द्वित्राणि बहु० । तव अर्थः त्वदर्थः तम् ष० त० ।

विवृतिः— हे लोकमान्य मुने, अद्ययावदहं न ददामीति किमपि नावोचम् । अत एव भवता न गन्तव्यम् । कतिचिद्दिनानि मम यज्ञशालायां भवताः स्थातव्यम् । दक्षिणा ग्निगार्हपत्याहवनीयास्त्रयोऽग्नय इव भवानपि पूज्यः । अतिमहती मनोहरा पूजिता च मम होमशाला । अन्तरे भवदर्थं धनं प्राप्तुमहमुद्योक्ष्ये ॥२५॥

## NOTES.

प्र + शस् + क्त = प्रशस्त । मह् पूजायां + क्त = महित । अस्मत् + छ = मदीय in the singular and अस्मदीय in the plural. ( मद् is a form of अस्मत् used in the singular in the beginning of a compound or before a termination मत्प्रियं, मच्चित्त etc. वस् to dwell + शतृ – अत् pres. parti. paras वसत् वस् निवासे. 1st conj. Paras. वसति pre, उवास perf, वत्स्यति fu, उष्यात् Bene, अवात्सीत् aor, उष्यते pas, वासयते caus, विवत्स्यति desi, वस्तव्यम् Pote. Pas. Parti, उषितः P. P. P., उषित्वा abso, चतुर्थ = चतुर्णां पूरणः = तुर्यः or तुरीयः । चतुर् + डट् + थुक् । " तस्य पूरणे डट् " " षट् कतिकतिपय चतुरां थुक्." षष्ठः, कतिथः and कतिपयथः । अगारम् a house अगं न गच्छन्तं ऋच्छति प्राप्नोति इति अग + ऋ + अण् । द्वि + त्रि + डच् = द्वित्राणि. The sutra संख्यया etc. means an indiclinable ( अव्यय ), आसन्न, अदूर, अधिक and a numeral can be compounded with a numeral in the sense of a numeral and the compound so formed is a बहु०; and डच् ( अ ) is the augment added to such a compound but not to those ending in बहु and गण. उपदशाः, आसन्नविंशाः, अदूरत्रिंशाः, अधिकचत्वारिंशाः, द्वित्राः, द्विदशाः but उपबहवः and उपगणाः । When a termination has ड् in it as in डच्, the टि i. e. *final* vowel or final consonant with the pre-

ceding vowel is dropped. द्विव्रि has its टि. i. e. इ dropped before डच् and अ in डच् added. अह्न् a day. षह्-सह्-मर्षणे + तुमुन् = सहितुम् or सोढुम् Infinitive. सहित्वा or सोढ्वा absolutive अर्हन् अर्ह + शतृ pre. parti. in the sense of praise "अर्ह प्रशसायाम्" त्वदर्थम् = त्वद् is to be explained like मद् "यावत्–" यावत् and पुरा used with a verb in the present give the sense of the future. उपमालंकार: ।

Translate:— Under these circumstances it becomes you, O revered sage, to live like a fourth fire-god in my well-known and honoured house of fire for two or three days and wait there while I try to accomplish your object. 25.

---

**तथेति तस्यावितथं प्रतीतः प्रत्यगृहीत्संगरमग्रजन्मा ।**
**गामात्तसारां रघुरप्यवेक्ष्य निष्क्रष्टुमर्थं चकमे कुबेरात् ॥ २६ ॥**

अन्वय:— अग्रजन्मा प्रतीत: तस्य अवितथ सगर तथा इति प्रत्यगृहीत् । रघु: अपि गां आत्तसारा अवेक्ष्य कुबेरात् अर्थ निष्क्रष्टुं चकमे ॥ २६ ॥

## संजीविनी.

तथेति इति । अग्रजन्मा ब्राह्मण: प्रतीत: प्रीत: सन् तस्य रघो: अवितथं अमोघ सगरं प्रतिज्ञाम् । "अथ प्रतिज्ञाजिसंविदापत्सु सगर:" इत्यमर: । तथा इति प्रत्यग्रहीत् । रघु: अपि गां भूमिं आत्तसारा गृहीतधना अवेक्ष्य कुबेरात् अर्थं निष्क्रष्टु आहर्तु चकमे इयेष ॥ २६ ॥

समासा:— न वितथ: अवितथ: नञ । अग्रेजन्म यस्य स: बहु० । अग्रात् मुखात् जन्म यस्य "ब्राह्मणोऽस्य मुखमासीत्" । आत्त: सार: यस्या: ताम् बहु० ।

विवृति:— रघोर्भाषणमाकर्ण्य ब्राह्मणस्य कौत्सस्यानन्द: सजात: । ओमित्युक्त्वा स यज्ञगृहे न्यवसत् । सत्यप्रतिज्ञोरघुर्ममाभीष्ट पूरयेदिति तस्य विश्वास आसीत् । जगत्या धन न विद्यत इति रघुणा ज्ञातमासीत् । अत एव स धनाधिपराजधानीमभिप्रयातुं निश्चिकाय ॥ २६ ॥

## NOTES.

तथेति means ‘ yes ’ अथ किम्, बाढम् and ओम् also mean ‘ yes. ’ वितथं false. वि + तन् + क्थत् । अवितथं true = सत्यम् । or तथा true वितथ untrue – अवितथ not untrue = true. प्रति ् इ ् क्त = प्रतीतः । प्रत्यग्रहीत् aorist form. संगरः means promise, battle, agreement and calamity. गो means a cow or a bull , the sky, stars, a ray of light, the heaven, arrow, diamond, speech, saraswati organ of sense, the earth, the sun and the moon. गम् + डो करणे – गच्छति अनेन । आत्त or आदत्त = आ + दा + क्त । सारः means essens or strength. कृष् विलेखने 1st conj. [ कृष् 6th conj Infinitive is कर्ष्टुम् or क्रष्टुम् ] Here it belongs to 1st conj. meaning to draw निष्क्रष्टुम् to extort चकमे Perfect लिट् of कम् ( कमु कान्तौ ) 1st conj. At. कामयते । Optional forms of perfect are कामयाचक्रे – याबभूव – यामास; अचीकमत – अचकमत aorist ; कामयित्वा, कमित्वा and कान्त्वा absolutive. कुबेर ( कुत्सितं वेर शरीर यस्य सः ) The god of riches and treasure and the regent of the North, the lord of कैलास, son of विश्रवस् by इड्विद् and the half brother of रावण, a friend of रुद्र and the king of यक्षकिन्नर. Deformed in body having three legs, eight teeth and a yellow mark in place of one eye. Apate's dictionary.

Translate:— With the words “ so be it ” the first amongst the born – the Brahman – being pleased accepted his infallible promise; Raghu, on his part, seeing the earth with its treasure drained, wished to extort money from Kubera. 26.

**वसिष्ठमन्त्रोक्षणजात्प्रभावादुदन्वदाकाशमहीधरेषु ।**
**मरुत्सखस्येव बलाहकस्य गतिर्विजघ्ने न हि तद्रथस्य ॥ २७ ॥**

अन्वयः—वसिष्ठमन्त्रोक्षणजात् प्रभावात् उदन्वदाकाशमहीधरेषु मरुत्सखस्य बलाहकस्य इव तद्रथस्य गतिः न विजघ्ने हि ॥ २७ ॥

## संजीविनी

वसिष्ठेति । वसिष्ठस्य यत् मन्त्रेण उक्षणं अभिमन्त्र्य प्रोक्षणं तज्जात् प्रभावात् सामर्थ्यात् हेतोः [ पंचमी ] उदन्वदाकाशमहीधरेषु उदन्वति उदधौ आकाशे महीधरेषु वा । मरुत्सखस्य मरुतः सखा इति तत्पुरुषः । बहुव्रीहौ समासान्ताभावात् । ततः वायुसहायस्य इति लभ्यते । वारिणा वाहको बलाहकः । पृषोदरादित्वात् साधुः । तस्य इव मेघस्य इव तद्रथस्य गतिः सचारः न विजघ्ने न विहता हि ॥ २७ ॥

समासाः—वसिष्ठस्य मन्त्रः ष० त० । तेन उक्षणम् तृ० त० । तस्मात् जातः उपपद० । उदन्वान् च आकाशः च महीधरः च उद० धराः द्वंद्व० । महीं धारयति इति महीधरः उप० । मरुतः सखा मरुत्सखः ष० त० । तस्य रथः ष० त० । प्रकृष्टः भावः प्रभावः प्रादि स० ।

विवृतिः—राज्याभिषेककाले वसिष्ठेन महर्षिणा जलमभिमन्त्र्य वैदिकसूक्तानि पठित्वा रघोर्मस्तकस्योपरि तस्य सेचनं कृतम् । तस्य चैतत्सामर्थ्यमासीद्यथा तस्य स्यन्दनः समुद्रे वियति पर्वते वा यत्र कुत्रापि चरितुं शक्तः सञ्जातः । वायुर्यस्य साहाय्यं करोति स मेघो यथा सर्वत्र गन्तुं शक्नोति तथैव मन्त्रो यस्य सहायभूतोऽस्ति सोऽपि सर्वत्र यातुं क्षमो भवति ॥ २७ ॥

## NOTES.

वसिष्ठ is one of the seven sages सप्तर्षिs and one of the ten creators. " कश्यपोऽत्रिर्भरद्वाजो विश्वामित्रोऽथ गौतमः । जमदग्निर्वसिष्ठश्च साध्वी चैवाप्यरुन्धती " These are the seven sages. His wife is अरुन्धती । He is the seer of the 7th मंडल of ऋग्वेद and the preceptor of इक्ष्वाकु family. मन्त्र् + अच् = मन्त्रः a vedic hymn or a sacred prayer addressed to a deity. उक्षणम् = उक्ष् सेचने to sprinkle 1st conj. paras. + ल्युट् । जन् + ड = जः । भू + घञ् = भावः । प्र + भावः । भू preceded by a

preposition cannot take घञ् which forms भाव from भू. " श्रिणीभुवोऽनुपसर्गे." प्रभावात् हेतौ पंचमी । " उदन्वान् उदधौ च " उदकस्य उदन्भावो निपात्यते मतौ प्रत्यये उदधौ अर्थे संज्ञाया च । उदक + मतुप् = उदन्वान् which means the ocean and a sage named उदन्वान् । मही + धृ + अच् = महीधरः । मरुत् सखः सखि takes the समासान्त augment टच् i. e. is changed सख when at the end of a तत्पुरुष compound. " राजाहः सखिभ्यः टच " e. g. महाराजः, एकाह and मरुत्सखः; this augment does not come after a बहु० । It is is an adjective to बलाहकस्य meaning helped by wind. मरुत् = मृ + उति = wind. बलाहकः irregular meaning a cloud, to be explained ( साधुः ) on the analogy of पृषोदर for पृषदुदर.

भवेद्वर्णागमात् हंसः सिंहोवर्णविपर्ययात् ।
गूढोऽत्मा वर्णविकृतेः वर्णनाशात् पृषोदरम् ॥

गम् + क्तिन् + गतिः । विजघ्ने Third person singular of the perfect लिट् atm. of हन् with वि । हि इति निश्चये । " हि पादपूरणे हेतौ विशेषेप्यवधारणे. "

उपमालंकारः । उपेन्द्रवज्रावृत्तम्.

Translate:—On account of the influence produced by Vasishtha's sprinkling accompanied by vedic verses, the course of his chariot like that of a cloud helped by the wind was, indeed, not impeded in the sea, sky or on a mountain. 27

---

**अथाधिशिश्ये प्रयतः प्रदोषे रथं रघुः कल्पितशस्त्रगर्भम् ।**
**सामन्तसंभावनयैवधीरः कैलासनाथं तरसा जिगीषुः ॥ २८ ॥**

अन्वयः—अथ प्रदोषे प्रयतः धीरः रघुः सामन्तसंभावनयैव कैलासनाथ तरसा जिगीषुः कल्पित शस्त्रगर्भ रथ अधिशिश्ये ॥ २८ ॥

## संजीविनी

अथेति । अथ [ मंगलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ ] प्रदोषे रजनीमुखे । तत्काले यानाधिरोहणविधानात् । प्रयतः ( नियमयुक्तः पवित्रः ) धीरः ( स्थिरचित्तवृत्तिः ) रघुः । समन्तात् भवः सामन्तः । राजमात्रं इति संभावनया एव कैलासनाथं कुबेरं तरसा बलेन जिगीषुः जेतुं इच्छुः ( जिधातोः सन्नन्तात् उप्रत्ययः ) सन् कल्पितं सज्जितं शस्त्रं गर्भे ( मध्ये ) यस्य तं रथं ( स्यन्दनं ) अधिशिश्ये ( अधिष्ठितः ) रथे शयितवान् इत्यर्थः । " अधिशीङ्स्थासां कर्म " इति कर्मत्वम् ॥ २८ ॥

समासाः—प्रक्रान्ता दोषा रात्रिः अत्र काले इति प्रा० । कल्पितं शस्त्रं यस्मिन् सः बहु० । कल्पितशस्त्रः गर्भः यस्य बहु० । सामन्त इति संभावना मध्यमपदलोपी स० । कैलासस्य नाथः ष० त० ।

विवृतिः—सायंकाले यानाधिरोहणं कर्तव्यमिति विधिमनुसृत्य कौत्सवचनान्तरं जितेन्द्रियोयज्ञव्रतः स रघुः कुबेरनगराभिक्रमणेच्छया युद्धोपकरणयुक्ते रथ एव रात्रिमुखे स्थितः । तत्रैव निद्रितः । कुबेरस्तु यः कश्चिद्राजन्यः । तस्य पराभवं कर्तुं मम बलं विद्यत एवेति विचारस्तस्य मनस्यासीत् ॥ २८ ॥

## NOTES.

Remember the different meanings of अथ and एव with illustrations. See " Guide. " शीङ् atm. स्वप्ने to lie down, स्था and आस्, preceded by अधि, govern the accusative of the place where actions are done. अधिशिश्ये perfect लिट् । प्र + यम् उपरमे ( यच्छति ) + क्त । प्र + दुष + घञ् = प्रदोषः । धीरः धियं राति । धी + रा + क or धियं ईरयति ईर् + अण् or धी + क्रन् । कालिदास defines धीर thus in कुमार० " विकारहेतौ सति विक्रियन्ते येषां न चेतांसि त एव धीराः " Firm-minded. He explains the name रघु also in the 3rd canto 21 verse रघुवंश thus. " श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः । अवेक्ष्य धातोर्गमनार्थमर्थविच्चकार नाम्ना रघुमात्मसंभवम् ॥ कल्पित p. p. p. of क्लृप् 10th conj. or of the causal of कृप् सामर्थ्ये ( क्लृप् 1st conj. ) कल्पते atm. क्लृप् + णिच् + क्त । शस्त्र खड्गादौ = शस् + ष्ट्रन् ।

सामन्तः = समन्त + अण् = मांडलिकः । संभावना = सं + भू + णिच् + युच् + टाप् = ज्ञानम् । नाथ् + अच् = नाथः । तरसा instru. sing. of तरस् ( तॄ + असुन् ) = बलं neuter. अनुप्रासालंकारः.

Translate:— Then in the evening that devout and firmminded Raghu, desirous of conquering by force the Lord of Kailasa, regarding him merely as a feudatory prince laid himself down in his chariot with weapons arranged in its interior. 28

---

**प्रातः प्रयाणाभिमुखाय तस्मै सविस्मयाः कोषगृहे नियुक्ताः ।**
**हिरण्मयीं कोशगृहस्य मध्ये वृष्टिं शशंसुः पतितां नभस्तः ॥२९॥**

अन्वयः—प्रातः प्रयाणाभिमुखाय तस्मै कोषगृहे नियुक्ताः सविस्मयाः कोश-गृहस्य मध्ये नभस्तः पतितां हिरण्मयीं वृष्टिं शशंसुः ॥ २९ ॥

## संजीविनी

प्रातरिति । प्रातः ( उषसि ) प्रयाणाभिमुखाय ( प्रस्थानोद्यताय ) तस्मै रघवे कोषगृहे नियुक्ताः ( भाण्डारागारे ) अधिकृताः भाण्डागारिकाः सविस्मयाः ( साश्चर्याः ) सन्तः कोशगृहस्य मध्ये नभस्तः नभसः ( आकाशात् ) पंचम्या-स्तसिल् प्रत्ययः । पतितां ( स्रस्तां ) हिरण्मयीं सुवर्णमयीं " दाण्डिनायन " इत्यादिना निपातनात् साधुः । वृष्टिं ( आसारं ) शशंसुः कथयामासुः ( लिट परोक्षे ) ॥ २९ ॥

समासाः—अभिगतं मुखं यस्य स बहु० । प्रयाणस्य or प्रयाणे अभिमुखः ष० or स० त० । विस्मयेन सहिताः बहु० । कोषस्य गृहं ष० त० ।

विवृतिः—रघोर्निश्चयमधिगम्य भीतः कुबेरो द्वितीयदिने महति प्रत्यूष एव सुवर्णमुद्राणां वर्षणं भाण्डागारे चकार । तद्दर्शनाक्षिप्तहृदया आश्चर्यमूढा अधिकारिणो राजानमागत्य व्यज्ञापयन्यथा महाराज, न खलु प्रस्थानं कर्तव्यमधुना । यतोऽद्यैव भाण्डागारे गगनात् सुवर्णनाणकानां महानासारः संभूतः । जातं च निधिस्थानं काञ्चनपूर्णमिति ॥ २९ ॥

## NOTES

प्रातर् अव्ययम् । प्र + या + ल्युट् भावे । यान is changed to याण

on account of प्र = प्रयाणं march. तस्मै " क्रियया यमभिप्रैति स संप्रदानम् " इति संप्रदाने चतुर्थी । कोष: or कोश: See Notes on the first verse on कोषजातम् । गृहे अधिकरणे सप्तमी । नि + युज् + क्त = नियुक्ता: p. p. p. for हिरण्मयीम् see notes on वीतहिरण्मयत्वात् in the second verse. टित्वात् ङीप् । वि + स्मि + अच् = विस्मय: । मध्य = middle; the acc., instr., abl. and locative singulars are used adverbially; मध्ये in the centre. वृष् + क्तिन् = वृष्टि: । नभस् neuter + तसिल् in the sense of पञ्चमी; so नभस्त: indeclinable means " from the sky. " नभस:, नभं and नभस् mean the sky. नह्यते मेघै: that which is covered by the clouds. नह् + असुन्, ह् being changed to भ् । पत् + क्त = पतित + टाप् fe. p. p. p. शशंसु: third person, plural of the perfect लिट् of शंस् to tell, 1st conj. Paras. उदात्तालंकार: समृद्धिमद्वस्तुवर्णनात् ।

Translate:— In the morning when he was about to start, officers employed in the treasury, struck with wonder, reported to him the shower of gold fallen from heaven into the interior of the treasure-house.29

---

**तं भूपतिर्भासुरहेमराशिं लब्धं कुबेरादभियास्यमानात् ।**
**दिदेश कौत्साय समस्तमेव पादं सुमेरोरिव वज्रभिन्नम् ॥ ३० ॥**

अन्वय:—भूपति: अभियास्यमानात् कुबेरात् लब्धं वज्रभिन्नं सुमेरो: पादं इव तं भासुरं हेमराशिं समस्तमेव कौत्साय दिदेश ॥ ३० ॥

## संजीविनी

तमिति । भूपति: रघु: अभियास्यमानात् अभिगमिष्यमाणात् कुबेरात् लब्धं ( प्राप्तं ) वज्रेण कुलिशेन भिन्नं ( विदीर्णं ) सुमेरो: ( सुवर्णस्य मेरुपर्वतस्य ) पादं प्रत्यन्तपर्वतं इव स्थितम् । " पादा: प्रत्यन्तपर्वता: " इत्यमर: । तं भासुरं भास्वरं ( देदीप्यमानं ) " भञ्जभासमिदो घुरच् " इति घुरच् । हेमराशिं ( कांचनपुंजं )

समस्तं कृत्स्नं एव ( अयोगव्यवच्छेदे ) कौत्साय दिदेश ददौ । न तु चतुर्दशकोटिमात्र इति एवकारार्थः ॥ ३० ॥

समासाः—हेम्नः राशिः ष० त० । वज्रेण भिन्नम् तृ० त० ।

विवृतिः—कुबेरनगराभिक्रमणात् प्रागेव प्राप्तं कान्तं सुवर्णसमूहं दृष्ट्वा राजा रघुः प्रसन्नः संजातः । इन्द्रेण विदीर्णो मेरुपर्वतस्य खण्डो यथा राजते तथैव स काचनपुञ्जोऽशोभत । स किल नृपः कौत्सं यज्ञगृहादाहूय तस्मै नाणकानि प्रादर्शयत् । "ऋषे, गृहाण, तवैवैतद्धनम् । अपि सर्वमेतत् पर्याप्त स्यात्" इति चाब्रवीत् ॥ ३० ॥

## NOTES.

भूपतिः = पृथ्वीपालः = पा + डति = पातीति पतिः । भास् भासर्दीप्तौ + घुरच् = भासुर; भगुर and मेदुर from भंज् and मिद् । हि + मनिन् = हेमन् neuter. हेम also. राशिः अश् + इन् = अश्नुते व्याप्नोति इति । लभ् + क्त = लब्धम् । अभि + या + स्य + यक् + मुक् + शानच् अभियास्यमान is future parti. passive of या to go with अभि 2 conj. Par. दिदेश - perf. लिट् of दिश - अतिसर्जने - दाने to give 6 conj P. सम् + अस् + क्त = समस्त = सकलम् । पादः पद्यतेऽनेन—पद् + घञ् । सुमेरु - मेरु is a fabulous mountain of gold. It is probably the Attai range of mauntains where gold mines exist. Indra is said to have broken mountains and cut off their wings which formerly they had cf. पक्षच्छिदा गोत्रभिदात्तगंधाः रघु० XIII 7. उपमालंकारः

Transate:— The lord of the earth - Raguh - gave Kautsa just the whole of that shining gold - heap, obtained from Kubera about to be attacked and which resembled an adjoining hill of the Sumeru struck down by the thunderbolt. 30.

---

**जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ ।**
**गुरुप्रदेयाधिकनिःस्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ॥ ३१ ॥**

अन्वयः—गुरुप्रदेयाधिकनिःस्पृहः अर्थी अर्थिकामात् अधिकप्रदः नृपः च तौ द्वौ अपि साकेतनिवासिनः जनस्य अभिनन्द्यसत्वौ अभूताम् ॥ ३१ ॥

## संजीविनी

जनस्येति। तौ अर्थिदातारौ द्वौ अपि साकेतनिवासिनः। अयोध्यानिवासिनः "साकेतःस्यादयोध्यायां कोशला नन्दिनी च सा" इति यादवः। जनस्य अभिनन्द्यसत्वौ स्तुत्यव्यवसायौ अभूताम् (लुङ्) "द्रव्यासुव्यवसायेषु सत्वमस्त्री तु जन्तुषु" इत्यमरः। कौ द्वौ। गुरुप्रदेयात् अधिके अतिरिक्तद्रव्ये निःस्पृहः अर्थी। अर्थिकामात् अर्थिमनोरथात् अधिकं प्रददाति इति तथोक्तः। "प्रेदाज्ञः" इति कप्रत्ययः। नृपश्च ॥ ३१ ॥

समासाः—साकेते निवसति इति साकेतनिवासी उप० तस्य। अभिनन्द्यं सत्वं ययोः तौ बहु०। गुरवेप्रदेयम् चतु० त०। गुरुप्रदेयात् अधिकम् प०। निर्गता स्पृहा यस्य सः निःस्पृहः बहु०। गु० के निःस्पृहः स० त०। अर्थिनः कामः प० त०। अधिकं प्रददाति उप०।

विवृतिः—राजोवाच। ऋषे सकलमेव सुवर्णंगृहाण यद्यपि परिमितधनमेवाचार्याय भवता दातव्यम्। ऋषिस्तु प्रत्युवाच। राजन् नाहमिच्छामि धनं मदर्थं। किं मम वित्तेन। चतुर्दशकोटिसुवर्णनाणकान्येवोपाध्यायस्य कृतेऽहं गृह्णामि। उभावपि तौ कौत्सरघू उदारमनस्कौ स्तुत्यशीलौ च। तद् दृश्यदर्शनेनायोध्यिकानां लोकानां पुनराश्चर्यं सजातम्। ते च पौरास्तयोर्मुक्तकंठेन प्रशंसां चक्रुः ॥ ३१ ॥

## NOTES.

साकेत, अयोध्या etc. are synonyms. नि + वस् + णिनिः। Remember the declension of द्वि in all genders. अभि + नन्द्—टुनदि समृद्धौ—नन्दति + ण्यत् Poten. p. p. प्र + दा + यत् = प्रदेयम्। नॄन् पाति इति नृपः। पा + क = पः। उपपदसमासः। The 'प्रे दाज्ञः" means दा and ज्ञा roots with प्र preposition take the termi. क when they are conjoined to their objects. दाधातोः ज्ञा धातोश्च प्रोपसृष्टात् कर्मणि उपपदेकः स्यात् and not अण्; अणोऽपवादः। e. g. सर्वप्रदः, पथिप्रज्ञः। सत्वं = a thing, life, strength and a creature. अर्थः विद्यते अस्य इति अर्थी—अर्थ + इनिः।

Translate:— To the people living in Ayodhya both f them were equally praiseworthy in point of their conduct; the mendicant–the suitor–who-had no desire or more than what was to be given to the preceptor and the protector of men–the king-who was offering more than the desire of the suitor. 31

---

अथोष्ट्रवामीशतवाहितार्थं प्रजेश्वरं प्रीतमना महर्षिः ।
स्पृशन्करेणानतपूर्वकायं संप्रस्थितो वाचमुवाच कौत्सः ॥ ३२ ॥

अन्वयः—अथ प्रीतमनाः महर्षिः कौत्सः संप्रस्थितः ( सन् ) उष्ट्रवामीशतवाहितार्थं आनतपूर्वकायं प्रजेश्वरं करेण स्पृशन् वाचं उवाच ॥ ३२ ॥

## सञ्जीविनी

अथेति । अथ ( अनंतरं ) प्रीतमनाः ( प्रसन्नः ) महर्षिः कौत्सः संप्रस्थितः प्रस्थास्यमानः सन् " आशंसायां भूतवच्च " इति भविष्यदर्थेक्तः । उष्ट्राणां क्रमेलकानां वामीनां वडवानां च शतैः वाहितार्थं प्रापितधनं आनतपूर्वकायं विनयनम्रं इत्यर्थः । प्रजेश्वरं ( नृप ) रघु करेण ( हस्तेन् ) स्पृशन् ( परामृशन् ) वाचं उवाच [ अब्रवीत् ] ॥ ३२ ॥

समासाः—उष्ट्राश्च वाम्यश्च उष्ट्रवाम्यः द्वं० । तासां शतानि ष० । तैः वाहितः तृ० । उष्ट्रवा० हितः अर्थः येन तम् बहु० । प्रजानां ईश्वरः ष० । प्रीत मनः यस्य सः बहु० । महान् ऋषिः कर्म० । पूर्वं कायस्य स एकदेशितत्पुरुषस०। षष्ठीसमासस्य अपवादः । आनतः पूर्वकायः यस्य तं बहु० ।

विवृतिः—तदनन्तर सर्वं तद्धन वडवाक्रमेलकादिवाहनाना पृष्ठोपरि स्थापयित्वा राजा कौत्सस्य गृहाय प्रेषयामास । कौत्सो मुनिश्रेष्ठश्च प्रसन्नः संजातः । नृपस्तस्याग्रे नमस्कारं कृत्वा नम्रतया स्थितः । तदाऽऽशीर्वादप्रदानोत्सुको वर्णी स कौत्सस्तस्य शिरसि हस्तं कृत्वा बभाषे ॥ ३२ ॥

## NOTES.

शतम् neuter. उष् + ष्ट्रन् = उष्ट्रः । वाम + ङीप् + वामी + अश्वा mare. It also means शृगाली, रासभी and करभी । वह् + णिच् + क्त + वाहित p. p. p. of the causal of वह् to carry. " प्रजास्यात् संततौ जने. " प्र + जन् + ड + टाप्. प्रजायते इति । ईश् + वरच् = ईश्वरः ।

प्री + क्त = प्रीत । मन्यतेऽनेन इति मनः = मन् + असुन् = स्पृश् + शतृ = अत् = स्पृशत् pre. parti. कृ + अप् or अच् क्रियतेऽनेन इति करः It means a hand, ray, trunk, tax and हस्तनक्षत्र. । आ + नम् + क्त = आनत । पूर्वकायः, अपरकायः are तत्पुरुष Compounds. They are exceptions to षष्ठी त० । They mean the front part of the body and the back part. The sutra is: पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे. See Kale's grammar. Remember स्था with सम्, अव, प्र and वि is Atmanepadi. See "Guide" आशंसायां etc.; भविष्यति काले भूतवत् वर्तमानवत् च प्रत्ययाः वा स्युः आशंसायाम्; means "in the sense of desire or hope present or past can be used in the future sense; so here past is used in the sense of the future. Commentators declare वाचं उवाच as defective as the word वाच here is used without any adjective and as the sense could have been given by उवाच alone, वाचं is redundant. Had वाच been qualified, पुनरुक्तिदोष would not have been committed. शुचिस्मिता वाचं अवोचत् अच्युतः used in शिशुपालवध is right: वाचं उवाच कौत्सः is wrong. [ वाचं is the cognate object. cf. He ran a race. ].

Translate:--Then the great sage Kautsa, with his mind pleased, while starting, said [ the following ] words to the lord of people, touching him with his hand: him who had managed to convey the money on hundreds of camels and mares and who had bent the fore-part of his body. 32

---

**किमत्र चित्रं यदि कामसूर्भूर्वृत्ते स्थितस्याधिपतेः प्रजानाम् ।**
**अचिन्तनीयस्तु तव प्रभावो मनीषितं द्यौरपि येन दुग्धा ॥ ३३ ॥**

अन्वयः—वृत्ते स्थितस्य प्रजानां अधिपतेः भूः यदि कामसूः अत्र किं चित्रम्? येन द्यौः अपि मनीषितं दुग्धा ( तस्य ) तव प्रभावः तु अचिन्तनीयः ॥ ३३ ॥

## संजीविनी

किमिति । वृत्ते स्थितस्य [ सदाचारस्य ] " न्यायेनार्जनमर्थस्य वर्धनं पालनं तथा । सत्पात्रे प्रतिपत्तिश्च राजवृत्तं चतुर्विधम् " इति कामन्दकः । [ गुरोः पूजा घृणा शौच सत्यमिन्द्रियनिग्रहः । प्रवर्तनं हितानां च तत्सर्वं वृत्तमुच्यते ॥ ] तस्मिन् वृत्ते स्थितस्य प्रजानां अधिपतेः नृपस्य भूः कामान्सूते इति कामसूः [ मनोरथं पूरयित्री ] यदि । " सत्सूद्विषद्रुह " इत्यादिना क्विप् । अत्रकामप्रसवने किं चित्रम् । न चित्र इत्यर्थः । किंतु तव प्रभावः महिमा तु अचिन्तनीयः । येन त्वया द्यौः [ स्वर्गः ] अपि मनीषितं अभिलषितं दुग्धा । [ स्वर्गादपि धनं प्राप्तम् ] । दुहेः द्विकर्मकत्वात् अप्रधाने कर्मणि क्तः । " प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् । अप्रधाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः " इति स्मरणात् ॥ ३३ ॥

समासाः—कामान् सूते उप० । अधिकः पतिः प्रादि० । प्रकृष्टः भावः प्रा० ।

विवरणम्ः—राजन् तव सद्व्यवहारं दृष्ट्वा पृथ्वी त्वयि प्रसन्ना दृश्यते । अतः सा तव मनोरथं सदैव पूरयति । किं तु न किमप्याश्चर्य मस्मिन् विषये । यत्नेन त्वया स्वर्गस्था देवा अपि सन्तोषिताः । तस्मात्तेऽपि तवेच्छां पूरयन्ति । उक्तं च गीतायां भगवता । देवान् भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवप्स्यथ । कुबेरेण पुनः स्वर्गाद्या सुवर्णवृष्टिः कृता तत्र खलु तव सामर्थ्यमेव कारणम् । त्वं च लोकातिशयमहिमासि । न च संशयोऽत्र ॥ ३३ ॥

## NOTES.

काम + सू + क्विप् which is wholly dropped ; other examples are उपनिषद्, पक्षच्छिद्, गोत्रभिद्, प्रसूः, मित्रद्विट् प्रध्रुक्, वेदवित्, अग्रणीः etc. वृत् + क्त भावे = वृत्तम् । स्था + क्त = स्थित p. p. p. कामन्दकीयनीतिसारः is a work on politics and civics composed by कामन्दक in which राजवृत्त is given to be four-fold : To collect wealth by just means, to increase it justly, to reserve it and use it on useful works or to bestow it on worthy persons. चिन्त + अनीयर् poten. p. p. मनीषितं wish ईष् + अङ् = ईषा, मनसः = मनीषा. मनीषा + इतच् = मनीषित ।

द्यौ: nomi. sing. of द्यो or दिव् ' Prepare the declension. दुग्धा = दुह् प्रपूरणे 2nd conj. दोग्धि–दुग्धे । It takes two objects direct and indirect : the indirect object द्यां or दिवं ( अप्रधानकर्म ) is changed into the subject in the passive construction. See Apte's Guide.

Translate:— What wonder is there if the earth yields the desired objects or the desires of the ruler of people abiding by his duty? Inconceivable, however is your power inasmuch as even the heaven is made to yield your wishes by you. 33.

---

**आशास्यमन्यत्पुनरुक्तभूतं श्रेयांसि सर्वाण्यधिजग्मुषस्ते ।**
**पुत्रं लभस्वात्मगुणानुरूपं भवन्तमीड्यं भवतः पितेव ॥ ३४ ॥**

अन्वय:—सर्वाणि श्रेयांसि अधिजग्मुषः ते अन्यत् आशास्य पुनरुक्तभूतम् । ईड्य भवन्तं भवतः पिता इव आत्मगुणानुरूपं पुत्रं लभस्व ॥ ३४ ॥

## संजीविनी

आशास्यमिति । सर्वाणि श्रेयांसि शुभानि अधिजग्मुष. प्राप्तवतः ते तव [ शेषे इति सामान्यसंबंधे षष्ठी ] अन्यत् पुत्रातिरिक्तं आशास्यं आशीः साध्य आशसनीयं वा पुनरुक्तभूतम् । [ न आवश्यकम् ] सर्वं सिद्धं इत्यर्थः । किन्तु ईड्यं स्तुत्य भवन्त भवतः पिता इव आत्मगुणानुरूपं त्वयातुल्यगुण इत्यर्थः । पुत्रं [ सूनु ] लभस्व प्राप्नुहि [ लोट् ] ॥ ३४ ॥

समासा:—पुन: उक्तं पुनरुक्त सपा इति समासः । पुनरुक्तं भूत पु० तं सुपेति स० । आत्मनः गुणाः ष० त० । अनुगत रूप यस्य अनुरूपः बहु० । आत्मगुणानां अनुरूप: ष० त० ।

विवरणम्:—भवानाखिलैश्वर्यवान् । सकलप्रकारकं कल्याणं भवतो विद्यत एव । किमन्यदाशास्महे । भवतः पुत्रो नास्ति । भवत्तुल्यस्वभावमात्मजं प्राप्नुहि । यथा त्वं दिलीपस्य विविधसद्गुणोपेतः पुत्रस्तथैव तवापि वंशकरोऽद्वितीयस्तनयो जायते । अयमेवममाशीर्वादः ॥ ३४ ॥

## NOTES.

आ + शास् + ण्यत् । वच् + क्त भावे उक्त । भू + क्त: भूतम् पुनरुक्तभूतं means the same as पुनरुक्तम् । भूतं here is taken in the sense of इव as in मातृभूत:, showing उपमान; but it is not necessary. It means simply redundant, superfluous. अतिशयेन प्रशस्यं श्रेयस् प्रशस्य + इयसुन् श्रादेश: । अधि + गम् + क्वसु = अधिजग्मिवस् perfect parti. अधिजग्मुष: gen. sing. mas. adj. to ते । पुत्नाम्नो नरकात् त्रायते इति पुत्र: पुत् + त्रै + क । ईड् स्तुतौ to praise 2 conj. Atm. + ण्यत् Pote. P. P. praiseworthy पातिरक्षति इति पिता पा + तृच् = जनक: । उपमालंकार: । आशीर्वचन च । cf " पुत्रमेवगुणोपेतं चक्रवर्तिनमाप्नुहि " शाकुन्तल.

Translate:— Any other blessing would superfluous to you who have attained all blissful things. May you, therefore, obtain a son worthy of your qualities as your father obtained you, the praiseworthy one. 34

---

**इत्थं प्रयुज्याशिषमग्रजन्मा राज्ञे प्रतीयाय गुरो: सकाशम् ।**
**राजापि लेभे सुतमाशु तस्मादालोकमर्कादिव जीवलोक: ॥ ३५ ॥**

अन्वय:— अग्रजन्मा इत्थ राज्ञे आशिषं प्रयुज्य गुरो: सकाशं प्रतीयाय । राजापि जीवलोक: अर्कात् आलोकं इव तस्मात् आशु सुतं लेभे ॥ ३५ ॥

### संजीविनी ।

इत्थमिति । अग्रजन्मा ब्राह्मण: " अग्रजन्मा द्विजे ज्येष्ठे भ्रातरि ब्रह्मणि स्मृत: " इति विश्व: । इत्थ [ अनेन प्रकारेण ] राज्ञे [ संप्रदाने चतुर्थी ] आशिषं प्रयुज्य दत्वा गुरो: सकाशं समीपं प्रतीयाय प्राप [ इ धातो: लिट: प्रथमपुरुषस्यैकवचनम् ] राजापि । जीवलोक: जीवसमूह: " जीव: प्राणिनि गीष्पतौ " इति विश्व: । अर्कात् [ सूर्यात् ] [ अपादाने पंचमी ] आलोकं प्रकाशं इव [ यथा— उपमालंकार: ] तस्मात् ऋषे: आशु [ शीघ्र–अव्ययम् ] सुत लेभे प्राप [ लिट् ] ॥ ३५ ॥

समासा:— अग्रे जन्म यस्य व्यधिकरण बहु० । जीवानां लोक: ष० त० ।

विवरणम्:— स ब्राह्मणब्रह्मचारी कौत्सोऽनेन प्रकारेणाशीर्वादं दत्वा निजाचार्यस्य वरतन्तोर्गृहं जगाम । संसारो यथा सूर्योदयात् प्रकाशं प्राप्नोति तथैव रघुरपि कौत्सस्यागमनाद्धेतोस्तस्याशीर्वचनप्रभावाद्योग्यसमये पुत्रं प्राप ॥ ३५ ॥

## NOTES.

आ + शास् + क्विप इत्वम् शास् is changed शिस् पृषो दरादित्वात् । राजृ ( राज् ) दीप्तौ + कनिन् = राजन् । प्रति + इ + लिट् = प्रति इयाय perf. 3rd pers. sing. लेभे perf. सु ( षु ) प्रसवैश्वर्य यो. or षुञ् – स्तपनपीडनस्नानसुरासन्धानेषु + क्त = पुत्रः । आशुअश् + उण् = क्षिप्रम् adv. आ + लोक् + घञ् = आलोकः = उद्योतः । अर्च + घञ् = अर्कः अर्च्यते इति. जीव् + घञ् = जीवः । लोक्यतेऽसौ लोकः = लोक् + घञ् । तस्मात् cannot refer to द्विजात् as it would be quite absurd. न तु मुनेः ग्राम्यत्वात्. Therefore it should be taken to refer to आशीर्वादात्, आशिषः प्रयोगात् or प्रभावात् contained in आशिषः or प्रयुज्य. It cannot be taken to refer to आशिषः itself as it is femine.

Translate:— Having thus given a blessing to the King, the first - born - Brahmana - returned to his preceptor. The King too soon got a son through the power of the blessing as the world of the living gets light from the sun. 35.

---

**ब्राह्मे मुहूर्ते किल तस्य देवी कुमारकल्पं सुषुवे कुमारम् ।**
**अतःपिता ब्रह्मण एव नाम्ना तमात्मजन्मानमजं चकार ॥ ३६ ॥**

अन्वयः— तस्य देवी ब्राह्मे मुहूर्ते किल कुमारकल्पं कुमारं सुषुवे । अतः पिता ब्रह्मणः एव नाम्ना तं आत्मजन्मानं अज चकार ॥ ३६ ॥

## संजीविनी.

ब्राह्म इति । तस्य रघोः देवी महिषी ब्राह्मे " तस्य इदं " इति अण् । ब्रह्मदेवताके अभिजित् नामके मुहूर्ते किल [ इति लोकाः वदन्ति ] ईषदसमाप्तं कुमारं कुमारकल्पं स्कंदसदृशं " ईषदसमाप्तौ"–इत्यादिना कल्पम् प्रत्ययः । कुमारं पुत्रं

सुषुवे [ जनयामास ] " कुमारो बालके स्कन्दे " इति विश्वः । अतः ब्राह्ममुहूर्तोत्पन्नत्वात् पिता [ जनकः ] रघुः ब्रह्मणः विधेः एव [ अयोगव्यवच्छेदे ] नाम्ना [ अभिधानेन ] त आत्मजन्मान पुत्र अजं अजनामकं चकार [ विदधौ ] " अजो हरौ हरे कामे विधौ छागे रघोः सुते " इति विश्वः ॥ ३६॥

समासाः— आत्मनः जन्म यस्य व्यधिकरण बहु० । तम् । न जायते इति अजः तम् उपपद० अथवा सज्ञात्वात् न विग्रह। Being a proper noun it may not be dissolved.

विवरणम्:-- अथ काले गते दशमे मासे रघोर्महिषी मध्यन्दिनसमये स्कन्दसदृशमप्रतिरथं दिव्यं पुत्रमुत्पादयामास । ब्राह्ममुहूर्तोत्पन्नत्वात् कौत्सस्य ब्राह्मणस्याशीर्वादप्रभावजनितत्वाच्च रघुरपि त पुत्र " अजं " एव नामयामास । तस्याजं नाम चक्रे ॥ ३६ ॥

## NOTES.

ब्रह्मणः अयं ब्राह्मः । ब्रह्मन् + अण् । तस्येदं means belonging to that. ब्राह्मे मुहूर्ते – मुहूर्तः – any short portion of time and ब्राह्म presided over by Brahman. It is generally early dawn fit for studying. रात्रेः पश्चिमयामः । नाडिकाद्वयवाची मुहूर्तः 48 minutes. But here मल्लिनाथ says : ब्राह्मे मुहूर्ते = अभिजिन्नामके i. e. mid – day as नारद says : मध्यन्दिगते भानौ मुहूर्तोऽभिजिदाह्वयः । कुमारः = स्कन्दः, कार्तिकेयः, पार्वतीपुत्रः and बालः । कल्पप् termination is used in the sense of " a little less than" देश्य and देशीयर् also : as कुमारदेश्यः or कुमारदेशीयः, अ + जन् + ड = अजः means हरिः, शिवः, cupid, creator, goat and रघु's son.

Translate:—At a time presided over by Brahma – the creator–, they say, his queen gave birth to a son who was almost like Kartikeya–the son of God Shiva-Hence the father named that son of his अज after Brahma himself. 36.

**रूपं तदोजस्वि तदेव वीर्यं तदेव नैसर्गिकमुन्नतत्वम् ।**
**न कारणात्स्वाद्बिभिदे कुमारः प्रवर्तितो दीप इव प्रदीपात् ॥ ३७ ॥**

अन्वयः—ओजस्विरूपं तत्, वीर्यं तदेव, नैसर्गिकं उन्नतत्वं तदेव; कुमारः प्रवर्तितः दीपः प्रदीपात् इव स्वात् कारणात् न बिभिदे ॥ ३७ ॥

## संजीविनी

रूपमिति । ओजस्वि तेजस्वि बलिष्ठं वा । "ओजस्तेजसि धातूनामवष्टंभ प्रकाशयोः । ओजो बले च दीप्तौ च" इति विश्वः । रूपं वपुः "रूप स्वभावे सौन्दर्ये नाणके पशुशब्दयोः ग्रन्थावृत्तौ नाटकादौ आकार श्लोकयोरपि" इति विश्वः । तत् एव पैतृकं एव वीर्यं शौर्यं [ दाहकत्वं ] तत् एव नैसर्गिक स्वाभाविकं उन्नतत्वं [ उच्चैस्तरत्व–अधिकत्वं ] तत् एव तादृश एव इत्यर्थः । कुमारः बालकः प्रवर्तितः उत्पादितः दीपः प्रदीपात् स्वोत्पादकदीपात् इव स्वात् स्वकीयात् "पूर्वादिभ्यो नवभ्यो वा" इति स्माद्भावो वैकल्पिकः । कारणात् जनकात् न बिभिदे भिन्नः न अभूत् । सर्वात्मना तादृशः एव अभूत् इत्यर्थः ॥ ३७ ॥

समासाः—प्रकृष्टः दीपः प्रदीपः प्रादिसमासः ।

विवरणम्ः—अजो राजपुत्रो रघुराजसदृशः सर्वात्मनासीत् । यथैकस्माद्दीपात् प्रज्वालितोऽन्यो दीपस्तत्सदृश एवास्ति तथैव रघोरगादगात्प्रसृतोऽजो जनकतुल्य एव । तेजस्विशरीरेऽप्रतिमे शौर्ये स्वाभाविक उच्चत्वे सर्वेष्वेव गुणेषु तौ पिता-पुत्रौ समौ बभूवतुः ॥ ३७ ॥

## NOTES·

ओजस्वि–" अस् मायामेधास्रजोविनिः " Words ending in अस् take the possessive termi. विनि. उब्ज् + असुन् = ओजस्. It means lustre, metallic lustre, appearance, strength and light. रूप means nature, beauty, coin, beast, sound, frequent receitation, drama, form and verse. वीर + ष्यञ् वीर्यम् । निसर्गः ( सृज् + घञ् ) + ठक् = नैसर्गिक. उत् + नम् + क्त + त्व = उन्नतत्वम् । कृ + णिच् + ल्युट्करणे = कारणम् । पूर्व, अपर, अधर, स्व *etc. nine in all have optional forms in ablative and locative singulars:* पूर्वस्मात्-पूर्वात्, पूर्वस्मिन्–पूर्वे, स्वात्–स्वस्मात् । प्र + वृत् + णिच् + क्त = प्रवर्तितः । दीप् ( दीप्यते ) + अच् = दीपः or दीप् +

णिच् + अच् = दीपः । विभिदे = perf. of भिद् द्विधाकरणे 7th conj. P. A. उपमालंकारः

Translate:—The resplendent-majestic-form the same, the valour the same, the natural tallness the self same. The prince did not differ from his generating cause just as a lamp lighted from another lamp does not differ from that another lamp. 37

---

**उपात्तविद्यं विधिवद्गुरुभ्यस्तं यौवनोद्भेदविशेषकान्तम् ।**
**श्रीः साभिलाषापि गुरोरनुज्ञां धीरेव कन्या पितुराचकाङ्क्ष ॥३८॥**

अन्वयः–गुरुभ्यः विधिवत् उपात्तविद्यं यौवनोद्भेदविशेषकान्तं त साभिलाषापि श्रीः धीरा कन्या पितुः इव गुरोः अनुज्ञा आचकाङ्क्ष ॥ ३८ ॥

## संजीविनी.

उपात्तेति । गुरुभ्यः [ आचार्येभ्यः ] विधिवत् यथाशास्त्र उपात्तविद्यं लब्धविद्यं [ अधिगतसकलशास्त्रं ] यौवनस्य [ तारुण्यस्य ] उद्भेदात् आविर्भावात् हेतोः विशेषेण [ अतिशयेन ] कान्तं सौम्य [ मनोज्ञं ] त अजं प्रति साभिलाषा [ साकांक्षा ] अपि धीरा स्थिरा उन्नतचित्ता । " स्थिरा चित्तोन्नतिर्यातु तद्धैर्यमिति संज्ञितम् " इति भूपालः । कन्या । [दुहिता] पितुः [ जनकस्य ] इव गुरोः अनुज्ञा [ अनुमतिं ] आचकाङ्क्ष इयेष । यौवराज्यार्हः अभूत् इत्यर्थः । अनुज्ञाशब्दात् पितृपारतन्त्र्यं उपमासामर्थ्यात् पाणिग्रहणयोग्यता च ध्वन्यते ॥३८॥

समासाः—उपात्ताः विद्याः येन तं बहु० । यौवनस्य उद्भेदः ष० त० । विशेषेण कान्तः तं तृ० त० । यौ० त् वि० न्तं पं० त० । अभिलाषेण सहिता बहु० ।

विवरणम्:—मानवधर्मशास्त्रानुसारेण रघुराजो निजपुत्रमजं बहुभिराचार्यैः सकलाः कलाः सर्वाणि शास्त्राणि चाध्यापयामास । इदानीं तावदजस्तरुणः सजातः अत एव च सोऽतिशयेन रराज । राज्यलक्ष्मीस्तं वरितुमुद्युक्ताभवत् । तस्मिन् स्निग्धा सा रघोरनुमतिं प्राप्तुमि येष यथा खलु कुलीना बालिका निजकामानुसारिणं तरुणं प्राप्तुं जनकस्यानुमतिं गृह्णाति । अजः किलाधुना शास्त्रपारंगतो यौवराज्यार्होऽभवत् ॥ ३८ ॥

## NOTES.

गुरुभ्यः " आख्यातोपयोगे " पंचमी । उप + आ + दा + क्त = उपात्त- यूनः भावः यौवनं = युवन् + अण् । वि + धा + कि + वत् = विधिवत् । वि + शिष् + घञ् । भिद् + घञ् = उद्भेदः – विशेषः । कम + क्त = कान्तः । श्रि + क्विप् = श्री । अभि + लष् + घञ् = अभिलाषः । अनु + ज्ञा + अङ् । कन्या + अनूढाकुमारी a girl not married. आचकांक्ष Perf. of कांक्ष् to desire. उपमा is quite appropriate. अज now was no longer a small boy, he became a youth and of an age when he should be made a crown-prince. Prepare the declension of श्री, पितृ and युवन्.

Translate:—Royalty, though in love with the Prince who had received education duly from preceptors and who appeared specially handsome on account of his budding youth, desired or rather waited for the permission of his father as a discreet girl waits for that of her and his father ( for being united with him in marriage ). 38

---

**अथेश्वरेण क्रथकैशिकानां स्वयंवरार्थं स्वसुरिन्दुमत्याः ।**
**आप्तः कुमारानयनोत्सुकेन भोजेन दूतो रघवे विसृष्टः ॥ ३९ ॥**

अन्वयः— अथ स्वसुः इन्दुमत्याः स्वयंवरार्थं कुमारानयनोत्सुकेन क्रथकैशिकानां ईश्वरेण भोजेन आप्तः दूतः रघवे विसृष्टः ॥ ३९ ॥

## संजीविनी

अथेति । अथ [ तस्मिन्नेव काले ] स्वसुः भगिन्याः इन्दुमत्याः स्वयंवरार्थं [ विवाहार्थं ] कुमारस्य [ राजपुत्रस्य ] अजस्य आनयने [ आहरणे ] उत्सुकेन [ उत्कण्ठितेन ] क्रथकैशिकानां विदर्भदेशानां ईश्वरेण स्वामिना भोजेन राज्ञा आप्तः हितः [ स्वकीयः संबन्धी ] दूतः [ निवेदयिता ] रघवे विसृष्टः प्रेषितः । क्रियामात्रयोगेऽपि चतुर्थी ॥ ३९ ॥

समासाः— स्वयं वरः सहसुपा इति सुमासः । स्वयंवराय इति स्व० र्थं नित्य-

समासाः or स्वयंवरः अर्थः यस्मिम् कर्मणि यथा तथा बहु० । कुमारस्य आनयन ष० त० तस्मिन् उत्सुकः स० त० ।

विवृतिः— तस्मिन् समये विदर्भदेशे राजकुमार्या इन्दुमत्याः स्वयवरो गान्धर्वविवाह आसीत् । तस्मिन्महोत्सवे भोजराजेन सर्वे राजपुत्रा आहूताः । तेनं प्रेषितस्तस्यकोऽपि सुहृदयोध्यायां रघोः प्रासादमागतः । तेन च राज्ञे निवेदितं यथा विदर्भो राजपुत्रमजमपि स्वयवरसभायां द्रष्टुमुत्कण्ठतेऽत एवाजस्तत्र प्रेषणीय इति ॥ ३९ ॥

## NOTES.

ईश्वरेण कर्तरि तृतीया । क्रथकैशिक or विदर्भ is the modern Berar. स्वयवर is a form of गान्धर्वविवाह wherein the bride with a garland of flowers in her hand comes to the assembly of princes and chooses him for her groom with whom she falls in love. The princes are introduced to her by her friend who moves slowly with her. This is described by Kalidasa in the sixth canto of Raghuwansha. आप् + क्त = आप्तः यथार्थवक्ता. आ + नी ( णीञ् प्रापणे ) + ल्युट् भावे । उत् + सू + क्विप् + कन् ह्रस्वत्वंच । वि + सृज् + क्तः + विसृष्टः । दु + क्त दीर्घत्वं च + दूतः = संदेशहारकः । रघवे is to be accounted for by क्रियया यमभिप्रैति सोऽपि संप्रदानम् । The person with whom one connects himself through some action also becomes a संप्रदान and is put in the dative.

Translate:—Juss at that time Bhoja, the lord of क्रथकैशिक–Berar, being eagerly desirous of bringing the prince for the self-electing marriage of his sister Indumati; sent a faithful messenger to Raghu. 39

---

**तं श्लाघ्यसंबंधमसौ विचिन्त्य दारक्रियायोग्यदशं च पुत्रम् ।**
**प्रस्थापयामास ससैन्यमेनमृद्धां विदर्भाधिपराजधानीम् ॥ ४० ॥**

अन्वयः—असौ तं श्लाघ्यसंबंधं विचिन्त्य पुत्रं च दारक्रियायोग्यदशं विचिन्त्य ससैन्यं एन ऋद्धां विदर्भाधिपराजधानीं प्रस्थापयामास ॥ ४० ॥

## संजीविनी.

तामिति । असौ [ स ] रघुः त भोजं [ शुद्धकुलोत्पन्नत्वेन ] श्लाघ्यसंबंधं अनूचानत्वादिगुणयोगात् स्पृहणीयसबंधं विचिन्त्य विचार्य पुत्रं [ सूनुं ] च दारक्रियायोग्यदशं विवाहयोग्यवयसं विचिन्त्य [ विलोक्य ] ससैन्य [ वाहिनीसहितं ] एन पुत्र अजं ऋद्धा समृद्धा विदर्भाधिपस्य भोजस्य राजधानीं पुरीं प्रति प्रस्थापयामास । धीयते अस्या इति धानी । " करणाधिकरणयोश्च " इति अधिकरणे ल्युट्प्रत्ययः । राज्ञा धानी इति विग्रहः ॥ ४० ॥

समासाः--श्लाघ्यः संबंधः यस्य तं बहु० । दाराणा क्रिया ष० त० । दा० यायाः or यै योग्या ष० or च० त० । दा० ग्या दशा यस्य तं बहु० । सैन्येन सहित बहु० विदर्भाणा अधिपः ष० त० अधिकं पाति उपपद० राज्ञा धानी ष० त० । वि० पस्य रा० ना० ताम् ष० त० ।

विवृतिः—भोजप्रहितो दूत आगत्य रघवे स्वयंवरवार्ता कथितवान् । रघुरपि भोजस्य शुद्धवंश तथा चाजस्य विवाहोचित वयो दृष्ट्वा चमूसहितं तं निजतनयं भोजराजस्य पुरीं प्रति प्रेषयामास ॥ ४० ॥

## NOTES.

श्लाघ् कत्थने to praise श्लाघते + यत् Potential Pas. Part. श्लाघ्यम् । सबधः = ससर्गः, समागमः सम् + बन्ध् + घञ् । वि + चिन्त् स्मृत्या 10th conj. P. A. + ल्यप् । दाराः mas. always used in plural. युज् + ण्यत् or योग अर्हति योग + यत् = योग्यं । दशा =अवस्था । दारक्रिया means marriage. प्रस्था० Third P. sing. of the Peri. Perf. of the causal of स्था with प्र to send. सेनानां संघः सैन्यम् ष्यञ् or सेनाया समवैति ण्य = सैन्यम् । ऋध् वृद्धौ ऋध्यति or ऋध्नोति + क्त + टाप् ऋद्धाम् । अधि + पा + क = अधिपः । धा + ल्युट् + ङीप् = धानी । ल्युट् a कृत् termination is used in the sense of instrusnent करणं or place अधिकरणं; here it is used in the sense of place " in which a thing is placed: in which a king ives. अनूचानः वेदस्य अनुवचनं कृतवान् = one versed in

Vedic lore, learned and well-behaved. The राजधानी is कुण्डिनपुर. इन्द्रवज्रावृत्तम् । वैदर्भी रीतिः । प्रसादगुणः ।

Translate:—Thinking him–Bhoja–to be one with the relation was praiseworthy and also considering his son–Aja–to be in a condition proper for marrying a wife, he–Raghu–sent him with an army to the prosperous metropolis of the lord of the country of the Vidarbhas. 40

---

**तस्योपकार्यारचितोपचारा वन्येतरा जानपदोपदाभिः ।**
**मार्गे निवासा मनुजेन्द्रसूनोर्बभूवुरुद्यान विहारकल्पाः ॥ ४१ ॥**

अन्वयः—उपकार्यारचितोपचाराः जानपदोपदाभिः वन्येतराः तस्य मनुजेन्द्रसूनोः मार्गे निवासाः उद्यानविहारकल्पाः बभूवुः ॥ ४१ ॥

## संजीविनी

तस्येति । उपकार्यासु राजयोग्येषु पटभवनादिषु " सौधोऽस्त्री राजसदनमुपकार्योपकारिका " इति अमरवचनव्याख्याने क्षीरस्वामी । उपक्रियते उपकरोति वा पटमण्डपादि राजसदनमिति । रचिताः उपचाराः शयनादयः [ स्रक् चन्दनादि सामग्री ] येषु ते तथोक्ताः जानपदानां जनपदेभ्यः आगतानां उपदाभिः उपायनैः [ हेतुभिः ] वन्याः वने भवाः [ यत् ] इतरे येषां ते वन्येतराः । अवन्याः इत्यर्थः । " न बहुव्रीहौ " इति सर्वनामसंज्ञानिषेधः । तत्पुरुषे सर्वनामसंज्ञा दुर्वारा एव । तस्य मनुजेन्द्रसूनोः अजस्य [ शेषे संबंधसामान्ये षष्ठी ] मार्गे [ पथि अधिकरणे ] निवासाः वासनिकाः उद्यानानि आक्रीडाः "पुमान् आक्रीडः उद्यानं" इत्यमरः । तान्येव विहाराः विहारस्थानानि तत्कल्पाः तत्सदृशाः इत्यर्थः " ईषदसमाप्तौ कल्पप् देश्यदेशीयरः " इति कल्पप् प्रत्ययः । बभूवुः ॥ ४१ ॥

समासाः— उपकार्यासुरचिताः स० त० । उ० ताः उपचाराः येषु बहु० । जानपदानां उपदाः ष० त० । वन्याः इतरे येषां ते बहु० । मनोः जाताः मनुजाः उप० तेषां इन्द्रः ष० त० । तस्य सूनुः ष० । उद्यानानि एव विहाराः कर्म० । जनानां पदं = जनपदं ष० ।

विवृतिः— साकेतनगराद्विदर्भपर्यन्तं राजपुरुषैरजस्य कृते पटगृहाणि स्थापि-

नानि । तेषु च तैः स्नानशयनभोजनादिसर्वसामग्री विहिता । ग्रामवासिलोकैश्च विविधप्रकारकोपायनानि राजपुत्राय दत्तानि । अत एवारण्यपथेऽपि यत्र यत्राजो निवेशन चकार तत्र तत्र तेन सर्वाण्युपभोग्यवस्तूनि प्राप्तानि । तस्मात् तस्य सर्वे वासानिकाः सकलः प्रवासः सुखकारकोऽभवत् । क्रीडोपवनगमनसदृशस्तस्य प्रवासः संजातः ॥ ४१ ॥

## NOTES.

उप + कृ + ण्यत् + टाप् । रच् + क्त । उप+चर् + घञ् । जनपद + अण् उप + दा + अङ् + उपढौकनं presents. मार्ग अन्वेषणे + घञ् । नि + वस् + घञ् । मनु + जन् + ड । सू + नु । उत् + या + ल्युट् । विहृ + घञ् । In the sense of ईषदसमाप्ति "a little less than" the termination कल्पप्, देश्य and देशीयर् are used. सौधः or सौधं, राजसदनं, उपकार्या and उपकारिका are synonyms. क्षीरस्वामी is the commentator on अमरकोशः that which serves the purpose of a dwelling: a tent. "न बहु॰" In बहु॰ इतर loses its nature of a pronoun in बहु॰ and remains as a pronoun in a तत्पु॰. Had it been a तत्पु॰, the form would be वन्येतरे. उपमालङ्कारः कल्प having the sense of इव.

Translate:—The prince's halts on the way, during which comforts of all kinds were provided in royal tents and which on account of presents made by the villagers appeared to be other than sylvan, were almost like rambles in pleasure-gardens. 41.

---

**स नर्मदारोधसि सीकरार्द्रैर्मरुद्भिरानर्तितनक्तमाले ।**
**निवेशयामास विलंघिताध्वा क्लान्तं रजोधूसरकेतु सैन्यम् ॥४२॥**

अन्वयः—विलंघिताध्वा सः सीकरार्द्रैः मरुद्भिः आनर्तितनक्तमाले नर्मदारोधसि क्लान्तं रजोधूसरकेतु सैन्यं निवेशयामास ॥ ४२ ॥

## संजीविनी.

स इति । विलंघिताध्वा अतिक्रान्तमार्गः स अजः सीकरार्द्रैः [जलबिन्दुक्लिन्नैः]

शीतलैः इत्यर्थः । मरुद्भिः वातैः [ करणे तृतीया ] आनर्तिताः कंपिताः नक्त-मालाः चिरबिल्वाख्यवृक्षभेदाः " चिरबिल्वो नक्तमालः करजश्च करजके " इत्य-मरः । यस्मिन् तस्मिन् । निवेशार्हे इत्यर्थः । नर्मदायाः [ नद्याः ] रोधसि रेवायाः तीरे [ अधिकरण ] क्लान्त श्रान्त रजोभिः धूसराः [ धूलिमलिनाः ] केतवः ध्वजाः यस्य तत् सैन्यं निवेशयामास ( स्थापयामास ) ॥ ४२॥

समासाः—नर्मदायाः रोधः ष० त० । सीकरैः आर्द्राः तृ० त० । आ० ताः नक्तमालाः यस्मिन् बहु० । विलंघितः अध्वा येन बहु० । रजोभिः धूसराः तृ० त० । र० राः केतवः यस्य बहु० ।

निवृत्तिः – कंचित् पन्थानमतिक्रम्य यदा तस्य वाहिनी श्रान्ताबभूव तदाजो रेवानदीतटे विश्रामार्थं न्यवसत् । तस्मिन् समये सेनाया ध्वजवस्त्राणि मार्गोत्थ-धूलिकणैर्मलिनानि दृष्टानि । तत्र विद्यमानाः करजादिवृक्षावातेन कम्पिता आसन्। पविलनद्या जलक्षोदैर्युक्ताः शीतलाः समीरणाः क्षणेनैव सैनिकाना खेदं दूरीचक्रुः ॥ ४२ ॥

## NOTES.

रुध् + असुन् + रोधस् neuter. आ + नृत् + णिच् causal + क्त आनर्तित p. p. p. of causal of नृत् । नि + विश् + लिट् + निवे० Perf. विश् with नि to halt is atmanepadi. वि + लंघ् + क्त । क्लम् = ग्लानौ–क्लामति-क्लाम्यति to feel tired + क्त. रंज् + असुन् = रजस् neu. धू + सर = धूसरः = ईषत्पाण्डुवर्णः The Narmada rises in अमरकंटक near Panchmadi Hills and flowing from east to west between the Vindhya and the Satpura ranges falls into the Arabian sea.

Translate:-Having travelled some way he encamped his army which was fatigued and which had its banners soiled with dust, on the bank of the Narmada, the Naktamala trees on which were made to dance by winds wet with spray. 42

**अथोपरिष्टाद्भ्रमरैर्भ्रमद्भिः प्राक्सूचितान्तः सलिलप्रवेशः ।**
**निर्धौतदानामलगण्डभित्तिर्वन्यः सरित्तो गज उन्ममज्ज ॥ ४३ ॥**

अन्वयः— अथ उपरिष्टात् भ्रमद्भिः भ्रमरैः प्राक्सूचितान्तः सलिलप्रवेशः निर्धौतदानामलगण्डभित्तिः वन्यः गजः सरित्तः उन्ममज्ज ॥ ४३ ॥

## संजीविनी

अथेति । अथ उपरिष्टात् ऊर्ध्वं । " उपरि उपरिष्टात् " इति निपातः । भ्रमद्भिः ( अटद्भिः ) मदलोभात् इतिभावः । भ्रमरैः ( द्विरेफैः ) ( हेतौ तृ० ) प्राक् उन्मज्जनात् पूर्वं सूचितः ज्ञापितः अन्तः सलिले प्रवेशः ( गमनं ) यस्य सः तथोक्तः । निर्धौतदाने क्षालितमदे अत एव अमले गण्डभित्ती यस्य सः तथोक्तः। " दान गजमदे त्यागे " इतिशाश्वतः । प्रशस्तौ गण्डौ गण्डभित्ती । " प्रशंसावचनैश्च " इति समासः । भित्तिशब्दः प्रशस्तार्थः । तथा च गणरत्नमहोदधौ— '' मतल्लिकोद्भमिश्राः स्युः प्रकाण्डस्थलभित्तयः " इति । भित्तिः प्रदेशो वा । " भित्तिः कुड्ये प्रदेशे च " इति हैमः । निर्धौतदानेन अमला गण्डभित्तिः यस्य इति वा । वन्यः ( अरण्यचारी ) गजः ( हस्ती ) सरित्तः नर्मदायाः ( नद्याः ) सकाशात् पचम्याः तसिल् प्रत्ययः । उन्ममज्ज उत्थितः ॥ ४३ ॥

समासाः— प्राक् सूचितः सुपेतिसमासः । अन्तः सलिलं सहसुपेति समासः तस्मिन् प्रवेशः स० त० प्रा–तः अन्तः–क्षः यस्य बहु० प्रशस्तौ गण्डौ गण्डभित्ती नित्यस० । निर्धौतं दानं यथोः बहु० नि० ने अमले कर्म० न मलः ययोः बहु० । नि–ले गण्डभित्ती यस्य बहु० ।

विवृतिः— नर्मदाजले कश्चिन्मदोन्मत्तो हस्ती स्नानार्थं गत आसीत् । तस्य न किमपि गात्रं दृष्टं किन्तु जलोपरि गुञ्जन्तो द्विरेफा इदं निवेदितवन्तः । क्षणेन स उद्दामोऽरण्यनिवासी करी नद्या बहिरागतः । तस्य प्रशस्तविशालकपोलयोर्मदो नर्मदोदकेन क्षालितः । तस्मात्तस्य मस्तकमिदानीं स्वच्छमासीत् ॥ ४३ ॥

## NOTES.

उपरि and उपरिष्टात्, अधः and अधस्तात् are irregularly formed ( निपातः ). भ्रम् ( भ्रमति, भ्रम्यति, भ्राम्यति + शतृ = भ्रमत् pre. parti. प्र + विश् + घञ् = प्रवेशः अन्तर् is an indeclinable and can be prefixed to words forming त० and बहु०

compounds. It is a गति or preposition. अन्तः सलिलं is like अन्तः करणम् । सल् + इलच् = सलिलं । नितरा धौतः धाव् गतिशुध्द्योः to run, to clean + क्तः = धौत or धावित + दा ल्युट् । भिद् + क्तिन् भित्तिः means a wall कुड्यं or a place and so it means " broad." गण्डभित्ती = broad and expansive temples; or it may be taken in the sense of excellent, ample, expressive of praise प्रशंसावचन and so अस्वपदविग्रहः नित्यसमासः मतल्लिका etc. are used in the same sense. e. g. गोमतल्लिका, गण्डस्थलम् । वनेभवः यत् वन्यः । सरित् सृ + इत् + तसिल् = सरित्तः from the river. उत् + मस्ज + लिट् Perf. ( cf. merge ). अनुप्रासः alliteration and स्वभावोक्तिः ।

*Translate:—Just then came up from the river* a wild elephant whose plunge into the water was indicated before by the bees hovering over the water and whose expansive temples were made clean on account of the rut being completely washed away. 43

---

**निःशेषविक्षालितधातुनापि वप्रक्रियामृक्षवतस्तटेषु ।**
**नीलोर्ध्वरेखाशबलेन शंसन्दन्तद्वयेनाश्मविकुण्ठितेन ॥ ४४ ॥**

अन्वयः—निःशेषविक्षालित धातुना अपि नीलोर्ध्वरेखाशबलेन अश्मविकुण्ठितेन दन्तद्वयेन ऋक्षवतः तटेषु वप्रक्रियां शंसन् ( उन्ममज्ज ) ॥ ४४ ॥

## संजीविनी.

निर् इति । कथंभूतः गजः । निःशेषविक्षालित धातु नापि धौतगैरिकादिनापि नीलाभिः ऊर्ध्वाभिः रेखाभिः तटाभिघातजनिताभिः ( कृष्णवर्णोद्गतपंक्तिभिः ) शबलेन कर्बुरेण । " चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे " इत्यमरः । अश्मभिः पाषाणैः विकुण्ठितेन कुण्ठीकृतेन ( भिन्नेन ) दन्तद्वयेन ( विषाणयुग्मेन ) । ऋक्षवान् नाम कश्चित् तत्रत्यः पर्वतः । तस्य तटेषु ( पार्श्वभागेषु ) वप्रक्रिया व-

प्रक्रीडां उत्खातकेलिमित्यर्थः। "उत्खातकेलिःशृंगाद्यैः वप्रक्रीडा निगद्यते" इति शब्दार्णवः। शंसन् कथयन् सूचयन्नित्यर्थः। युग्मम् [ द्वाभ्यां युग्ममिति प्रोक्तम् ] ॥ ४४ ॥

समासाः—नास्ति शेषः यस्मिन् कर्मणि यथास्यात्तथा निःशेषम्। बहु०। निःशेष विक्षालितः सुप् सुप् स०। निः—तः धातुः यस्य तेन बहु०। वप्रेक्रिया वप्रक्रिया स० त०। नीलाश्चामू ऊर्ध्वाश्च कर्म०। नीलोर्ध्वाः रेखाः कर्म०। ताभिः शबलम् तृ० त०। दन्तयोःद्वयम् ष० त०। अश्मभिः विकुण्ठितम् तृ० त०।

विवृतिः—यस्य ऋक्षवतः पर्वतस्य प्रान्तेषु गजोऽखेलत्तत्र संसर्गेरिकांजनमनःशिलाहरितालादयो बहवो रसा आसन्। किन्तु तेषां रसानां वर्णो जलेन द्विजयुग्मान् नितरां दूरीकृतः। तथापि तयोर्विषाणयोरुपरि का अपि श्यामपक्तयोऽधुनापि दृश्यमाना आसन्। अतः प्रान्तपाषाणभिन्नेन निजद्विजयुगलेन सोऽसूचयद्यथा तेन मज्जनात्प्राक् शैलेषु खननादिखेलनं कृतमिति स्पष्टतयादृश्यत ॥ ४४ ॥

## NOTES.

Verses 43 and 44 forming a single couplet should be read together; the finite verb in both is उन्ममज्ज. धा + तुन् = धातुः = minerals. वप्रक्रिया is digging up of the earth of the sides of the mountain. cf. वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श। मेघदूत. Bulls are often seen playing like this by the side of a road. शबल, चित्रं etc. mean variegated, spotted. शंस् + शतृ – अत् = शसत् pre. parti. अश्नुते इति अश्मन् अश् + मनिन् = पाषाणः। इन्द्रवज्रावृत्तम्। ऋक्षवान् a mountain near the Narmada. ऋक्षs bears must have been abundant there as the name indicates. It is one of the seven principal mountain ranges. महेन्द्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः विन्ध्यश्च पारियात्रश्च सप्तैतेकुलपर्वताः॥

Translate:—( There came up the wild elephant ) indicating his sportive batting against the slopes of the Rikshawat mountain by means of his two tusks

which, though completely cleansed of minerals, yet appeared variegated on account of dark lines on them and worsted by rocks. 44.

**संहारविक्षेपलघुक्रियेण हस्तेन तीराभिमुखः सशब्दम् ।**
**बभौ स भिन्दन्बृहतस्तरंगान् वार्यर्गलाभंग इव प्रवृत्तः ॥ ४५ ॥**

अन्वयः-- संहारविक्षेपलघुक्रियेण हस्तेन बृहतस्तरंगान् सशब्दं भिन्दन् तीराभिमुखः सः वार्यर्गलाभंगे प्रवृत्तः इव बभौ ॥ ४५ ॥

## संजीविनी.

संहारेति । संहारविक्षेपयोः संकोचनप्रसारणयोः लघुक्रियेण क्षिप्रव्यापारेण । " लघु क्षिप्रतरं द्रुतम् " इत्यमरः । हस्तेन शुंडादण्डेन " हस्तो नक्षत्रभेदे स्यात्करेभकरयोरपि " इति विश्वः । सशब्दं सघोषं बृहतः तरंगान् ( महतः जलकल्लोलान् ) भिन्दन् विदारयन् तीराभिमुखः ( तटसन्मुखः ) सः गजः । वारी गजबन्धनस्थानं " वारी तु गजबन्धनी " इति यादवः । वार्याः अर्गलायाः विष्कंभस्य भंगे भंजने प्रवृत्तः ( प्रक्रान्तः ) इव बभौ ( रेजे ) ॥ ४५ ॥

समासाः-- संहारश्च विक्षेपश्च द्वन्द्वः । लघुः क्रिया यस्य बहु० । तयोः लघुक्रियः स० त० । अभिगतं मुखं यस्य बहु० । तीरे अभिमुखः स० त० शब्देन सहित यथातथा बहु० क्रियाविशेषणम् । वार्याः अर्गला ष० त० *or* वारिएव अर्गला रूपक कर्म० । तस्याः भंगः ष० त० ।

विवृतिः-- मदोमन्तो स करी निजकरं पुनः पुनः समकोचयत् प्रासारयच्च । अस्मिन् कर्मणि सोऽतीव चपल आसीत् । तटप्रान्तागमनसमये स निजशुण्डादण्डेन नदीजलस्य महत ऊर्मीस्तथाताडयद्यथा तेन महान् नादः संजातः । बहिर्गमनरोधार्थदत्ताया अर्गलायास्त्रोटने प्रवृत्तो गज इवैषोऽपि जलरूपविष्कंभं त्रोटयितुं यतमान आस्त इति दृश्यमदृश्यत ॥ ४५ ॥

## NOTES.

सं + हृ + घञ् = संहारः । वि + क्षिप् + घञ् = विक्षेपः । कृ + श = क्रिया । हस्तः means a *constellation*, a hand and the trunk of an elephant. बभौ perf. of भा 2nd conj. to appear. "लघु क्षिप्र अर द्रुतम् " is what is found in अमरकोशः meaning

active, expert. उत्प्रेक्षा अलंकारः the description is quite graphic . वारि means chains that tied the elephant or वारि = water. अर्गला the bar वृ + इन् = वारि, वृ + णिच् + इन्+ ङीप् = वारी. मल्लिनाथ takes वारी in the sense of stable as if breaking the bolts of his stable.

Translate:— With his face turned towards the bank and splitting with loud noise the huge billows by means of his trunk, quick in the actions of withdrawing and protruding or dashing against the water, he appeared to be engaged in breaking through some chains tying him or breaking off the bolts or bars of his stable. 45.

**शैलोपमः शैवलमंजरीणां जालानि कर्षन्नुरसा स पश्चात् ।**
**पूर्वं तदुत्पीडितवारिराशिः सरित्प्रवाहस्तटमुत्ससर्प ॥ ४६ ॥**

अन्वयः—शैलोपमः शैवलमंजरीणां जालानि उरसा कर्षन् पश्चात्तटं उत्ससर्प। तदुत्पीडितवारिराशिः सरित्प्रवाहः ( तु ) पूर्वम् तटं उत्ससर्प ॥ ४६ ॥

## संजीविनी.

शैलेति । शैलोपमः ( पर्वततुल्यः ) सः गजः शैवलमंजरीणां ( जलगतलतासमूहानां ) जालानि वृन्दानि उरसा ( वक्षसा ) कर्षन् वहन् पश्चात् ( अनन्तरं ) तटं उत्ससर्प ( तीरं आजगाम ) पूर्वं ( आदौ ) तेन गजेन उत्पीडितः नुन्नः वारिराशिः ( उदकसंघः ) यस्य स सरित्प्रवाहः (नदी ओघः) तटमुत्ससर्प। ॥४६॥

समासाः—शैलः उपमा यस्य बहु० । शैवलानां मंजर्यः ष० त० । वारीणां राशिः ष० त० । तेन उत्पीडितः तृ० त० त०। तदु० तः वारिराशिः यस्य बहु० । सरितः प्रवाहः ष० त० ।

विवृतिः—अतित्वरया स गिरितुल्यो मत्तो हस्ती जललीनवल्लीनां समूहेन वेष्टितस्तीरसमीपमाजगाम । किन्तु तस्य हस्तेन क्षुब्धाजलकल्लोलाः शीघ्रतरगत्या तस्मात्पूर्वमेव तीरं प्राप्ताः । आदौतावत्तेन ताडितं जलं तीरप्रान्तमागतं तदनन्तरं गजस्तीरभूमिं प्राप्तः ॥ ४६ ॥

## NOTES.

The verse is very simple and at the same time extremely charming and natural. शिलानां समूहः शैलः शिला + अण् । उप + मा + अङ् = उपमा = सादृश्यम् । वैदर्भी रीतिः, माधुर्यप्रसादौ गुणौ, स्वभावोक्तिः अलंकारः ।

Translate:— That mountain - like huge elephant, drawing with him by his chest masses of moss, crept up to the bank only afterwards; the current of the river, on its part, with its volume of waters agitated by him reached the bank first ( long before him. ) 46.

**तस्यैकनागस्य कपोलभित्त्योर्जलावगाहक्षणमात्रशान्ता ।**
**वन्येतरानेकपदर्शनेन पुनर्दिदीपे मददुर्दिनश्रीः ॥ ४७ ॥**

*अन्वयः—तस्य एकनागस्य ... शान्ता मददुर्दिनश्रीः वन्ये- दिदीपे ॥४७॥*

## संजीविनी.

तस्येति । तस्य एकनागस्य एकाकिनः गजस्य कपोलभित्त्योः ( गण्डस्थलयोः ) जलावगाहेन ( उदकमज्जनेन ) क्षणमात्रं ( मुहूर्तं ) शान्ता निवृत्ता मददुर्दिनश्रीः दानवर्षलक्ष्मीः वन्येतरेषां ग्राम्याणां अनेकपानां द्विपानां दर्शनेन ( अवलोकनेन ) पुनः ( भूयः ) दिदीपे ववृधे ॥ ४७ ॥

समासाः—एकश्चासौनागश्च कर्म० । प्रशस्तौ कपोलौ कपोलभित्ती नित्य स० । जले अवगाहः स० त० । क्षणः एव क्षणमात्रम् मयूरव्यंसकादित्वात् नित्यस० । क्षणमात्रं शान्ता द्वि० त० । जलावगाहेन क्ष० ता तृ० त० । वन्येभ्यः इतरे पं० त० वन्येतरे अनेकपाः कर्म० । न एकः अनेकः नञ् । अनेकाभ्यां (द्वाभ्यां) पिबति अनेकपः उपपद स० । तेषां दर्शनं ष० त० । मदस्यदुर्दिनस्य श्रीः ष० त० दुष्टं दिनं दुर्दिनम् कर्म०

विवृतिः—आगतमात्रेण तेन द्विपश्रेष्ठेन सैन्यस्था गजा दृष्टाः । तेन स पुनरपि दानवाही संजातः । दानक्षरणं तावत्क्षोभकारणम् । अत्र वने मया विना कोपि द्विपो न विद्यते । मयिस्थिते कएते गजा अत्रागताः इति तस्य क्रोधः सजातः । नदीवारिस्नानेन धौतं दानोदक तस्य गण्डस्थलाभ्यां पुनरपि प्रवृत्तम् । दुर्दिनं मेघच्छन्नो दिवसः । अत्र लक्षणया स वर्षार्थकः ॥ ४७ ॥

## NOTES.

एके मुख्यान्यकेवलाः एक = lonely, alone or principal. न + गम् + ड = नगः or अगः and नग एव नागः or न + अगः = नागः = हस्ती । कपोलभित्तिः like गण्डभित्तिः । अव + गाह् + घञ् = अवगाहः स्नान or अन्तः प्रवेशः । शम् + क्तः शमित or शान्त p. p. p. दृश् + ल्युट् = दर्शनम् । दिदीपे Perf. 3rd pers. sing. दुर्दिन means a cloudy day; but here it indicates the shower or stream. The rut began to flow in a sparkling stream.

Translate:—The splendour of the stream of ichor of that lonely ( or lordly ) elephant's spacious temples, stopped for a time only by his plunging into the water, again glittered at the sight of tamed elephants ( of the prince. ) 47.

---

**सप्तच्छदक्षीरकटुप्रवाहमसह्यमाघ्राय मदं तदीयम् ।**
**विलंघिता धोरणतीव्रयत्नाः सेनागजेन्द्रा विमुखा बभूवुः ॥ ४८ ॥**

अन्वयः—सप्त— ह्यं तदीयं मदं आघ्राय विलं— — बभूवः ॥४८॥

## संजीविनी.

सप्तेति । सप्तच्छदस्य वृक्षविशेषस्य ( कर्पूरवृक्षस्य ) क्षीरवत् ( द्रवः इव ) कटुः सुरभिः प्रवाहः प्रसारः यस्य तम् । " कटु तिक्तकषायास्तु सौरभ्येपि प्रकीर्तिताः " इति यादवः । असह्य ( दुःखदायकं ) तदीयं ( वन्यगजस्य ) मदं आघ्राय सेनागजेन्द्राः विलंघितः तिरस्कृतः आधोरणानां हस्तिपकानां तीव्रो महान् यत्नः ( अंकुशताडनरूपः उद्योगः ) यै ते तथोक्ताः सन्तः । " आधोरणा हस्तिपका हस्त्यारोहा निषादिनः " इत्यमरः । विमुखाः पराङ्मुखाः बभूवः ॥ ४८ ॥

समासाः—सप्तच्छदाः यस्य बहु० । तस्य क्षीरं ष० त० । तदिव कटुः कर्म० । सप्त० दुः प्रवाहः यस्य बहु० । न सह्य नञ् । तीव्रः यत्नः कर्म० । आधोरणानां

तीव्रयत्नः ष० त० विलंघितः आ० त्नः यैः बहु सेनायाः गजेषु इन्द्राः ष० स० त० । विगतं मुखं येषां बहु० ।

विवृतिः—तस्य वन्यकरिश्रेष्ठस्य सप्तपर्णरससुरभिं दानसुवासं यदाजन्मूगता हस्तिन आघ्रातवन्तस्तदा तेन सुवासेनैव तैर्ज्ञात यथा कश्चिन्मदोन्मत्तो महत्तरो गज आगत इति । तत्क्षणमेव हस्त्यारोहाणां ताडनोद्योगं तिरस्कृत्य ताडयत्स्वपि हस्तिपकेषु तेऽपलायन्त । एतेन वन्यगजस्य श्रेष्ठत्वमुक्तम् ॥ ४८ ॥

## NOTES.

प्र + वह् + घञ् = प्रवाहः । सह् + यत् = सह्यम् । आ + घ्रा + ल्यप् = आघ्राय । तत् + छ = तदीय । वि + लंघ् + क्त = विलंघित । आ + धोर् – गतिचातुर्ये धोरति + ल्यु = आधोरणः हस्तिगतिचातुर्यज्ञः । तीव् स्थौल्ये तीवति + रक् = तीव्र adj. यत् + नङ् = यत्नः । स + इन = सेना = इनेन प्रभुणासह । इद् + रन् = इन्द्रः । बभूवुः Perf.

Translate:— Smelling his unbearable rut whose flow was fragrant like the milk of the Saptachchhada tree, the best elephants in the army, setting at naught the strenuous efforts of the drivers, turned away their faces ( from that lonely elephant ). 48

---

**स च्छिन्नबन्धद्रुतयुग्यशून्यं भग्नाक्षपर्यस्तरथं क्षणेन ।**
**रामापरित्राणविहस्तयोधं सेनानिवेशं तुमुलं चकार ॥ ४९ ॥**

अन्वयः—सः छिन्न...रथं रामा.. क्षणेन तुमुलं चकार ॥ ४९ ॥

## संजीविनी

स इति । सः गजः छिन्नाः ( द्विधा कृताः ) बन्धाः [ रज्ज्वादयः ] यैः ते [ बहु० ] छिन्नबन्धाः [ अत एव ] द्रुताः पलायिताः [ कर्म० ] युगं वहन्तीति युग्याः वाहाः ( अश्वउष्ट्रगजवृषभादयः ) यस्मिन् सः ( बहु० ) सचासौ शून्यश्च [ कर्म० ] तम् । भग्नाः [ त्रोटिताः ] अक्षाः रथावयवदारुविशेषाः [युगकीलादयः]। " अक्षोरथस्यावयवे पाशकेऽप्यक्षमिन्द्रियम् " इति शाश्वतः । येषां ते भग्नाक्षाः [ बहु० ] अत एव पर्यस्ताः पतिताः [ कर्म० ] रथाः [ स्यन्दनाः ] यस्मिन् तम्

[ बहु० ] रामाणां स्त्रीणां परित्राणे रक्षणे [ ष० त० ] विहस्ताः व्याकुलाः ( स० त० ) " विहस्तव्याकुलौ समौ " इत्यमरः । [ रामा...स्ताः ] योधाः [ वीराः ] यस्मिन् तं [ बहु० ] सेनानिवेशं [ ष० त० ] शिबिरं क्षणेन तुमुलं संकुलं चकार [ विदधौ ] ॥ ४९ ॥

समासाs are named and analysed in Tika.

विवृतिः— स हस्ती सेनाप्रवेशमात्रेणाश्वोष्ट्रवृषभादिप्राणिषु वीरपुरुषेषु स्त्रीषु च क्षोभमुत्पादितवान् । रथे युक्ता वाहारज्ज्वादीन् छित्त्वा पलायिताः । तेन स्यन्दनाना दारुकीलकादयः परिक्षिप्ता स्यन्दश्चोध्वस्ताः । भयभीताश्च सर्व एव स्त्रीपुरुषादयः । पत्न्यादीना महिलाना तथा च बालवृद्धानां रक्षणमशक्यंसंजातम् । सैन्ये सर्वत्रविकलत्वमुत्पन्नम् ॥ ४९ ॥

## NOTES.

छिद् + क्त = छिन्न । द्रु गतौ द्रवति + क्त = द्रुत । युग + यत् = युग्यः । शूनायै प्राणिवधाय हितं शूना + यत् = शून्य । भज आमर्दने भनक्ति to break + क्त = भग्न । परि + अस् to throw + क्त । रम् + णिच् + घञ् + टाप् = रामाः रमयन्तीति । परि + त्रै + ल्युट् = परित्राण । विगतः हस्तः हस्तावलंबनं यस्य स विहस्तः helpless बहु० । युध्यते इति योधः अच् । Tumutuous and तुमुल are like each other in sound. इन्द्रवज्रावृत्तम् । ओजो गुणः as there are so many compounds: ओजः समासभूयस्त्वम् । स्वभावोक्तिः अलंकारः natural description.

Translate:— In a moment did he throw into confusion the whole camp of the army which became void of the chariot-horses that cut out their chains and reins and fled away, the chariots in which were overturned with their axles broken and the warriors in which became helpless in protecting the women. 49

---

**तमापतन्तं नृपतेरवध्यो वन्यः करीति श्रुतवान्कुमारः ।**
**निवर्तयिष्यन् विशिखेन कुंभे जघान नात्यायतकृष्टशार्ङ्गः ॥ ५० ॥**

अन्वयः— वन्यः करी नृपतेः अवध्यः इतिश्रुतवान् कुमारः आपतन्तं तं निवर्तयिष्यन् नात्यायतकृष्टशार्ङ्गः विशिखेन कुम्भे जघान ॥ ५० ॥

## संजीविनी.

तमिति । नृपतेः ( लक्ष्मीकामस्य राज्ञः ) वन्यः करी अवध्यः ( अमारणीयः ) इति श्रुतवान् शास्त्रात् ज्ञातवान् कुमारः ( राजपुत्रः ) आपतन्तं अभिधावन्तं तं गजं निवर्तयिष्यन् न तु प्रहरिष्यन् । अत एव नात्यायतं अनतिदीर्घं यथा स्यात् तथा । नञर्थस्थ नशब्दस्य सुप्सुपेति समासः । कृष्टशार्ङ्गः ईषदाकृष्टचापः सन् विशिखेन बाणेन ( करणे तृ० ) कुंभे ( गण्डस्थले ) जघान (अहन्—अमारयत्) लिट् । अत्र चाक्षुषः " लक्ष्मीकामो युद्धादन्यत्र करिवधं न कुर्यात् । इयं हिश्रीः ये करिणः " इति । अत एव " युद्धादन्यत्र " इतिद्योतनार्थं एव वन्यग्रहण कृतम् ॥ ५० ॥

समासाः— नृणां पतिः ष० त० । न वध्यः नञ् । न अत्यायतं नात्यायतं सहसुपेति स० । नात्यायतं कृष्ट सुपेति स० । नाष्टं शार्ङ्ग येन बहु० ।

विवृतिः— गृहलक्ष्मीं प्राप्तुकामेन मया यथाशास्त्रं हस्तिनो मारण न कर्तव्यम्। तथाप्यनेन मत्तेन मनुष्याणां नाशःक्रियेत तथा चायमुन्मत्तोऽरण्यचारी । तस्मा-ल्लोपोकारार्थं मयायं हन्तव्य इति कृत्वा त हन्तुमथवा निवारयितु राजपुत्रेण तस्य गण्डस्थले नातिबलेनैकः शरो मुक्तः । आततायिवधे न दोषः ॥ ५० ॥

## NOTES.

आपत् + शतृ । हन् + यत् = वध्यः or घात्यः The root वध् is not used in classical literature. It substitutes हन् in aorist and Benedictive; or वधं अर्हति इति वध + यत् । वने भवः वन्यः यत् । श्रु + क्तवत् निष्ठा = p. active parti. कु + मार or कुमार यति क्रीडति इति अच् । कुत्सितो मारो यस्मात् । more charming than cupid or को मारः cupid on earth. नि + वृत् + णिच् ( causal ) + लृट् + शतृ future parti. of the causal of वृत् with नि. desireous of turning him back. विशिष्टा or विगता शिखा यस्य विशिखः बाणः । शृंगस्य विकारः अण् शार्ङ्ग or शार्ङ्गम् । न + अत्यायत

( अति + आ + यम् + क्त ) should be अनत्यायत: न being changed to अन्; but it is not changed; so मल्लिनाथ says this is not नञ् which is changed but न and so irregular सुप् समास or केवल समास: । नृपते: अवध्य: or नृपतिना अवध्य: see कृत्यानां कर्तरि वा in Guide; or नृपते: शेषे षष्ठी, वध्य being formed from the noun वध with यत् in the sense of deserving. Elephants should not be killed except in battle and as wild elephants can never be engaged in a battle, they should not be killed. On account of this scriptural prohibition अज wanted only to turn him away. But आततायिनं आयान्तं हन्यादेव अविचारयन् is also a law: The elephant was rushing towards men to kill them, so he could be killed. But still the prince did not shoot very forcibly.

Translate:— Knowing that a wild elephant should not be killed, the prince drew his bow ( string ) not too much and wishing to turn him back as he rushed, hit him on the temple with an arrow. 50

---

**स विद्धमात्रः किल नागरूपमुत्सृज्य तद्विस्मितसैन्यदृष्टः ।**
**स्फुरत्प्रभामंडलमध्यवर्ति कान्तं वपुर्व्योमचरं प्रपेदे ॥ ५१ ॥**

अन्वय:–स–कान्तं व्योमचरं वपु: प्रपेदे ॥ ५१ ॥

The verse is in prose order itself and simple.

## संजीविनी.

स इति । स गजः विद्धमात्रः ताडितमात्रः किल ( इति लोकाः वदन्ति ) न तु प्रहृतः तथापि नागरूपं गजशरीरं उत्सृज्य (परित्यज्य) तेन वृत्तान्तेन विस्मितैः ( साश्चर्यैः ) तद्विस्मितैः सैन्यैः दृष्टः ( अवलोकितः ) सन् । स्फुरतः (उद्गच्छतः) प्रभामण्डलस्य ( कान्तिवर्तुलस्य ) मध्यवर्ति ( अन्तश्चरं ) कान्तं मनोहरं व्योमचरं ( नभोविहारि ) वपुः ( देहं ) प्रपेदे प्राप ( लिट् ) ॥ ५१ ॥

समासाः—विद्धः एव मयूरव्यंसकादित्वात् नित्य स०। नागस्य रूप ष० त० । तेन विस्मितानि तृ० त० । त० नि सैन्यानि कर्म० । तैः दृष्टः त० । प्रभायाः मण्डलं ष० । स्फुरत् प्र-लं कर्म० । तस्य मध्यं ष० । तस्मिन् वर्तते तच्छीलं अस्य उपपदस० । व्योम्निचरति इति उप० ।

विवृतिः— यस्मिन् क्षणेऽजस्य बाणस्तस्य गण्डस्थलमस्पृशत् तस्मिन्नेव क्षणे स हस्ती निजतनुं तत्याज देवतनुं जग्राह च । तद्विलोक्य सर्वे मनुष्या आश्चर्यचकिताः संजाताः । स गजश्च हृदयंगम विबुधशरीरमधारयत् । तस्य समन्तात् प्रोल्लसद्दीप्तिसमूहो दृष्टः । इति पुराणादिषु पठ्यते ॥ ५१ ॥

## NOTES.

व्यध विध्यति ताडने + क्त । किल वार्तायां, निश्चये, सन्ये, अलीके etc. Here it means ऐतिह्य. उत् + सृज् + ल्यप् absolutive. वि + स्मि + क्त = विस्मित p. p. p. दृश् + क्त । स्फुर् + शतृ ( अत् ) pre. parti. प्र + भा + अङ् = दीप्तिः । वृत् + णिनिः ताच्छील्ये । कम् कान्तौ कामयते 1st conj. + क्त कामितः – कान्तः ( काम्मः – कम्यः, कामयित्वा – कमित्वा – कान्त्वा, कमितुं – कामयितुं etc. ) वप् + उसि – उप्यन्ते देहान्तरभोगबीजानि अत्र इति वपुः । व्ये + मनिन् = व्योमन् + चर् + ट = व्योमचरः

Translate:— The moment, they say, that he was pierced he gave the elephant's form and, being gazed at by the army amazed at the incident, assumed a comely and divine ( or moving in sky ) standing in the midst of a halo of flashing light. 51

---

**अथ प्रभावोपनतैः कुमारं कल्पद्रुमोत्थैरवकीर्य पुष्पैः ।**
**उवाच वाग्मी दशनप्रभाभिः संवर्धितोरःस्थलतारहारः ॥ ५२ ॥**

अन्वयः— अथ प्रभावोपनतैः कल्पद्रुमोत्थैः पुष्पैः कुमारं अवकीर्य, दशनप्रभाभिः सवर्धितोरःस्थलतारहारः वाग्मी उवाच ॥ ५२ ॥

## संजीविनी.

अथेति । अथ ( अनंतर ) प्रभावोपनतैः ( दैवसामर्थ्येन ) प्राप्तैः कल्पद्रुमोत्थैः कल्पवृक्षोत्पन्नैः पुष्पैः ( कुसुमैः ) कुमारं अजं अवकीर्य, अभिवृष्य दशनप्रभाभिः दन्तकान्तिभिः संवर्धिताः ( कृततेजस्काः उपबृंहिताः ) उरःस्थले ( वक्षःस्थाने ) ये तारहाराः स्थूलमुक्ताहाराः ते येन स तथोक्तः । वाचः अस्य सन्तीति वाग्मी वक्ता " वाचोग्मिनिः " इति ग्मिनिप्रत्ययः । स पुरुषः उवाच ( जगाद लिट् ) ॥ ५२ ॥

समासाः— प्रकृष्टः भावः प्रादि० । तेन उपनतानि तृ० । कल्पपूरकः द्रुमः मध्यमपदलोपी स० । तस्मात् उत्थितानि प० । दशनानां प्रभा ष०। उरसः स्थलं ष० । ताराणां हारः ष० । उरःस्थले तारहाराः स० । संवर्धिताः उ० राः येन बहु० ।

विवृतिः— स देवपुरुषो निजदिव्यसामर्थ्येन स्वर्गस्थपारिजातकहरिचन्दनादिकल्पवृक्षाणां कुसुमानि प्राप्य तानि च राजपुत्रोपरि क्षिप्त्वाऽब्रवीत् । भाषणकुशलः स यदा निजमुखमुद्घाटयत्तदा तस्य स्वच्छावदातदन्तमयूखास्तस्य वक्षस्तटे प्रसृताः। तेन तत्र धारिताः स्थूलमुक्ताफलानां सरा द्विगुणिताः संजाताः । तत्र पूर्वमेव मौक्तिकसरा आसन् । किरणैरन्येसरास्तत्र दृष्टाः ॥ ५२ ॥

## NOTES.

भू + घञ् = भावः । उप + नम् + क्त । क्लृप् + घञ् = कल्पः । द्रु + म = द्रुमः द्रवन्ति ऊर्ध्वं गच्छन्ति द्रवः शाखाः ताः सन्ति अस्य । द्रुः = शाखा + म । पंचैते देवतरवः मंदारः पारिजातकः। सन्तानः कल्पवृक्षश्च पुंसिवा हरिचन्दनम् इति अमरः । पुष्यतिविकसति इति पुष्पं पुष् + अच् । दंश् - दशति + ल्युट् दश्यते अनेन. तॄ + णिच् + घञ् = तारः a big pearl. हृ + घञ् = हारः । The idea of the rays issuing from the teeth is very common. अथांधकारं गिरिगव्हराणां दंष्ट्रामयूखैः शकलानि कुर्वन् II Canto 46 verse; बभौ सदशनज्योत्स्ना सा X 37. These rays of the teeth, it appeared, falling on his chest added to the pearl necklaces that he had already worn. Beautiful idea.

Translate:—Then having showered down on the prince flowers of the desire-yielding-tree got by supernatural power, the eloquent being said, adding to the number of ( or brightening ) the pearl-necklaces on his broad chest by the lustre of his teeth. 52

---

**मतंगाच्छापादवलेपमूलादवाप्तवानस्मि मतंगजत्वम् ।**
**अवेहि गन्धर्वपतेस्तनूजं प्रियंवदं मां प्रियदर्शनस्य ॥ ५३ ॥**

अन्वयः—अवलेपमूलात् मतंगशापात् मतंगजत्वं अवाप्तवानस्मि । मा गन्धर्वपतेः प्रियदर्शनस्य तनूजं प्रियंवदं अवेहि ॥ ५३ ॥

## संजीविनी

मतंगेति । अवलेपमूलात् गर्वहेतुकात् " अवलेपस्तु गर्वे स्यात् लेपने भूषणेऽपि च " इति विश्वः । मतंगस्य मुनेः शापात् मतंगजत्वं [ हस्तित्वं ] अवाप्तवान् अस्मि । मां प्रियदर्शनस्य प्रियदर्शनाख्यस्य गन्धर्वपतेः गन्धर्वराजस्य तनूजं पुत्रम् । " स्त्रिया मूर्तिस्तनुस्तनूः " इत्यमरः । तन्वादेर्वा इति ऊङ् इति केचित् । प्रियंवदं प्रियंवदाख्यं अवेहि जानीहि । प्रियं वदतीति प्रियंवदः "प्रियवशे वदः खच् " इति खच् प्रत्ययः ॥ ५३ ॥

समासाः—मतंगस्य शापः ष० । अवलेपः मूलं यस्य तस्मात् बहु० । मतंगात् जातः उपपद स० । गन्धर्वाणां पतिः ष० । तनोः जातः उप० । प्रियं वदति इति उप० । प्रियं दर्शनं यस्य तस्य बहु०

विवृतिः—पुरा किलाहं परमेश्वरसेवायां व्यग्रं मतंगर्षिं खर्वस्त्वमिति उक्त्वा तं हसितवान् । यदा जातमन्युः स मां शापभाजनम करोद्यथा मतंगजो हस्ती भवेति । तस्मादहं गजः सजातः । अधुना शापमुक्तोऽहम् । अहं हि विद्याधरकुमारः प्रियदर्शनराजपुत्रः प्रियंवदनामा ॥ ५३ ॥

## NOTES.

मद् + अंगच् माद्यति अनेन इति मतंगः + जन् + ड = मतंगजः । शप् अनिष्टं भूयादिति आक्रोशे + घञ् = शापः । अव + लिप् + घञ् = अवलेपः means pride, besmearing or adorning. अव + आप् + क्त

वतु = अवातवान् p. active parti. अव + इ + लोट् = pers. Imperative sing. गन्धं अर्वति अर्व् गतौ + अच् = स्वर्गगायकः देवयोनिः " विद्याधराप्सरोयक्षरक्षोगन्धर्वकिन्नराः – देवयोनयः " । a class of semi divine beings-demi-gods. तनु or तनू fem. प्रिय and वश + वद् + खच् = प्रियंवदः वशंवदः the termi. खच् comes after वद् with प्रिय or वश as its object. ख brings अनुस्वार on these words. खित्वात् मुमागमः । उपेन्द्रवज्रावृत्तम् । प्रसादगुणः ।

Translate:—Through the curse of the sage मतंग incurred by my own insolence I was reduced to the condition of an elephant; know me to be प्रियंवद, son of प्रियदर्शन, the lord of the गन्धर्वs – demi gods. 53.

---

**स चानुनीतः प्रणतेन पश्चान्मया महर्षिर्मृदुतामगच्छत् ।**
**उष्णत्वमग्न्यातपसंप्रयोगाच्छैत्यं हि यत्सा प्रकृतिर्जलस्य ॥ ५४ ॥**

अन्वयः—स महर्षिः च प्रणतेन मया अनुनीतः सन् पश्चात् मृदुतां अगच्छत्। जलस्य हि उष्णत्व अग्न्यातपसंप्रयोगात्; यत् शैत्यं सा प्रकृतिः ॥ ५४ ॥

## संजीविनी

स इति । स महर्षिः च प्रणतेन [ नम्रेण विनीतेन ] मया अनुनीतः [ प्रार्थितः ] सन् पश्चात् मृदुता शान्ति अगच्छत् । तथाहि । जलस्य उष्णत्वं अग्नेः आतपस्य वा संप्रयोगात् संपर्कात् । न तु प्रकृत्या उष्णत्वम् । यत् शैत्यं ( शीतलत्व ) सा प्रकृतिः स्वभावः । विधेय प्राधान्यात् सा इति स्त्रीलिंगनिर्देशः । महर्षीणा शांतिरेव स्वभावः न क्रोधः इत्यर्थः ॥ ५४ ॥

समासाः—महान् ऋषिः कर्म० । अग्निः वा आतपः वा सुप्सुप्० तस्य संप्रयोगः ष०

विवृतिः—शापस्यानन्तरं दूरीकृतगर्वः प्रकृतिमापन्नोऽहं तं मुनिं प्रार्थनया स्तुतवान् यथा हे महात्मन् क्षमस्व माम् । मूढोऽहमिति । तदा तस्य क्रोधोऽपहृतः। स शान्तोऽभवत् । शमप्रधाना हि तपोधनाः । वन्हिना सूर्येण वोदकमुष्णं भवति ।

दाहकारकं भवतिजलं बाह्यकारणेन । न तु स तस्य स्वभावः । शिशिरत्वं तस्य गुणः ॥ ५४ ॥

## NOTES.

अनुनीतः and प्रणतेन p. p. p. मया कर्तरि तृ० subject of अनुनीतः। महत् is changed to महा in कर्म० । मृदोः भावः मृदुता तल् प्रत्ययः । उष्णस्यभावः त्वप्रत्ययः = घर्मता । सं + प्रयुज् + घञ् = संप्रयोगः हेतौ पंचमी । शीतः श्यै + क्त + ष्यञ्, शैत्यम् शीतस्य भावः । ष्यञ्, त्व and तल् are terminations changing nouns or adjectives into an abstract noun. प्र + कृ + क्तिन् । सा feminine of तत्, the correlative of यत् is used because its predicate विधेय viz. – प्रकृतिः which is given prominence belongs to the feminine gender. दृष्टान्तालंकारः

Translate:—Afterwards, however, being conciliated by me prostrate ( before him ), the great sage became lenient; for the heat ( appearing at times ) in water is due to its contact with fire or the sun; what is coolness is the ( real ) nature of water. 54

---

**इक्ष्वाकुवंशप्रभवो यदा ते भेत्स्यत्यजः कुंभमयोमुखेन ।**
**संयोक्ष्यसे स्वेन वपुर्महिम्ना तदेत्यवोचत्स तपोनिधिर्माम् ॥५५॥**

अन्वयः—इक्ष्वाकुवंशप्रभवः अजः यदा ते कुंभं अयोमुखेन भेत्स्यति तदा स्वेन वपुर्महिम्ना संयोक्ष्यसे इति सः तपोनिधिः मां अवोचत् ॥ ५५ ॥

## संजीविनी.

इक्ष्वाकुइति । इक्ष्वाकुवंशः ( काकुत्स्थकुल ) प्रभवः ( उत्पत्तिस्थान ) यस्य सः अजो यदा ते ( शेषेषष्ठी ) कुंभं अयोमुखेन लोहाग्रेण शरेण भेत्स्यति विदारयिष्यति ( लृट् ) तदा स्वेन ( तव ) वपुषः महिम्ना ( महता शरीरेण ) पुनः संयोक्ष्यसे संगंस्यसे ( लृट् ) इति स तपोनिधिः मां अवोचत् ( लुङ् ) अवादीत् ॥ ५५ ॥

समासा:—इक्ष्वाकूणां वंश: ष० । इ० श: प्रभव: यस्य स: बहु० । अय: मुखे यस्य बहु० । वपुष: महिमा ष० त० । तपसा निधि: ष० ।

निवृति:—स्वा सौम्यत्वमापन्न: स दयालुर्महर्षि: प्रीत: सन्नुवाच । हे गन्धर्व भविष्यति समये यस्मिन् काले सूर्यकुल उत्पन्नो दिलीपपुत्रोऽजनामा कुमारस्तव गण्डस्थलं शरेण ताडयति कपोलं विदीर्णं करिष्यति तदा त्वं शापमुक्तो भूत्वा निजकान्तदेहं प्राप्स्यसीति । सोऽयं काल आगतो मद्भाग्योदयस्येति जगाद प्रियंवद: ॥ ५५ ॥

## NOTES.

प्र + भू + अर् = प्रभव: । अयस् इ to go + असुन् iron which moves in the nearness of the magnet. एति अयस्कान्तसान्निध्यात् इति = लोहधातु: । महत: भाव: इमनिच् another termination changing a noun into an abstract noun. भेत्स्यति and सयोक्ष्यसे are second future – forms of भिद् to break and युज् with सम् passive : to unite. अवोचत् aorist 2nd variety of वच् changed to वोच् to speak. नि + धा + कि = निधि: The verse is quite easy.

Translate:— " When अज, born of इक्ष्वाकु family, will break your temple with his iron – pointed arrow, then will you be united with your splendid form : " thus did the repository of asceticism say to me. 55.

---

**संमोचित: सत्ववता त्वयाहं शापाच्चिरप्रार्थितदर्शनेन ।**
**प्रतिप्रियं चेद्भवतो न कुर्यां वृथा हि मेत्स्यात्स्वपदोपलब्धि: ॥५६॥**

अन्वय:—चिरप्रार्थितदर्शनेन सत्ववता त्वया अहं शापात् संमोचित: । भवत: प्रतिप्रिय न कुर्यां चेत् मे स्वपदोपलब्धि: वृथा स्यात् हि ॥ ५६ ॥

## संजीविनी.

स इति । चिर प्रार्थितं दर्शनं यस्य तेन सत्ववता बलवता त्वया (कर्तरि तृ०) अहं शापात् समोचित: मोक्षं प्रापित: । भवत: ( तव ) प्रतिप्रिय प्रत्युपकार न कुर्यां चेत् मे स्वपदोपलब्धि: स्वस्थानप्राप्ति: । " पदं व्यवसितत्राणस्थान

लक्ष्माङ्घ्रिवस्तुषु " इत्यमरः । वृथा स्यात् हि । तदुक्तम् " प्रतिकर्तुमशक्तस्य जीवितान्मरणं वरम् " इति ॥ ५६ ॥

समासाः—चिरं प्रार्थितं सहसुपेति स० । चि० त दर्शनं यस्य बहु० । प्रतिगत प्रिय प्रतिप्रियं प्रादि० । स्वं पदं कर्म० तस्य उपलब्धिः ष० ।

विवृतिः—हे कुमार दीर्घकालपर्यन्तमहमीश्वरं प्रार्थितवानागच्छतु शीघ्रमजोऽत्रेति । सा ममेच्छा सफला संप्रति सञ्जाता । बलवांस्त्वमत्रागत्य मम गन्धर्वदेहं मह्य पुनरपि दत्तवान् । प्रीतोऽहं त्वयि । तव सुहृदहमद्यप्रभृति । मयापि प्रत्युपकारः कर्तव्यः । निरर्थका मम स्वस्थानप्राप्तिर्भवेद्यदि तव कल्याण मया न क्रियेत ॥ ५६ ॥

## NOTES.

सम् + मुच् + णिच् + क्त । सत्त्व + मतुप् possessive termination. प्री + क = प्रियम् । भू + डवतु = भवान् your honour उप + लभ् + क्तिन् । वैदर्भी रीतिः simple style.

Translate:— I have been freed from the curse by you of great power whose sight had long been cherished by me. If I shall not do any good thing in return for you, then the restoration to my former position will surely be useless. 56.

---

**संमोहनं नाम सखे ममास्त्रं प्रयोगसंहारविभक्तमंत्रम् ।**
**गान्धर्वमादत्स्व यतः प्रयोक्तुर्न चारिहिंसा विजयश्च हस्ते ॥५७॥**

अन्वयः—सखे, यतः प्रयोक्तुः न च अरिहिंसा विजयश्च हस्ते ( तत् ) प्रयोगसंहारविभक्तमन्त्रं गान्धर्वं संमोहनं नाम मम अस्त्रं आदत्स्व ॥ ५७ ॥

## संजीविनी

संमोहन इति । हे सखे ( मित्र ) [ सखिशब्देन समप्राणता उक्ता । यथोक्तम्— " अत्यागसहनो बन्धुः सदैवानुमतः सुहृत् । एकक्रियं भवेन्मित्र समप्राणः सखा मतः ॥ " ] प्रयोगसंहारयोः विभक्तमंत्रं ( प्रेरणसंक्षेपयोः भिन्नबीजाक्षर ) गान्धर्वं गन्धर्व देवताक समोह्यते अनेन इति संमोहन ( प्रस्वापन ) नाम ( प्रसिद्धं तदाख्य वा मम ) अस्त्रं ( मंत्रप्रयोगार्ह शस्त्रं ) आदत्स्व । गृहाण तयः अस्त्रात्

प्रयोक्तुः अस्त्रप्रयोगिणः अरिहिंसा ( शत्रुमारणं ) न च । विजयः ( सिद्धिः शत्रुपराजयः ) च हस्ते ( करस्थितः ) हस्तगतः विजयो भवति इत्यर्थः ॥ ५७ ॥

समासाः— प्रयोगश्च संहारश्च प्रयोगसंहारौ द्वंद्वः । विभक्तः मंत्रः यस्य बहु० । तयोः विभिन्नः ष० त० । अरेः हिंसा ष० त० । विशिष्टः जयः प्रादि० ।

विवृतिः— प्रत्युपकारः कर्तव्यः । अत एवाहं गन्धर्वदेवताकं संमोहनं नाम प्रसिद्धमस्त्रं प्रयच्छामि । इदं प्रेमदानं भवता स्वीकर्तव्यम् । अस्यास्त्रस्य क्षेपेण शत्रुर्नम्रियते किन्तु निःसंज्ञः सन् प्रस्वपिति । तेन च तव यशः स्यात् । मा हिंस्यात्सर्वभूतानि इति श्रुतेराज्ञा पाल्यते च । अस्य बीजाक्षरसमूहमधुना त्वामध्यापयामि । तस्मिन्मन्त्रे पठिते सति शत्रोरुपरि प्रभावो दृश्येत । अस्य विधाता कश्चिद्विद्याधरः ॥ ५७ ॥

## NOTES.

सं + मुह् वैचित्ये to swoon, मुह्यति + णिच् + ल्युट् = संमोहनं that which makes one faint or sleep : a kind of missile which, being used against the enemy, would cause him to sleep or to swoon. प्रयुज् + घञ् । सं + हृ+ घञ् वि + भज् क्त । मन्त्रयते – मन्त्र् गुप्तभाषणे + अच् = मन्त्रः । गन्धर्व + अण् = गान्धर्वम् । आ + दा to take आदत्स्व Impera. 2nd pers. sing. Atm. प्र + युज् + तृच् = प्रयोक्तृ । वि + जि + अच् = विजयः । विजयोहस्ते is a popular saying, homely style of speech.

Translate: — Friend, take my missile by name संमोहन, presided over by a गन्धर्व, which has different incantations for discharging and withdrawing and by the use of which the victory easily falls on the hand of ( is within the reach of ) the user without ( incurring the sin of ) inflicting death on the enemy. 57.

---

**अलंह्रिया मां प्रति यन्मुहूर्तं दयापरोऽभूः प्रहरन्नपि त्वम् ।**
**तस्मादुपच्छन्दयति प्रयोज्यं मयि त्वया न प्रतिषेधरौक्ष्यम् ॥५८॥**

अन्वयः— मां प्रति ह्रिया अलं यत् त्वं ( मां ) प्रहरन्नपि मुहूर्तं दयापरः अभूः । तस्मात् उपच्छन्दयति मयि त्वया प्रतिषेधरौक्ष्यं न प्रयोज्यम् ॥ ५८ ॥

## संजीविनी.

वधलज्जितः कथमस्त्रग्रहणपरः स्याम् इति चेत्तत्राह । अलमिति । किं च मां प्रति ( मद्विषये ) ह्रिया प्रहारनिमित्तया ( लज्जया ) अलम् ( साध्यं नास्ति इत्यर्थः करणे तृतीया ) कुतः ? यत् यतः हेतोः त्वं मा प्रहरन्नपि ( मयि बाणं अस्यन्नपि ) मुहूर्तं (क्षणमात्र) दयापरः कृपालुः अभूः ( अभवः लुङ् ) । तस्मात् उपच्छन्दयति प्रार्थयमाने मयि ( अधिकरणे ) त्वया ( कर्तरि तृतीया ) प्रतिषेधः परिहारः ( गन्धर्वास्त्र न गृह्णामीति ) स एव रौक्ष्यं पारुष्य । तत् न प्रयोज्य न कर्तव्यम् ॥ ५८ ॥

समासा: — दयाया परः स० त० दया एव परं प्रधानं यस्य इति वा बहु० । प्रतिषेधः एव रौक्ष्यम् कर्म० ।

विवृतिः— कृत लज्जया विनयेन वा । त्व मम सुहृद् । बाणक्षेपसमयेऽपि त्वया मृदुत्वं दर्शितम् । क्षत्रियोऽपिकृपालुस्त्वं धीरोदात्तः । मित्रेण मित्रात्प्रेमदानं स्वीकर्तव्यम् । इय मम प्रथमा प्रार्थना । नाहं गृह्णामीति वचनेन त्वया परुषेण न भाव्यम् । अतो गृहाणैवैतन्मन्त्रम् ॥ ५८ ॥

## NOTES.

अलम् governs instrumental. ह्री लज्जायां to feel shame. जिह्रेति 3rd conj. + क्विप् । प्रति governs accus. दय् + अङ् = दया । अभूः aorist. प्र + हृ + शतृ – अत् pres. parti. प्रहरत् । उप + छन्द् 10th conj. P. to flatter, coax + शतृ pres. part. उपछन्दयत् । उ० ति loc. adj. to मयि । प्र + युज् + ण्यत् = प्रयोज्यम् । प्रति + सिध् + घञ् प्रतिषेधः । रूक्ष + ष्यञ् भावे रौक्ष्यम्.

Translate:— Do not be ashamed in-as-much as you, though striking, were, for a moment, kind to me ( or striking for a moment, felt pity for me. ) Therefore do not use the harshness of a refusal towards me who am requesting you. 58.

**तथेत्युपस्पृश्य पयः पवित्रं सोमोद्भवायाः सरितो नृसोमः ।**
**उदङ्मुखः सोऽस्त्रविदस्त्रमन्त्रं जग्राह तस्मान्निगृहीतशापात् ॥५९॥**

अन्वयः--तथा इति । सोमोद्भवायाः सरितः पवित्रं पयः उपस्पृश्य अस्त्रवित् नृसोमः सः उदङ्मुखः सन् निगृहीत शापात् तस्मात् अस्त्रमन्त्रं जग्राह ॥ ५९ ॥

## संजीविनी

तथेति । ना सोमः चन्द्र इव नृसोमः उपमितसमासः । " सोमः औषधि-चन्द्रयोः " इति शाश्वतः । पुरुषश्रेष्ठः इत्यर्थः । अस्त्रवित् अस्त्रज्ञः सो अजः तथा इति ( ॐ इति उक्त्वा ) सोमः उद्भवः ( उत्पत्तिस्थान ) यस्याः सा ( बहु० ) तस्याः सरितः नर्मदायाः " रेवा तु नर्मदा सोमोद्भवा मेखलकन्यका " इत्यमरः । पवित्र ( पूतं ) पयः ( जलं ) उपस्पृश्य पीत्वा आचम्य इत्यर्थः । उदङ्मुखः ( उत्तराभिमुखाननः) सन् निगृहीतशापात् निवर्तितशापात् । उपकृतात् इत्यर्थः । तस्मात् प्रियंवदात् ( आख्यातोपयोगे इति पंचमी ) अस्त्रमन्त्र जग्राह ( स्वीकृत-वान् ) लिट् ॥ ५९ ॥

समासाः---सोमोद्भवा बहु० । नृसोमः उपमित कर्म० । उदङ्मुख यस्य बहु०। अस्त्राणि वेत्ति उप० । अस्त्रस्य मन्त्रः ष० त० । निगृहीतः शापः यस्मात् बहु० ।

विवृतिः---चन्द्र इवानन्ददायकः स शस्त्रास्त्रकलाभिज्ञो राघवोऽज ओमित्युक्त्वा चन्द्रकन्यकाया नर्मदानद्याः पूतोदकमाचम्योत्तरायां दिश्यानन कृत्वोपकृतात्तस्मात् प्रियवदगन्धर्वादस्त्राधिष्ठातृदेवमन्त्र स्वीकृतवान् ॥ ५९ ॥

## NOTES.

तथा = yes. उप + स्पृश् + ल्यप् absolutive. पा + असुन् = पयः पीयते इति । पू + इत्र = पवित्रम् । सु + मन् = सोमः = a drug, The moon, कर्पूरः, कुबेरः, यमः, वायुः, जल, किरणं, अमृतं etc. उद् + भू + अप् = उद्भव. । सृ + इति = सरित् । उदीची + अस्ताति = उदक् अस्ताति being dropped. उद् + अञ्च् + क्विन् = उदच् । अव्ययम् indecl. अस्त्र + विद् + क्विप् । नि + ग्रह + क्त । नर्म ददातीति नर्मदा pleasure-giving like the moon from which she is called सोमोद्भवा sprung from the moon; or पुरूरवस् the grandson of the moon dug it as भगीरथ dug the Ganges–dug out a channel for it and so सोमोद्भवा.

Translate:— " All right, let it be so " with these words that moon-like prince–Aja-expert in missiles, sipped the sacred water of the moon-sprung river Narmada, with his face turned towards the North, and learnt the spell of the missile from him from whom the curse was withdrawn.. 59

---

**एवं तयोरध्वनि दैवयोगादासेदुषोः सख्यमचिन्त्यहेतु ।**
**एको ययौ चैत्ररथप्रदेशान् सौराज्यरम्यानपरो विदर्भान् ॥ ६० ॥**

अन्वयः— एव अध्वनि दैवयोगात् अचिन्त्यहेतु सख्य आसेदुषोः तयोः ( मध्ये ) एकः चैत्ररथप्रदेशान् ययौ अपरः सौराज्यरम्यान् विदर्भान् ॥ ६० ॥

## संजीविनी

एवमिति । एव ( इत्थ ) अध्वनि मार्गे ( अधिकरणे स० ) दैवयोगात् भाग्य-वशात् ( हेतौ प० ) अचिन्त्यहेतु अनिर्धार्यहेतुकं सख्यं सखित्वं " सख्युर्यः " इति यप्रत्ययः । आसेदुषोः प्राप्तवतोः तयोः मध्ये एकः गन्धर्वः चैत्ररथस्य कुबेरो-द्यानस्य प्रदेशान् " अस्योद्यान चैत्ररथ " इत्यमरः । अपरः अजः सौराज्येन राजन्वत्तया रम्यान् ( मनोहरान् ) विदर्भान् ( क्रथकैशिकदेशं ) ययौ ( जगाम् ) लिट् ॥ ६० ॥

समासाः— दैवस्य योगः ष० । न चिन्त्य नञ् । अचिन्त्यः हेतुः यस्य बहु० । तत् । चैत्ररथस्य प्रदेशः ष० त० । सौराज्येन रम्याः तृ० त० । शोभनः राजा यस्य सुराजा बहु० । तस्य भावः सौराज्यम् ।

विवृतिः— विचित्रा खलु भाग्यगतिः । अजस्य गन्धर्वेण सह मैत्रं जायेत तस्माच्च स समोहनास्त्रं प्राप्नुयादिति केन मतम् । इत्थं तौ परस्पर सुहृद कृत्वा निजेष्टस्थान गतौ । गन्धर्वोऽलकानगरी गतोऽजश्च विदर्भदेशम् यस्तावद्भोजराज प्राप्य सुख्यासीत् ॥ ६० ॥

## NOTES.

देवात् आगत दैव अण् । आ + सद् + क्वसु = आसेदिवस् perf. parti. आसेदुषोः loc. dual mas. सखि + य = सख्यम् । चि॰त् + यत् कर्मणि = चिन्त्यः pote. pas. part. हि + तुन् = हेतुः । प्र + दिश् + घञ् = प्रदेशः ।

सु + राजन् + ष्यञ् = सौराज्यम् good government. रम्यतेऽत्र रम् + यत् = रम्यम् । विदर्भान् names of countries are put in the plural. इन्द्रवज्रावृत्तम् ।

Translate:— Out of them two who in this way formed quite accidentally on the way friendship. The cause of which could not be conceived, one went to the regions of Chaitraratha and the other to the country of Vidarbha, pleasing on account of good government.

---

**तं तस्थिवांसं नगरोपकण्ठे तदागमारूढगुरुप्रहर्षः ।**
**प्रत्युज्जगाम क्रथकैशिकेन्द्रश्चन्द्रं प्रवृद्धोर्मिरिवोर्मिमाली ॥ ६१ ॥**

अन्वयः— तदागमारूढगुरुप्रहर्षः क्रथकैशिकेन्द्रः प्रवृद्धोर्मिः ऊर्मिमाली चन्द्रं इव, नगरोपकण्ठे तस्थिवासं तं प्रत्युज्जगाम ॥ ६१ ॥

## संजीविनी.

तमिति । नगरस्य ( पुर्याः ) उपकण्ठे समीपे तस्थिवांसं स्थितं तं अजं तस्य अजस्य आगमेन ( ष० त० ) आरूढः उत्पन्नः ( तृ० त० ) गुरुः ( महान् ) प्रहर्षः यस्य ( बहु० ) सः क्रथकैशिकेन्द्रः विदर्भराजः प्रवृद्धोर्मिः ( चन्द्रागमेन उद्गततरंगः अतएव प्रहृष्टः ) ऊर्मिमाली समुद्रः चन्द्रं इव ( यथा ) प्रत्युज्जगाम ( प्रत्युद्ययौ ) लिट् ॥ ६१ ॥

समासाः— कण्ठस्य समीपे उपकण्ठे अव्ययीभावः नगरस्य उपकण्ठे ष० । तदागमः ष० । तेन आरूढः तृ० । अत एव गुरुः कर्म० । प्रकृष्टः हर्षः प्रादि० । त० गुरुः प्रहर्षः यस्य बहु० । क्रथकैशिकाना इन्द्रः ष० । प्रवृद्धाः ऊर्मयः यस्य बहु० । ऊर्मिभिः मालते ( शोभते ) इति उप० or ऊर्मीणां मालाः ष० ऊर्मिमालाः सन्ति अस्य इनि प्रत्ययः ।

विवृतिः— रात्रौ यदा कुमुदबांधव उदेति तदा समुद्रः प्रमुदितो भवति तं च समानायितुं रत्नाकरोऽग्रे गच्छति तरंगहस्तान् प्रसारयति च तथैव यदा भोजो रघुपुत्र आगत इति श्रुतवांस्तदा सोऽतीवानन्दितस्तस्या तिथ्यं कर्तुं विदर्भाद्बहिर्यत्र स न्यवसत्तत्र त्वरया ययौ ॥ ६१ ॥

## NOTES.

स्था + क्वसु = तस्थिवस् perf. parti. adj. to तम् । आ + रुह् + क्त = आरूढः । प्र + हृष् + घञ् = प्रहर्षः । प्रति + उत् + गम् + लिट् went forward to receive. क्रथकैशिक or विदर्भ or महाराष्ट्र great province, Berar, lay to the south of the river नर्मदा. विदर्भ a king had two sons क्रथ and कैशिक from whom the विदर्भ came to be called क्रथकैशिक. भोजs are said to be descendants of a king called द्रुह्यु. प्र + वृध् + क्त । ऋ + मि = ऊर् + मि = ऊर्मिः mas. fem. उपमालङ्कारः । उपजातिवृत्तम् । वैदर्भी रीतिः । प्रसादगुणः

Translate:— The lord of the क्रथकैशिकs, with great joy risen ( in his heart ) on account of the arrival of him ( Aja ), went forward to receive him who had halted in the vicinity of the city, just as the ocean, greatly delighted at the rise of the moon with swollen waves, goes forward to receive the moon. 61.

---

**प्रवेश्य चैनं पुरमग्रयायी नीचैस्तथोपाचरदर्पितश्रीः ।**
**मेने यथा तत्र जनः समेतो वैदर्भमागन्तुमजं गृहेशम् ॥ ६२ ॥**

अन्वयः— अग्रयायी च एन पुरं प्रवेश्य अर्पितश्रीः नीचैः तथा उपाचरत् यथा तत्र समेतः जनः वैदर्भं भोजं आगन्तुं अज गृहेशं मेने ॥ ६२ ॥

### संजीविनी

प्रवेश्य इति । एनं अजं अग्रयायी । सेवाधर्मेण पुरः गच्छन् इत्यर्थः । नीचैः नम्रः पुर प्रवेश्य प्रवेश कारयित्वा प्रीत्या अर्पितश्रीः ( दत्तराजचिन्हः ) तथा तेन प्रकारेण उपाचरत् उपचरितवान् ( आदरितवान् ) यथा येन प्रकारेण तत्र पुरे समेतः मिलितः जनः वैदर्भ भोजं आगन्तुं प्राघूर्णिकं ( अतिथिं " पाहुणा " इति महाराष्ट्र भाषायां ) मेने । अज गृहेश गृहपतिं मेने । (चिन्तितवान् लिट्) ॥६२॥

समासाः— अग्रे याति इति अग्रयायिन् उप० । अर्पिता श्रीः येन सः बहु० । गृहस्य ईशः ष० त० ।

विवृतिः-- भोजराजोऽजस्यादरं कृत्वा तस्य पुरतो गत्वा तेन सह राजधानीमागतः। राजमन्दिरं प्राप्य पश्यत्सु तत्र स्वयंवरदर्शनार्थमागतेषु लोकेषु सोऽजाय च्छत्रचामरादिराजचिह्नादिना साधु पूजासंमानादिकं दत्तवान्। तद् दृष्ट्वा कस्याप्यनभिज्ञस्य मनसि यद्येषा संभावनाऽभवद्यथायमजएव विदर्भराजो भोजस्तु स्वयंवरार्थमागतः कश्चित् प्राघूर्णिक इति न किमप्याश्चर्यं तत्र। अनेन भोजराजस्य विनयमाहात्म्यं संमानकौशल्यं च दृश्यते ॥ ६२ ॥

## NOTES.

. प्र + विश् + णिच् ( causal ) + ल्यप् = प्रवेश्य । एन optional form of एतं accu. sing. masc. of एतत् । अग्र + या + णिनिः = अग्रयायी । नीचैः Indi. see the uses of यथा–तथा from Apte's Giude. ऋ + णिच् + क्त = अर्पित । अर्पितश्रीः कप् being समासान्त augment and so optional is not used here: समासान्तविधिः अनित्यः It can be अर्पितश्रीकः by नद्यृतश्चकप् । सम् + आ + इ + क्त = समेतः । जनः used in the sense of the plural: जातौ एकवचनम् । विदर्भाणां राजा वैदर्भः अण् प्रत्ययः । आ + गम् + तुन् = आगन्तुः guest.

Translate:— And having made him enter the city, himself walking in front, he offered him the royal fortune and humbly waited upon him in such a way that the people assembled there thought the lord of the Vidarbhas to be the guest and Aja to be the lord of the house–the host. 62.

---

**तस्याधिकारपुरुषैः प्रणतैः प्रदिष्टाम्**
**प्राग्द्वारवेदिविनिवेशितपूर्णकुम्भाम्।**
**रम्यां रघुप्रतिनिधिः स नवोपकार्याम्**
**बाल्यात्परामिव दशां मदनोऽध्युवास ॥ ६३ ॥**

अन्वयः—रघुप्रतिनिधिः सः प्रणतैः तस्य अधिकारपुरुषैः प्रदिष्टां प्राग्द्वार... भाम् रम्यां नवोपकार्यां मदनः बाल्यात्परां दशां इव अध्युवास ॥ ६३ ॥

## संजीविनी.

तस्येति। रघुप्रतिनिधिः रघुकल्पः रघुतुल्यः इत्यर्थः। उक्तं च दण्डिना सादृश्य-

वाचकप्रस्तावे—" कल्पदेशीयदेश्यादि प्रख्यप्रतिनिधी अपि " इति । सः अजः प्रणतैः नमस्कृतवद्भिः । कर्तरिक्तः । तस्य भोजस्य अधिकारः नियोगः तस्य पुरुषैः अधिकृतैः इत्यर्थः । प्रदिष्टां निर्दिष्टा ( प्रदर्शितां ) प्राग्द्वारस्य ( अग्रकपाटस्य ) वेद्यां ( आलिन्दे–प्रकोष्ठे ) विनिवेशितः प्रतिष्ठापितः पूर्णकुंभः ( जलपूरितकलशः) यस्या ताम्: । स्थापितमंगलकलशा इत्यर्थः । रम्या रमणीयां नवोपकार्यां नूतन राजभवनम् । " उपकार्या राजसद्मन्युपकारोचितेऽन्यवत् " इति विश्वः । मदनः ( पंचबाणः ) बाल्यात्परां शैशवादनन्तरा दशा (अवस्थां) इव । यौवनमिवेत्यर्थः । अध्युवास ( लिट् ) अधिष्ठितवान् तत्रउषितवानित्यर्थः । ' उपान्वध्याङ्वसः " इति कर्मत्वम् ( सर्गान्ते भिन्नवृत्ते इतः दशश्लोकाः । वसन्ततिलकावृत्तम् )॥६३॥

समासाः—अधिकारस्य पुरुषाः ष० । प्राग्द्वार कर्म० । तस्य वेदिः–दी ष० । or प्राग् द्वार यस्याः सा प्राग्द्वारा सा चासौदिश्च ( बहु० and कर्म० ) तस्या निवेशितः स पूर्णः कुंभः कर्म० प्रा–तः पूर्णकुंभः यस्याः बहु० । ताम् । रघोः प्रतिनिधिः ष० त० । नवा उपकार्या कर्म० ।

विवृति.—अथ नमस्कार कृतवद्भिः भोजस्यामात्यैः स रघुतुल्यपराक्रमोऽजो नूतन मनोहर राजप्रासाद नीतः । तस्मिन् सोऽवसत् । स्मरो यथा यौवनमधितिष्ठति तथा राजपुत्रो राजभवनमधितष्ठो । अस्य पूर्वकपाटाद्बहिर्देशे प्रकोष्ठे जलभरिता मंगलकलशाः स्थापिताआसन् ॥ ६३ ॥

## NOTES.

अधि + कृ + घञ् = अधिकारः । पुरि देहे शेते पुरुषः पृषोदरादिः । प्र + नम् + क्त = प्रणतः used in active sense कर्तरि । प्र + दिश् + क्त = प्रदिष्ट । प्र + अच् + क्विन् = प्राच् ( प्राङ् प्राञ्चौ प्राञ्च etc ) दृ संवरणे to cover द्वरति + घञ् = द्वारं or दृ + णिच् + अच् = द्वार । वि + नि + विश् + णिच् + क्त = विनिवेशित । पूर् पूर्यते + क्त = पूर्ण । प्रति + नि + धा + कि = प्रतिनिधीयते तुल्यरूपतया स्थाप्यते = प्रतिनिधिः । नु + अप् = नवः । बालस्य भावः ष्यञ् । माद्यति अनेन मदनः मद् करणे ल्युट् । वस् with उप, अनु, अधि or आ governs the accusative of the place where one lives. The metre changes towards the end of a canto; this is वसन्ततिलका. ज्ञेया वसन्ततिलका तभजाजगौगः इति लक्षणम् । उपमालंकारः ।

Translate:— He, the representative of Raghu, occupied the beautiful and new palace, shown by his–Bhoja's–officers who bowed down, in the porch of the front–door of which was placed ( or were placed ) a pitcher ( or pitchers ) full of water, just as cupid accupies the state after childhood ( youth. ) 63

---

तत्र स्वयंवरसमाहृतराजलोकं
कन्याललाम कमनीयमजस्य लिप्सोः ।
भावावबोधकलुषा दयितेव रात्रौ
निद्रा चिरेण नयनाभिमुखी बभूव ॥ ६४ ॥

अन्वयः––तत्र स्वयं–लोकं कमनीयं कन्याललाम लिप्सोः अजस्य भावा...तेव रात्रौ...बभूव ॥ ६४ ॥

## संजीविनी.

तत्रेति । तत्र उपकार्यायाम् । स्वयवरनिमित्तं समाहृतः समेलितः राजलोकः येन तत् कमनीयं स्पृहणीयं कन्याललाम कन्यासु श्रेष्ठं ( कुमारीरत्नं ) " ललामोऽस्त्री ललामापि प्रभावे पुरुषे ध्वजे । श्रेष्ठभूषाशुण्डशृंगपुच्छचिन्हाश्वलिंगिषु " । इति यादवः । लिप्सोः लब्धु इच्छोः । लभेः सन्नन्तात् उ प्रत्ययः । अजस्य भावावबोधे पुरुषस्य अभिप्रायपरिज्ञाने कलुषा असमर्था दयिता ( पत्नी ) इव रात्रौ निद्रा चिरेण नयनाभिमुखी बभूव । "राजानं कामिनं चौर प्रविशान्ति प्रजागराः" इतिभावः । अभिमुखीशब्दः ङीषन्तः च्व्यन्तः वा ॥ ६४ ॥

समासाः—स्वयं वरः सुप् सुप् । स्वयवरार्थं समाहृतः मध्यम० । राज्ञा लोकः ष० । स्वय–तः राजलोकः येन बहु० । कन्यासु ललाम स० । भावस्य अवबोधः ष० । तस्मिन् कलुषा स० । अभिगतं मुखं यस्याः बहु० । नयनयोः अभिमुखी स० ।

विवृतिः—सोऽजः प्रासादे निशायां शयितः किन्तु तस्य मनो भोजराजभ्या–मिन्दुमत्यां लग्नमासीत् । यस्याः स्वयवरार्थमीदृशोऽसख्या नृपा आगताः सा कीदृशी रमणीया स्यात् । दिव्येन तेन कुमारीरत्नेन भाव्यमिति चिन्ता तस्मै स्वापसुखं दीर्घकाल न ददौ । यथा भर्तुरभिप्रायमज्ञातवती भार्या प्रियापि दीर्घसमय-

पर्यन्तं नागच्छति भर्तारं तथैवायमजोमामिच्छति न वेत्यनधिगच्छन्ती निद्रापि तं प्रति नययौ ॥ ६४ ॥

## NOTES.

वृ + अप् = वरः । स + आ + हृ + क्त । लल् to sport + अच् = ललः तं अमति गच्छति अम् + अण् = ललाम or ललामन् mas. fe. and neuter means power, symbol, banner, eminence, ornament, trunk of an elephant, tail, horn, horse and one having a mark. लभ् + सन् + उ = लिप्सुः desiderative. कल् + उषच् = कलुषा । दय् + क्त + टाप् = दयिता । अभिमुखीबभूव may be taken to be a च्वि formation. अनभिमुखी अभिमुखी बभूव where मुख is changed to – मुखी by " अस्य च्वौ " ईत् अवर्णस्य or – मुख + ङीष् । " यदातु मनसि क्लान्ते कर्मात्मानः क्लमान्विताः । विषयेभ्यो निवर्तन्ते तदा स्वपिति मानवः " " बहुषु स्थितेषु मा कन्या वृणीत न वा इति आकुलत्वात् चिरेण निद्रामगमत् " Just as a loving wife who is displeased with her husband on account of his infidelity reluctantly comes to him after a very long time, in the same way sleep came to him very late in the night. उपमा । वसन्ततिलका । माधुर्यम् ।

Translate:—There like a beloved unable to know the feelings ( of her lord ) [ or perturbed at the knowledge of the ( faithless) love of her husband towards her ] sleep came late at night before the eyes of Aja who desired to get the lovely ornament of maidens whose self-electing marriaga had caused a world of princes to assemble there. 64

N. B.—मल्लिनाथ takes कलुषा to mean to असमर्था which would mean that the wife does not come early to her husband as she finds him engaged in something and so cannot understand how she would be received by

him; in the same way Aja was engaged in thoughts about इन्दुमती and so sleep did not want to disturb him. This is like a simple wife free from jealousy. But कलुषा means ' ' excited, muddy ' and not असमर्था incapable and so it should mean: निद्रा feels jealousy for her rival इन्दुमती who is in the mind of अज and so, getting angry she does not come to him whom she takes to be faithless. कालिदास must have meant the second sense and not the first chaste sense which मल्लि० appears to ascribe to him..

---

तं कर्णभूषणनिपीडितपीवरांसं
शय्योत्तरच्छदविमर्दकृशांगरागम् ।
सूतात्मजाः सवयसः प्रथितप्रबोधं
प्राबोधयन्नुषसि वाग्भिरुदारवाचः ॥ ६५ ॥

अन्वयः—कर्ण...रागं प्रथितप्रबोधं तं सवयः उदारवाचः सूतात्मजाः वाग्भिः उषसि प्राबोधयन् ॥ ६५ ॥

## संजीविनी.

तमिति । कर्णभूषणाभ्यां ( श्रवणकुण्डलाभ्यां ) निपीडितौ ( संघट्टितौ पीवरौ पीनौ अंसौ ( स्कधौ ) यस्य तम् । शय्यायाः ( तल्पस्य ) उत्तरच्छदस्य उपर्यास्तरणवस्त्रस्य विमर्देन घर्षणेन कृशः ( दूरीकृतः ) विमलः अंगरागः ( गात्रविलेपः ) यस्य तम् । न तु अंगनासंगात् इति भावः । प्रथितप्रबोधं प्रकृष्टज्ञान तं एनं अजं सवयसः समानवयस्काः उदारवाचः प्रगल्भगिरः सूतात्मजाः बन्दिपुत्राः वाग्भिः ( ललितबन्धकाव्यैः ) स्तुतिपाठैः उषसि ( प्रातः ) प्राबोधयन् प्रबोधयामासुः ( मधुरगानेन हि प्रभूणां प्रजागरः क्रियते ) ॥६५॥

समासाः—कर्णयोः भूषणे ष० । ताभ्यां निपीडितौ तृ० । पीवरौ च तौ असौ च कर्म० । कर्ण० तौ पीवरांसौ यस्य बहु० । उत्तरः छदः कर्म० । शय्यायाः उत्तरच्छदः ष० । तस्यविमर्दः ष० । तेन कृशः तृ० । अंगस्य रागः ष० । शय्या – कृशः अंगरागः यस्य बहु० । आत्मनः जाताः उप० । सूतानां

आत्मजाः ष० । समानं वयः येषां ते बहु० । प्रथितः प्रबोधः यस्य बहु० प्रकृष्टः बोधः प्रादि० । उदारा वाग् येषां ते बहु० ।

विवृतिः—" मृदुभिर्मर्दनैः पादे शीतैर्व्यजनकैस्तथा । श्रुतौ वा मधुरैर्गानै-र्निद्रातो बोधयेत् प्रभुमिति वचनानुसारेण प्रातः काले युवानः प्रगल्भभाषणकुशला मधुरकण्ठा वैतालिका भैरवरागेण गानं प्रारब्धवन्तो येन राजपुत्रस्य प्रभोर्निद्रा दूरीभवेत् । बुद्धिमान् प्राज्ञोऽजो निशायाश्चरमेभागे निद्रा गतः । तस्य पीन-स्कन्धाभ्यां श्रवणस्थे कुण्डले संघट्टिते बभूवतुः । तथाच मनः कल्पनां दूरीकर्तुं स प्रतिक्षणं निजतल्पे व्यलुठत् तेन तस्य शरीरे कृत कुंकुमकेशरचन्दनादिविलेपन-मपि हृतम् । एताभ्यां विशेषणाभ्यां तस्य मनःक्षोभः सूच्यते ॥ ६५ ॥

## NOTES.

भूष्यतेऽनेन इति भूषणम् भूष् + ल्युट् । नि (नितरां) + पीड् + क्त = निपी-डित । प्यै + ष्वरच् = पीवरः । शी + क्यप् = शय्या । उत् + तृ + अप् = उत्तरः । छद् + क = छदः । वि + मृद् + घञ् = विमर्दः । कृश् + क्त = कृशः अंग रज्यते अनेन इति अंगरागः अग + रंज् + घञ् करणे । आत्मन् + जन् + ड = आत्मजाः । प्रथ् + क्त = प्रथित । प्र + बुध + घञ् = प्रबोधः । उद् + आ + रा + क = उदार । उच्यते असौ अनया वा = वच् + क्विप्=वाच् । स्वभा-वोक्तिः अलंकारः as the description given here is quite natural and realistic Reading this one can see before his mental eye the picture of a man resting his head on his arms serving as a pillow, when he is uneasy and contemplating. The unguent is removed as in his restless mood he rolls on the bed from this side to that. ओजोगुणः containing long and many compounds. अनुप्रासः शब्दालङ्कारः alliteration as प्र, स, र etc. are repeated.

Translation.—At dawn the sons of bards, of the same age and of noble speech, with songs awakened him who was of celebrated talents, whose muscular shoulders were closely pressed against his earornaments and the unguent on whose body had become

thin ( almost removed ) on account of being rubbed against the surface-sheets of his bed. 65

रात्रिर्गता मतिमतां वर मुंच शय्यां
धात्रा द्विधैव ननु धूर्जगतो विभक्ता ।
तामेकतस्तव बिभर्ति गुरुर्विनिद्र-
स्तस्या भवानपरधुर्यपदावलम्बी ॥ ६६ ॥

अन्वयः— हे मतिमतां वर, रात्रिः गता; शय्यां मुंच; धात्रा जगतः धूः द्विधैव विभक्ता ननु । तां एकतः तव गुरुः विनिद्रः सन् बिभर्ति; तस्याः अपरपदावलम्बी भवान् ॥ ६६ ॥

## संजीविनी.

रात्रिः इति । हे मतिमतांवर ( विदुषां श्रेष्ठ ) निर्धारणे षष्ठी । रात्रिः गता । शय्या मुंच । विनिद्रो भव इत्यर्थः । विनिद्रत्वे फलमाह । धात्रेति । धात्रा ब्रह्मणा जगतः धूः भारः । " धूःस्यात् यानमुखे भारे " इति यादवः । द्विधैव । द्वयोः एव इत्यर्थः । एवकारः तृतीयनिषेधार्थः । विभक्ता ननु विभज्य स्थापिता खलु । तत् किं अतः आह । ता धुर एकतः एककोटौ तव गुरुः पिता विनिद्रः ( निरालस्यः ) सन् बिभर्ति ( धारयति ) । तस्याः धुरः ( युवराजत्वात् ) भवान् (त्व) धुर वहतीति धुर्यः भारवाही । तस्य पदं वहनस्थानम् : अपरं यत् धुर्यपद तद्वलंबी : ततः विनिद्रो भव इत्यर्थः । नहि उभयवाह्यं एको वहतीति भावः ॥६६॥

समासाः— विगता निद्रा यस्य बहु० : धुर्यस्य पद ष० : अपरं धुर्यपद कर्म० : तद् अवलम्बते इति उपपद० ।

विवृतिः— हे विदग्धानामग्रणीः, रजनी तावद्याता, प्रभातप्राया निशा । सूर्योदयसमयोऽयम् । अत एव पर्यंकं त्यक्त्वा निषीदतु भवान् । निद्रिते त्वयि राज्यकार्यं कः करोति । अपि ब्रह्मदेवेन लोकपालत्वं रघुराजे युवराजे च त्वयि न स्थापितम् ? द्विमुखस्य राज्यशकटस्यैकं भाग तव पिताऽऽलस्यं विहाय भजति । द्वितीयो भागस्त्वयैव धारणीयः खलु । तस्मात् त्यज् तल्पम् मुञ्च मचम् भव विनिद्रः ॥ ६६ ॥

## NOTES.

The verse is quite easy with two compounds belong-

ing to वैदर्भी style. मति + मतुप् possessive termi. धा + तृच् = धातृ । द्विधा = द्विप्रकारं द्वि + धाच् । धूर्व् हिंसायां धूर्वति +क्विप् धुर् ( धुरा with टाप् ) रथाद्यग्रभागे । धूः धुरौ धुरः etc. । धुरं वहति इति धुर्यः यत् (with ख धुरीणः) वि + भज् + क्त + टाप् = विभक्ता । The burden of the administration is divided between the two. धुर्य means a bull joined to the yoke. धुर्यपद the place where the animal is joined : The end of the yoke. तत् अवलम्बते इति णिनिप्रत्ययः । एव in द्विधैव is used to debar the idea of any third person. नहिद्वभय - one cannot bear the burden which should be borne by two. एक + तसिल् = एकतः on one side – on the other side एकत तवपिता एकतः or अपरतः त्वम् ।

Translate:—The night is gone, oh best of the talented; leave your bed; the yoke of the world is, indeed, divided by the creator between the two only; your father, being ever wide awake, bears it at one end; you are the holder of the place of the other supporter: you bear it at the other end. 66.

---

**निद्रावशेन भवताप्यनवेक्षमाणा**
**पर्युत्सुकत्वमबला निशि खण्डितेव ।**
**लक्ष्मीर्विनोदयति येन दिगन्तलम्बी**
**सोऽपि त्वदाननरुचिं विजहाति चन्द्रः ॥ ६७ ॥**

अन्वयः— निद्रा वशेन भवता पर्युत्सुकत्व अपि निशि खण्डिता अबला इव, लक्ष्मीः येन विनोदयति, सः चन्द्रः अपि दिगन्तलम्बी सन् त्वदाननरुचिं विजहाति ॥ ६७ ॥

## संजीविनी.

निद्रा इति । चन्द्रारविन्दराजवदनादयः लक्ष्मीनिवासस्थानानि इति प्रसिद्धिं आश्रित्य उच्यते । निद्रावशेन निद्राधीनेन । स्त्र्यन्तरासंगोऽत्र ध्वन्यते । भवता पर्युत्सुकत्वं अपि । त्वयि अनुरक्तत्वं अपि इत्यर्थः ।

" प्रसितोत्सुकाभ्यां तृतीया च " इति सप्तम्यर्थे तृतीया । अपिशब्दः तद्विषयानुरागस्य अनपेक्ष्यत्वद्योतनार्थः । निशि खण्डिता भर्तुः अन्यासङ्गज्ञानकलुषिता अबला इव नायिका इव । " ज्ञातेऽन्यासङ्गविकृते खण्डितेर्ष्या कषायिता " इति दशरूपके । अनवेक्षमाणा अविचारयन्ती सती । उपेक्षमाणा इत्यर्थः । लक्ष्मीः येन चन्द्रेण सह त्वदाननसदृशत्वात् इति भावः । विनोदयती विनोदं करोति । विनोदशब्दात् " तत्करोति तदाचष्टे " इति णिच् प्रत्ययः । सादृश्यदर्शनादयः हि विरहिणां विनोदस्थानानि इति भावः । सः चन्द्रः अपि दिगन्तलम्बी पश्चिमाशा गतः सन् । अस्त गच्छन् इत्यर्थः । अतः एव त्वदाननरुचिं त्वन्मुखसादृश्यं विजहाति त्यजतीत्यर्थः । अतः निद्रां विहाय लक्ष्मीं अनन्यशरणां परिगृहाण इत्यर्थः ॥ ६७ ॥

समासाः—निद्रायाः वशः ष० । न अवेक्षमाणा अनवेक्षमाणा नञ् । दिशो अन्तः दिगन्तः ष० । तं लम्बते इति उप० । तव आननं तस्य रुचिः ताम् ष० । न बलं यस्याः सा अबला बहु० ।

विवृतिः—लक्ष्मीः—राज्यश्रीः—प्रिया तव । सा त्वयि स्निह्यति । किन्तु सांप्रतं तव प्रेम निद्राया तस्याः सपत्न्या गतमिति दृष्ट्वा सा क्षुब्धा जाता । यथा ईर्ष्याकषायिता नायिका दयितमनागतं दृष्ट्वा दुःखिता भवति तथा सा श्रीर्दुःखिता जाता । किन्तु निशापतौ त्वन्मुखसादृश्यमवलोक्य तेन सा निजविरहपीडा दूरीचकार । परं चेदानीं स इन्दुरपि पश्चिमां दिशं वरुणलाञ्छनामाशां वा गच्छन् निस्तेजस्को भवति । अत एवाधुना स त्वद्वदनविभ्रमं त्यजति । अथ केन तावः लक्ष्म्या दुःखं निवारणीयं साम्प्रतम् । तस्माज्जागरित्वाऽनाथां तां श्रियं परिगृहाण । चन्द्रोऽप्यस्तगतस्तस्माज्जागृहीति सरलार्थः ॥ ६७ ॥

## NOTES.

नि + द्रा + अङ् = निद्रा । वश् कान्तौ वष्टि 2nd conj + अच् = वश = subject to, under the control of. अन् + अव + ईक्ष् + मुक् + शानच् pre. parti. परि + उत् + सु + क्विप् + कन् = पर्युत्सुक + त्वल् anxiety or sorrow. निशा ( निश् नि + शो + क् ) नितरांश्यति व्यापारान् prepare its declension. खण्ड् + क्त = खण्डिता । विनोद ( वि + नुद् + घञ् removal ) + णिच् – अय = विनोदयति a nominal verb by the rule तत्करोति तदाचष्टे meaning does that or

tells that or वि + नुद् + णिच् causal विनोदयति । लम्ब् + णिनि । अनिति ( breathes ) अनेन आ + अन् + ल्युट् आननम् रुच + कि = रुचि: ( रुची with ङीप् ) । हा to abandon 3rd conj. Par. चद् to gladden आल्हादने + रक् = चन्द्र: । चन्द्र, अरविन्द lotus राजवदन prince's face are the dwelling places of लक्ष्मी ( beauty ). निद्रावशे न indicates attachment to another woman. The idea is the same as in भावावबोधकलुषा: see our note on that. भवता पर्यु० means her strong love in you. भवता used in the sense of भवति – सप्तमी by the sutra "प्रसितोत्सुकाभ्यां तृतीया च" प्रसित and उत्सुक meaning longing for goven तृ० or स० । अपि shows that her love for him is such as should not be disregarded : and still as she finds Aja in the grip of sleep – loving sleep and not her ( लक्ष्मी )–both of which are personfied, she (Lexmi) is made to disregard him like a woman who finds her husband going wrong and so who is displeased. अनवेक्षमाणा = उपेक्षमाणा disregarding. Some propose to read अनवेक्ष्यमाणा passive present parti. भवता अनवेक्ष्यमाणा being disregarded by you पर्यु० त्वं विनोदयति beguiles or removes her uneasiness. खण्डिता नायिका is one who is displeased and reddened with anger with her husband who is attached to another lady and, therefore faithless. पार्श्वं एति प्रिय: यस्या: अन्यसंभोगचिह्नित: । सा खण्डितेति कथिता धीरैरीर्ष्याकषायिता – साहित्यदर्पण. This disloyal lover has these signs on his body. निद्राकषायमुकुलीकृतताम्रनेत्रो नारीनखव्रणविशेषविचित्रितांग: । यस्या: कुतोपि गृहमेति पति प्रभाते सा खण्डितेति कथिता कविभि: पुराणै: ॥ उपमा प्रतीपश्च अलंकारौ ।

Translate:—The moon, too, resting upon the western horizon or the end of the western quarter, is abandon-

ing the beauty of your face – the moon with whom Laxmi, disregarding like a jealous woman at night, her very yearning in you overpowered by sleep, amuses herself. 67.

---

**तद्वल्गुना युगपदुन्मिषितेन तावत्**
**सद्यः परस्परतुलामधिरोहतां द्वे ।**
**प्रस्पन्दमानपरुषेतरतारमन्त–**
**श्चक्षुस्तव प्रचलितभ्रमरं च पद्मम् ॥ ६८ ॥**

अन्वयः––तत् अन्तः प्रस्पन्दमानपरुषेतरतारं तव चक्षुः अन्तः प्रचलित-भ्रमरं पद्म च ( इति इमे ) द्वे वल्गुना युगपत् उन्मिषितेन सद्यः तावत् परस्पर-तुला अधिरोहताम् ॥ ६८ ॥

## संजीविनी.

तदिति । तत् तस्मात् लक्ष्मीपरिग्रहणात् वल्गुना मनोज्ञेन । " वल्गुः छागे मनोज्ञेपि वल्गुभाषितमन्यवत् " इति विश्वः । युगपत् ( एकस्मिन्नेव काले ) तावत् ( निश्चयेन ) उन्मिषितेन युगपदेवोन्मीलितेन सद्यः ( अकस्मात् शीघ्र ) द्वे अपि परस्परतुला अन्योन्यसादृश्यं अधिरोहताम् प्राप्नुताम् । प्रार्थनाया लोट् । केद्वे । अन्तः ( मध्ये ) प्रस्पन्दमाना चलन्ती परुषेतरा स्निग्धा तारा कनीनिका यस्य तत् तथोक्तम् । " तारका अक्ष्णः कनीनिका " इत्यमरः । तव चक्षुः अन्तः प्रचलितभ्रमरं चलद्भृगं पद्म (कमल) च । युगपदुन्मेषे सति संपूर्णसादृश्य-लाभः इति भावः ॥ ६८ ॥

समासाः––परस्परस्य तुला ष० । परुषात् इतरा पं० । परुषेतरा तारा कर्म० । प्रस्पन्दमाना परुषेतरतारा यस्य बहु० । प्रचलिताः भ्रमराः यस्मिन् बहु० ।

विवृतिः–– अधुना सूर्योदयो भवति । तेन मध्येचलद्भृंगं कमलं विकसति । यदि तावत् तव मध्येचलत्कनीनिकं नेत्रमपि तस्मिन्नेव समय उन्मीलति तर्हि चमत्कारकारि खलु नेत्रकमलयोः सादृश्यं स्यात् जनाः कमलसदृशं तव नयनं नयनसदृश कमलं चैककाले पश्यन्तु । यथा तव नेत्रे स्निग्धा सुंदरा कनीनिका विद्यते तथा कमले तत्सदृशः स्निग्धः कृष्णो भृंगो विद्यते ॥ ६८ ॥

## NOTES.

वल्गु: a goat: adj. lovely. युगमिव पद्यते युग + पद् + क्य् । उद् + मिष् + क्त = उन्मिषित । सद्य: Indeclinable. पर being repeated becomes परस्पर a pronoun, स् being insterted or विसर्ग of पर: being changed to स: the rules are कर्मव्यतिहारे (exchanged of actions) सर्वनाम्न: द्वेवाच्ये । समासवच्च बहुलम् । बहुलग्रहणादन्यपरयो' न समासवत् । असमासवद्भावे पूर्वपदस्थस्य सुप: सुर्वक्तव्य: । परस्परशब्दे कस्कादित्वात् विसर्गस्य स: Thus अन्योन्य and परस्पर (इतरेतर also) are formed. परस्पर etc. are, therefore, not compounds, but repetitions. अधिरोहताम् Imperative third pers. dual of रुह् with अधि to mount. द्वि is declined in dual only. प्र + स्पन्द् + मुक् + शानच् pre. parti. प्र + चल् + क्त = प्रचलित । भ्रम् + करन् = भ्रमर: It is a fine idea: The eye of Aja (जातौ एकवचनम् eyes) when he awakes, will have its beautiful pupil throbbing inside and so it will appear like a lotus opening at the sun-rise and having a bee (caught the previous evening inside) moving in it. उपमालंकार: though इव is not used: परस्परतुला etc. meaning परस्परतुल्ये भवताम् ।

Translate:— Therefore let the two—the eye and the lotus- obtain at once mutual similitude by means of their lovely and simultaneous opening— the two, namely, your eye with the graceful pupil flashing within and the day- lotus with a bee moving inside. 68

---

**वृन्ताच्छ्लथं हरति पुष्पमनोकहानां**
**संसृज्यते सरसिजैररुणांशुभिन्नैः ।**
**स्वाभाविकं परगुणेन विभातवायुः**
**सौरभ्यमीप्सुरिव ते मुखमारुतस्य ॥ ६९ ॥**

अन्वयः— विभातवायुः ते मुखमारुतस्य स्वाभाविकं सौरभ्यं परगुणेन ईप्सुः इव अनोकहानां श्लथं पुष्पं वृन्तात् हरति अरुणांशुभिन्नैः सरसिजैः संसृज्यते (च) ॥ ६९ ॥

## संजीविनी.

वृन्तादिति । विभातवायुः प्रभातसमीरणः स्वाभाविकं नैसर्गिकं ते तव ( संबन्धे षष्ठी ) मुखमारुतस्य निःश्वासपवनस्य सौरभ्यं तादृक् सौगन्ध्यं इत्यर्थः । परगुणेन अन्यदीयगुणेन । सांक्रामिकगन्धेन इत्यर्थः । ईप्सुः आप्तुं इच्छुः इव । " आप्ज्ञप्यृधा ईत् " इति ईकारादेशः । अनोकहानां वृक्षाणां श्लथं शिथिलं पुष्पं वृन्तात् प्रसवबन्धनात् । " वृन्तं प्रसवबन्धनं " इत्यमरः । हरति आदत्ते । अरुणांशुभिन्नैः तरणिकिरणोद्बोधितैः ( विकसितैः ) सरसि जातैः सरसिजैः कमलैः सह । " तत्पुरुषे कृति बहुलम् " इति सप्तम्याः अलुक् । संसृज्यते संगच्छते । सृजेः दैवादिकात् कर्तरि लट् ॥ ६९ ॥

समासाः— न कं अकम् नञ् । अनसः ( शकटस्य ) अकम् ष० त० । अनोकं ( शकटगतिं ) हन्ति इति अनोकहः उप० । सरसिजातं सरसिजम् अलुक् । अरुणस्य अंशवः ष० । तैः भिन्नानि तृ० त० । परस्य गुणः ष० । विभातस्य वायुः ष० । मुखस्य मारुतः ष० ।

विवृतिः— प्रातःकालपवनस्तवाननिश्वासवात तस्य सौगन्ध्यात् प्राप्तुमिच्छति । किन्तु निद्रितत्वात् तव वदनं नोद्घाटितम् । अत एव तत्सदृशं परिमलं ग्रहीतुं स वृक्षाणां पुष्पाणि तथा च सूर्यकिरणविकसितानि कमलानि स्पृशति । तत्स्पर्शेन तेषु सक्रान्तस्तववदनसमीरणसुवासस्तेन लभ्यते । सूर्य उदितः । प्रभातवातो वाति । पादपेभ्यो बन्धनाच्छिथिलानि कुसुमानि पतन्ति । कासारेषु दीर्घिकासु जलाशयेषु च कुमुदकुवलयकल्हारादि विविधप्रकारककमलानि प्रफुल्लानि । तस्माज्जागृहि इति भावः कवेः ॥ ६९ ॥

## NOTES.

अनस् + अ + क + हन् + ड = अनोकहः a tree. संसृज्यते 4th conj. Atm. active present third pers. sing: unites with. अरुण the dawn personified as the charioteer of the sun.—Aurora — represented as the elder brother of Garuda, being the son of विनता by काश्यप. वि० prematurely hatch-

ed the egg and the child was born without thighs and so he is also called अनुरू-thighless or विपाद्-footless. His wife was श्येनी who bore him two sons सपाति and जटायु. Here it may be taken in the sense of the sun as मल्लिनाथ does. भिद् + क्त = भिन्न । स्वभावादागतम् ठञ् = स्वाभाविकम् । सुरभेर्भावः ष्यञ् = सौरभ्यम् । आप् ज्ञप् and ऋध् change their vowel to ई before सन्, desiderative term. and reduplicative syllable is dropped. आप्तुं इच्छति ईप्सति, आर्धितु इच्छति ईर्त्सति or अर्दिधिषति, ज्ञीप्सति or जिज्ञपयिषति or जिज्ञापयिषति. In a तत्पुरुष compound ending in a verbal noun, the case of the first member is optionally dropped: कर्णेजप: or कर्णजप:, सरोजम् or सरसिजम् ( सरस् + जन् + ड ). मरुत् एव मारुत: अण् स्वार्थे । परगुणेन हेतौ तृतीया = साङ्क्रामिकगुणेन through the property of another to which the smell of Aja's respiration is transferred. It means the smell of the breath of Aja's mouth is as fragrant as the smell of these flowers. इव shows उत्प्रेक्षा— Poetic fancy- a figure of speech अलंकार.

Translate:— The morning breeze, wishing to obtain as it were, the natural fragrance of the breath of your mouth, by ( getting ) the property of other fragrant things, is taking away, from their stalks, the loosened flowers of trees and is uniting itself with the lotuses broken open ( fully blown ) by the rays of the sun. 69

---

ताम्रोदरेषु पतितं तरुपल्लवेषु
निर्धौतहारगुलिकाविशदं हिमाम्भः ।
आभाति लब्धपरभागतयाधरोष्ठे
लीलास्मितं सदशनार्चिरिव त्वदीयम् ॥ ७० ॥

अन्वयः—ताम्रोदरेषु तरुपल्लवेषु पतितं निर्धौत–म्भः लब्ध–ष्ठे त्वदीयं सदशनार्चिः लीलास्मितं इव आभाति ॥ ७० ॥

## संजीविनी.

ताम्रेति । ताम्रोदरेषु अरुणाभ्यन्तरेषु तरुपल्लवेषु (वृक्षपर्णेषु) पतितं (गलित) निर्धौताः (स्वच्छाः) याः हारगुलिकाः मुक्तामणयः तद्वद्विशदं (निर्मलं) हिमाभः (तुषारजलं) लब्धपरभागतया लब्धोत्कर्षतया । "परभागो गुणोत्कर्षे" इति यादवः । अधरोष्ठे (दन्तवाससि) त्वदीयं सदशनार्चिः दन्तकान्तिसहितं लीलास्मितं (विलासहास्य) इव आभाति शोभते ॥ ७० ॥

समासाः—ताम्र उदरं येषां तेषु बहु० । तरूणा पल्लवाः ष० । हारस्य गुलिकाः ष० । निर्धौताः हारगुलिकाः कर्म० । ताः इव विशदं कर्म० । हिमस्य अंभः ष० त० । परः भागः कर्म० । लब्धः परभागः येषा ते बहु० लब्धपरभागाः तेषा भावः लब्ध–ता तया । अधरः ओष्ठः कर्म० । लीलायाः स्मितम् ष० त० । दशनाना अर्चिः ष० तैः सह इति सदशनार्चिः बहु० ।

विवृतिः—वृक्षाणा यानि रक्ताभ्यन्तराणि कोमलकिसलयानि सन्ति तेषु रात्रौ तुहिनजलबिन्दवो गलिताः । ते तुषारोदककणा बालातपे स्वच्छनिर्मलमौक्तिकमालामणय इव श्वेतवर्णा विराजन्ते । एतानि किसलयानि तव बिम्बाधरं नूनमनुकुर्वन्ति । तत्रस्थ नीहारकणाना तेजस्तव श्वेतहास्यं विडम्बयन्ति । कणाश्च तव दन्तानां साम्यं धारयन्ति । पादपपर्णपतितोऽवश्याय स्तव द्विजकिरणयुक्तनिर्मलहास्यमिव दृश्यते इति सरलार्थः ॥ ७० ॥

## NOTES.

तम् + रक् = ताम्रम् । पत् + क्त = पतितम् । पल् + क्विप् = पल् + लू + अप् = पल्लवः । तॄ + उ = तरुः । धाव् + क्त = धौत । हृ + घञ् = हारः । अम् + असुन् = अंभः । भा 2nd conj. pre. भाति to appear. लभ् + क्त = लब्ध । परभागः (भज् + घञ्) means excellence of qualities स्मि + क्त भावे = स्मितम् । दश् + ल्युट् करणे दश्यतेऽनेन = दशनम् । अर्च् + इस् = अर्चिः neuter and feminine. युष्मत् + छ = युष्मदीय or त्वदीय । An excellent verse. The red sprouts are compared to the lower lip of Aja, the radiance of

bright dew-drops to the white smile on his red lip and pearl-like drops to the white pearl-like teeth. समासगा उपमा in गुलिकाविशदं and पूर्णोपमा in the verse shown by इव। माधुर्य गुणः ।

Translate:— The dew-drops, bright like the polished pearls of a necklace, that are fallen on the sprouts of trees red in the interior, appear, on account of having obtained the highest excellence, like your playful smile, with brilliance of your teeth in it, shining on your lower lip. 70

---

यावत्प्रतापनिधिराक्रमते न भानु
रह्नाय तावदरुणेन तमो निरस्तम् ।
आयोधनाग्रसरतां त्वयि वीर याते
किं वा रिपूंस्तव गुरुः स्वयमुच्छिनत्ति ॥ ७१ ॥

अन्वयः--प्रतापनिधिः भानुः यावत् न आक्रमते तावत् अह्नाय अरुणेन तमः निरस्तम् । वीर त्वयि आयोधनाग्रसरतां याते (सति) तव गुरुः रिपून् स्वयं उच्छिनत्ति किं वा ? ॥ ७१ ॥

## संजीविनी.

यावदिति । प्रतापनिधिः तेजोनिधिः भानुः ( सूर्यः) यावत् न आक्रमते नोद्गच्छति । " आङ् ज्योतिरुद्गमने " इति आत्मनेपदम् तावत् । भानौ अनुदिते एव इत्यर्थः । अह्नाय झटिति । " द्राग् झटिति अंजसा अह्नाय " इत्यमरः । अरुणेन अनूरुणा । " सूर्यसूतोऽरुणोऽनूरुः " इत्यमरः । तमः ( अन्धकारः ) निरस्तम् (दूरीकृतम् ) । तथाहि । हे वीर त्वयि आयोधनेषु युद्धेषु ।"युद्ध आयोधन जन्यम्" इत्यमरः । अग्रसरतां पुरःसरता याते सति ( यस्य च भावेन भावलक्षणमिति भावे सप्तमी । तव (शेषे षष्ठी ) गुरुः पिता रिपून् स्वयं उच्छिनत्ति ( मारयति ) किं वा न उच्छिनत्ति इत्यर्थः । न खलु योग्यपुत्रन्यस्तभाराणां स्वामिना स्वयं व्यापारखेदः इति भावः ॥ ७१ ॥

समासाः—प्रतापस्य निधिः ष० । अग्रे सरति उप० । आयोधनेषु अग्रसरः स० त० । तस्यभावः आ—सरता ।

विवृतिः—नैशोऽन्धकारः सूर्यसूतेनानूरुणा पूर्वमेव दूरीकृतः । अधुनाऽर्क उदेति । यदि शत्रुविनाशः पुत्रेणैव क्रियते तर्हि पित्राऽरिमर्दनव्यापारः किमर्थं कर्तव्यः ? युद्धेषु भवानेव धुरन्धरो भूत्वा शत्रून्मारयति । रघुराजः खलु रणक्षेत्रे न गच्छति । गच्छेच्चेत् फलमेव प्राप्नोति न चात्मान युद्धेन खेदयति । सूर्योदयसमयो प्यागतः । अतस्त्यज शय्याम् ॥ ७१ ॥

## NOTES.

The first half of the verse has passed into a maxim. See the uses of यावत्- तावत् in Apte's Guide. प्र + तप् + घञ् = प्रतापः । नि + धा + कि = निधिः । आ + क्रम् in the sense of the rising of a luminary is Atmanepadi. See Guide. निर् + अस् to throw + क्त = निरस्तम् । तम् + असच् = तमः neuter. आ + युध् + ल्युट् आधारे = आयोधनम् a war. अग्र + सृ + ट = अग्रसरः । It Should have been अग्रेसरः as it is used in the sutra "पुरोऽग्रतोऽग्रेषु सर्तेः" which means the root सृ to move takes ट termination when it is preceded by पुरः, अग्रतः or अग्रे ( पुरः सरः अग्रतः सरः and अग्रेसरः ) कथं तर्हि "यूथं तदग्रसरगर्वितकृष्णसारम्" इति ? बाहुलकात् इति हरदत्तः । Then how is अग्रसर used by poets if it is not allowed ? हरदत्त says that the form अग्रसर is optional. Even if it is wrong strictly according to पाणिनि, it is rhetorically correct as it is used by standard poets. त्वयि याते is locative absolute. See guide. वैदर्भीरीतिः । प्रसादगुणः दृष्टान्तालङ्कारः आक्षेपालङ्कारश्च in उच्छिनत्ति किम् न इत्यर्थः ।

Translate:— Even before the sun, the repository of burning heat, rises up, the darkness is dispelled by अरुण the sun's charioteer. When you, oh hero, have as-

sumed yourself the foremost position of the leader in battles, should your father himself extirpate the enemies? 71

---

**शय्यां जहत्युभयपक्षविनीत निद्राः**
**स्तम्बेरमा मुखरशृंखलकर्षिणस्ते ।**
**येषां विभान्ति तरुणारुणरागयोगाद्**
**भिन्नाद्रिगैरिकतटा इव दन्तकोशाः ॥ ७२ ॥**

अन्वयः—तरुणारुणरागयोगात् येषां दन्तकोशाः भिन्नाद्रिगैरिकतटाः इव विभान्ति, उभयपक्षविनीतनिद्राः मुखरशृंखलकर्षिणः ते स्तम्बेरमाः शय्या जहति ॥ ७२ ॥

## संजीविनी

शय्यामिति । उभाभ्या पक्षाभ्या ( वामदक्षिणाभ्या ) पार्श्वाभ्या विनीता अपगता निद्रा येषाते उभयपक्षविनतिनिद्राः अलसमासाविषये उभशब्दस्थाने उभयशब्दप्रयोगः एव साधुः इति अनुसन्धेयम् । यथाह कैयटः । " उभात् उदात्तो नित्यम् " इति नित्यग्रहणस्य इदं प्रयोजन वृत्तिविषये उभशब्दस्य प्रयोगः मा भूत् । उभयशब्दस्यैव यथा स्यात् । उभय पुत्र इत्यादि भवति " इति । मुखराणि उत्थानचलनात् शब्दायमानानि शृखलानि निगडानि कर्षन्तीति तथोक्ताः ते तव स्तम्बे रमन्ते इति स्तम्बे रमा· हस्तिनः " स्तबकर्णयोः रमिजपोः इति अच् प्रत्ययः । " हस्तिसूचकयोः " इति वक्तव्यात् । " इभः स्तम्बेरमः पद्मी " इत्यमरः । " तत्पुरुषे कृतिबहुलम् " इति सप्तम्या अलुक् । शय्या जहति त्यजन्ति । येषां स्तम्बेरमाणां दन्ताः कोशाः इव दन्तकुड्मलाः तरुणारुणरागयोगात् बालार्कारुणसंपर्कात् हेतोः भिन्नाद्रिगैरिकतटाः इव विभान्ति धातुरक्ताः इव दृश्यन्ते इत्यर्थः ॥ ७२ ॥

समासाः—उभौ पक्षौ उभयपक्षौ कर्म० । ताभ्यां विनीता तृ० । उभयपक्षविनीता निद्रा येषां ते बहु० । स्तम्बेरमन्ते इति अलुक् । मुखराणि शृंखलानि कर्म० । तानि कर्षन्ति तच्छीलं एषा उप० । तरुणः अरुणः कर्म० । तस्य रागः ष० । तस्य योगः तस्मात् ष० । गैरिकस्य तटः ष० । अद्रेः गैरिकतटः ष० । भिन्नः अद्रिगैरिकतटः यैः ते बहु० । दन्ताः कोशाः इव कर्म० ।

विवृतिः— तव गजा वामपार्श्वाद्दक्षिणपार्श्वेन दक्षिणपार्श्वाद्वामपार्श्वेन च लुटित्वा निजस्वापं दूरीकृतवन्तः। जागरितास्तेऽधुना। उत्थाय चलितु प्रारब्धाः। चलनेन च तेषा बन्धननिगडानि शब्दायन्ते। सूर्यातपरक्तवर्णसंपर्केण तेषां विषाणा लोहिता दृश्यन्ते। मन्ये तैर्निजद्विजकुड्मलैः पर्वतपार्श्वे विद्यमानेषु रक्तधातुषु क्रीडा कृता ॥ ७२ ॥

## NOTES.

शी + क्यप् + टाप् = शय्या। उभ and उभय both mean " both. " उभ is declined in dual only. उभय in sing. and plu. only. In a compound उभय is used and in the dissolution उभ should be used. This is shown by the word नित्य in " उभात् उदात्तो नित्यम्." so says कैयट a grammarian. वि + नी + क्त = विनीत। स्तम्ब means the stem or trunk of a tree, thicket or the post to which an elephant is tied. रम् to sport. स्तबेरमः an elephant because he sports near the tying post or a thicket. स्तब + रम् + अच् = स्तबेरमः। रम् and जप् with स्तंब and कर्ण respectively preceding them take अच् in the sense of an elephant and back-biter. इभः and पद्मी mean an elephant. The samasa is Aluk by the तत्पुरुषे etc. मुख + रा + क = मुखरः मुखव्यापार कथन राति करोति इति। शृखलं कर्षन्ति कृष् + णिनिः। गिरौभवः गैरिकः गैरिकः ठक्। कोशः bud कुश् + घञ्। उत्प्रेक्षालंकारः। दन्तकोशाः इत्यत्र उपमा। उभयादिमुखरादिविशेषणाभ्यां स्वभावोक्तिः।

Translate:—Your elephants that have driven away their sleep by turning from side to side and are now dragging their noisy chains, are leaving their beds: the elephants whose bud-like tusks appear as if they have broken the red mineral slopes of a mountain, on

account of their coming in contact with the red light of the young sun. 72

---

दीर्घेष्वमी नियमिताः पटमण्डपेषु
निद्रां विहाय वनजाक्ष वनायुदेश्याः ।
वक्त्रोष्मणा मलिनयन्ति पुरोगतानि
लेह्यानि सैन्धवशिलाशकलानि वाहाः ॥ ७३ ॥

अन्वयः — वनजाक्ष, दीर्घेषु पटमण्डपेषु नियमिताः वनायुदेश्याः अमी वाहाः निद्रां विहाय पुरोगतानि लेह्यानि सैन्धवशिलाशकलानि वक्त्रोष्मणा मलिनयन्ति ॥ ७३ ॥

## संजीविनी

दीर्घेषु इति । हे वनजाक्ष नीरजाक्ष ( कमलनेत्र ) " वनं नीरं वनं सत्वम् " इति शाश्वतः । दीर्घेषु ( विस्तीर्णेषु ) पटमण्डपेषु ( वस्त्रभवनेषु ) नियमिताः बद्धाः वनायुदेश्याः वनायुदेशे भवाः " पारसीकाः वनायुजाः " इति हलायुधः । अमी ( एते ) वाहाः अश्वाः निद्रां विहाय पुरो गतानि ( अग्रे स्थापितानि ) लेह्यानि आस्वाद्यानि सैन्धवशिलाशकलानि ( श्लेष्मनिवारणार्थं लवणखंडानि दीयन्ते ) " सैन्धवोऽस्त्री सितशिवं माणिमन्थं च सिन्धुजे " इत्यमरः । वक्त्रोष्मणा ( वदनबाष्पेण ) मलिनयन्ति मलिनानिकुर्वन्ति । उक्तं च सिद्धयोगसंग्रहे " पूर्वाह्णकाले चाश्वानां प्रायशो लवणं हितम् । शूलमोहविबन्धघ्नं लवणं सैन्धवं वरम् । " इत्यादि ॥ ७३ ॥

समासाः—पटस्य मण्डपः ष० । वने जातं उप० । वनजे इव अक्षिणी यस्य बहु० । वनायुः देशः कर्म० तस्मिन् भवाः व–श्याः । वक्त्रस्य ऊष्मा ष० । पुरः गतानि सुप्सुप् स० । सैन्धवस्यशिला ष० । तस्याः शकलानि ष० ।

विवृतिः—समीपस्थेषु विस्तीर्णवस्त्रगृहेषु मंदुरासु वाजिशालासुवा बद्धा पारसीका उत्तमा अश्वा अपि विगतस्वापा अधुना । जागरित्वा तेऽग्रतः क्षिप्तानि लवणखण्डानि खादितुं प्रारभन्ते । तेषां मुखबाष्पेणास्वाद्यानि क्षाराणि मलिनीभवन्ति । हस्तिनः सहयश्च त्यक्तालस्याः । हे कमलनयन युवराज, त्वमपि जागृहि ॥ ७३ ॥

## NOTES.

नि + यम् + क्त = नियमित p. p. p. पट: cloth. पटमण्डप: tent. मण्ड् + घञ् = मण्ड: तं पाति रक्षति पा + क = मडप: । वनं = water वन + जन् + ड = वनजं = कमलम् । अक्षिन् at the end of a बहु० compound is changed to अक्ष by the augment षच् ( बहुव्रीहौ सक्थ्यक्ष्णोः स्वाङ्गात् षच् ). दीर्घसक्थ:, जलजाक्ष: ( जलजाक्षी fem. ) वनायु-देश + यत् = वनायुदेश्या: belonging to Persia, still known for excellent horses. वच् + ष्ट्रन् = वक्ति अनेन् इति वक्त्रम् । उष् + मनिन् = उष्मन् warmth or vapour. मलिन + णिच् = मलिन-यति denomin or nominal verb. ( see विनोदयति ) लिह् to lick + ण्यत् + लेह्यम् fit to be licked. सिन्धु + अण् = सैन्धवं । वह् + घञ् = वाह: उह्यतेऽनेन इति । Pieces of salt should be given to horses in the morning to remove diseases. स्वभावोक्ति अलङ्कार: ।

Translate:—These horses of the country of the वनायुs Persia–tied in extensive tents ( stables ) have given up their sleep and, oh lotus-eyed one, are soiling by the warmth of their mouths the pieces of salt rock, put before them to be licked. 73

---

**भवति विरलभक्तिर्म्लानपुष्पोपहार:**
**स्वकिरणपरिवेषोद्भेदशून्याः प्रदीपाः ।**
**अयमपि च गिरं नस्त्वत्प्रबोधप्रयुक्ताम्**
**अनुवदति शुकस्ते मञ्जुवाक्पञ्जरस्थः ॥ ७४ ॥**

अन्वय:—म्लानपुष्पोपहार: विरलभक्ति: भवति । प्रदीपा: स्वकिरणपरि-वेषोद्भेदशून्या: (भवन्ति ) । अपि च अय मञ्जुवाक् पञ्जरस्थ: ते शुक: त्वत्प्रबो-धप्रयुक्ता न: गिरं अनुवदति ॥ ७४ ॥

## संजीविनी.

भवति इति । ( ववताम्भिणा ) म्लान: ( ग्लान: ) पुष्पोपहार: पुष्पपूजा

( कुसुममाला वा ) म्लानत्वादेव विरलभक्तिः विरलरचनः भवति । प्रदीपाश्च स्वकिरणानां परिवेषस्य मण्डलस्य उद्भेदेन स्फुरणेन शून्याः भवन्ति निस्तेजस्का भवन्तीत्यर्थः । अपि च ( तथैव ) अयं मञ्जुवाग् मधुरवचनः पंजरस्थः ( लोहनिर्मितपक्षिगृहस्थः ) ते तव शुकः ( कीरः ) त्वत्प्रबोधनिमित्ते प्रयुक्ता उच्चारिता नः अस्माकमिदं वाणीं अनुवदति । अनुकृत्य वदतीत्यर्थः । इत्थं प्रभातलिंगानि वर्तन्ते । अतः प्रबोद्धव्यमिति भावः ॥ ७४ ॥

समासाः—विरला भक्तिः यस्य बहु० । पुष्पाणां उपहारः ष० । म्लानः पुष्पोपहारः कर्म० । स्वे किरणाः कर्म० or स्वस्य किरणाः ष० । तेषां परिवेषः ष० । तस्य उद्भेदः ष० । तेन शून्याः तृ० । प्रकृष्टाः दीपाः प्रादि० । तव प्रबोधः ष० । तस्मिन् प्रयुक्ता स० or तदर्थं प्रयुक्ता मध्यमपदलोपी स० । मञ्जुः वाक् यस्य बहु० । पञ्जरे तिष्ठति उप० ।

विवृतिः—पूजार्थं क्षिप्तानि कुसुमानि तथा च तव कण्ठ—लग्नमालायाः कुसुमानि दीर्घकालेन तव मुखोष्मणा च ग्लानिं प्राप्तानि । अतएव कृशानि संजातानि । तासां मालानां सूत्राणि दृग्गोचराणि भवन्ति । ग्रथनं च तनुत्वेनावभासते । प्रदीपा अर्चिषश्च निस्तेजस्काः संजाताः । तान् परितो मयूखमंडलस्य स्फुरणमधुना न दृश्यते । तव निद्रापगमार्थमुच्चारितं गानं श्रुत्वा मधुरकण्ठ एष पंजरबद्धस्तव कीरस्तथैव गातु प्रवृत्तः । जागृहि कुमार प्रातःकालो भूतः ॥ ७४ ॥

## NOTES.

The metre is again changed. In this and the next verse the metre used is मालिनी. भक्तिः = रचना – भज् + क्तिन्। विरलाः वि + रा + कलन् + टाप् । म्लान p. p. p. म्लै ( म्लायति ) + क्त. – पुष्प् + अच् = पुष्पम् । उपहारः उप + हृ + घञ् = worship or garland ( collection of flowers and so a माला ) = offering or present. These flowers faded and so shrank in bulk or became thin in texture. परि + विष् व्याप्तौ – वेवेष्टि 3rd conj. + घञ् = परिवेषः halo or circle. उद् + भिद् + घञ् = उद्भेदः throbbing, appeaing. शून + यत् = शून्यायै प्राणिवधाय हितं रहस्यस्थानत्वात् = void. गॄ-गृणाति ( शब्दे ) 9th conj. + क्विप् ( टाप् वा ) गिर् गिरा वा । गीः गिरौ गिरः femi. पञ्जर + स्था + क = पंजरस्थः । अनुप्रासः मालिनीवृत्तम् ननमयययुतेयं मालिनी भोगिलोकैः ।

Translate :— The present of flowers (or the garland) has faded and therefore has become loose in its composition; the lamps are now devoid of the flashing of the *circle of their rays*; and this sweet - voiced parrot also of yours, resting in his cage, is imitating our speech employed in awakening you. 74.

---

**इति विरचितवाग्भिर्बन्दिपुत्रैः कुमारः**
**सपदि विगतनिद्रस्तल्पमुज्झां चकार ।**
**मदपटुनिनदद्भिर्बोधितो राजहंसैः**
**सुरगज इव गाङ्गं सैकतं सुप्रतीकः ॥ ७५ ॥**

अन्वयः— मदपटुनिनदद्भिः राजहंसैः बोधितः सुरगजः सुप्रतीकः गाङ्गं सैकतं इव इति विरचितवाग्भिः बन्दिपुत्रैः ( बोधितः ) सपदि विगतनिद्रः कुमारः तल्पं उज्झाञ्चकार ॥ ७५ ॥

## संजीविनी

इति इति । इति इत्थम् विरचितवाग्भिः ( कृतगीतमधुरकाव्यैः ) बन्दिपुत्रैः वैतालिकैः । पुत्रग्रहणं समानवयस्कद्योतनार्थम् । सपदि ( शीघ्रं ) विगतनिद्रः ( त्यक्तस्वापः ) कुमारः ( राजपुत्रः ) तल्प शय्या " तल्पं शय्या अट्टदारेषु " इत्यमरः । उज्झाचकार विससर्ज । " इजादेश्च गुरुमतोऽनृच्छः " इति आम् प्रत्ययः । कथमिव । मदेन ( आनन्देन ) पटु मधुर निनदद्भिः ( ध्वनद्भिः ) राजहंसैः ( सारसैः ) बोधितः ( जागरितः ) सुप्रतीकाख्यः सुरगजः ईशानदिग्गजः गङ्गायाः इद गाङ्गं सैकतं पुलिनं इव ।" तोयोत्थितं तत्पुलिनं सैकतं सिकतामयम् इत्यमरः । सिकताशर्कराभ्यां च " इति अण् प्रत्ययः । सुप्रतीकग्रहणं प्रायशः कैलास निवासिनः तस्य नित्य गंगातटविहारसंभवात् इति अनुसंधेयम् ॥ ७५ ॥

समासाः—विरचिता वाक् यैः ते बहु० विरचिताः वाचः कर्म० वा ताभिः बन्दिनां पुत्रैः ष० । विगता निद्रा यस्मात् बहु० । मदेन पटु यथा तथा सहसुपेति स० । मदपटु निनदन्तः सहसुपेति or मदपटु and निनदद्भिः may be taken to be two असमस्तपदs. हंसाना राजानः राजहंसाः ष० त० । सुराणां गजः ष० त० । शोभनं प्रतीकं [ मुखं ] यस्य बहु० ।

विवृतिः— यथा प्रमोदेन मधुरं कूजन्त सारसा राजहंसाः सुप्रतीकनामानमीशानदिग्गज जागरयन्ति स च स्वर्गहस्ती जागरितः सन् कैलाससमीपवाहिन्या मन्दाकिन्याः पुलिन त्यजति तथैव मधुर काव्यगानं कृत्वा तरुणा वैतालिका अजं राजपुत्र बोधयामास स च शीघ्रमेवालस्य त्यक्त्वा निजशय्याममुञ्चत् ॥ ७५ ॥

## NOTES.

वि + रच् + क्त = विरचित । बन्दिन् same as वन्दिन् वन्द् + णिनि वन्दते स्तौति इति वन्दी । वन्दिपुत्रs were of the same age as of अज. " सूतात्मजाः सवयसः says कालिदास in 65. सह पद्यते – सपदि – स + पद + इन् – अव्ययम् । तल् + पक् ( तल्प्रतिष्ठायाम् तालयति ) तल्पः or तल्प means a couch, bed or sofa, an upper storey or turret or tower, and a wife. उज्झति abandons. उज्झाचकार periphrastic perfect. इजादि. यः धातुः गुरुमान् ऋच्छत्यन्यः ततः आम् स्यात् लिटि is the explanation given in कौमुदी of the sutra इजादेः etc. उज्झ् is a root beginning इच् ( इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ short or long ), it has उ in the beginning which is गुरुमान् i. e. heavy and it is other than ऋच्छति; so it takes आम् before लिट् Perfect terminations, and then कृञ्चानुप्रयुज्यते लिटि etc. optional forms are उज्झामास and उज्झा बभूव third person sing. perf. active, parasm. See Kale's Grammar. पटु = potent which sounds similarly, sweetly, ably, adverb. ( पट् गतौ + उ ). नि + नद् + शतृ निनदत् pre. parti. बुध् + णिच् causal + क्त = बोधितः past pas. per. of the causal of बुध् ( बोधयति ). हंसानां राजानः राजहंसाः राजदन्तादित्वात् परनिपातः – राजदन्तादिषुपरम् – हंस which should be used first is used as the second member irregulary as दन्तानां राजा राजदन्तः ।

भवेद्वर्णागमात् हंसः सिंहो वर्णविपर्ययात् ।
गूढोऽत्मावर्णविकृतेः वर्णनाशात्पृषोदरम् ॥

हंस thus is irregularly formed : हन्ति गच्छति इति हंसः, हिन-

स्तीति सिंह:, गूढः आत्मायस्य गूढोऽत्मा and पृषद् + उदरम् = पृषोदरम् । गगा + अण् = गांग, सिकता and शर्करा with अण् become सैकतम् and शार्करम् । सिकताः सन्ति अत्र इति = sandy place. सुप्रतीक is one of the sight दिक्पालs ऐरावतः पुण्डरीकः वामनः कुमुदोऽञ्जनः । पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः। The wife of सुप्रतीक is अञ्जनावती. उपमा अलंकारः । मालिनीवृत्तम् । प्रसादगुणः ।

Translation:— His sleep dispelled by the sons of bards ( of the same age ) with songs thus composed ( as above ), the prince forthewith left his bed, just as सुप्रतीक ( the guard of the North – East – quarter ) the elephant of gods, roused by swans warbling sweetly with joy, quits the sandy bank of Ganges. 75

---

**अथ विधिमवसाय्य शास्त्रदृष्टं दिवसमुखोचितमञ्चिताक्षिपक्ष्मा ।**
**कुशलविरचितानुकूलवेषः क्षितिपसमाजमगात्स्वयंवरस्थम् ॥ ७६ ॥**

इति श्रीरघुवंशे महाकाव्ये कालिदासकृतौ अजस्वयंवराभिगमनो नाम
पंचमः सर्गः समाप्तः ।

अन्वयः— अथ अञ्चिताक्षिपक्ष्मा शास्त्रदृष्टं दिवसमुखोचित विधिं अवसाय्य कुशलविरचितानुकूलवेषः ( सन् ) स्वयंवरस्थं क्षितिपसमाजं अगात् ॥ ७६ ॥

**संजीविनी.**

अथेति । अथ उत्थानानन्तरं अञ्चितानि चारूणि अक्षिपक्ष्माणि ( नेत्रलोमानि ) यस्य सः अजः शास्त्रे ( मन्वादीनां स्मृतौ ) दृष्टं अवगतं दिवसमुखोचितं प्रातःकालोचितं विधिं अनुष्ठानं । अवसाय्य समाप्य । स्यतेः ण्यन्तात् ल्यप् । कुशलैः प्रसाधनदक्षैः विरचितः ( परिधापितः ) अनुकूलः स्वयंवरोचितः वेषः नेपथ्यं यस्य सः तथोक्तः सन् स्वयंवरस्थ ( विवाहमण्डपे विद्यमानं ) क्षितिपसमाजं राजसमूहं अगात् अगमत् । " इणो गा लुङि " इति गादेशः । पुष्पिताग्रावृत्तमेतत् । तल्लक्षणम्—" अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा " इति ॥ ७६ ॥

इति श्रीमल्लिनाथसूरिविरचितायां रघुवंशव्याख्यायां संजीविनीसमाख्यायां
पंचमः सर्गः ।

समासाः—शास्त्रे दृष्टम् स० । दिवसस्य मुखं ष० । तस्मिन् उचितम् स० । अक्ष्णोः पक्ष्माणि ष० । आञ्चितानि अक्षिपक्ष्माणि यस्य बहु० । कुशलैः विरचितः तृ० । अनुकूलः वेषः कर्म० । कुशलविरचितः अनुकूलवेषः यस्य बहु० । स्वयंवरः सु॒सु॒ स० । स्वयंवरे तिष्ठति उप० । क्षितिं पाति इति क्षितिपः उप० । क्षितिपानां समाजः ष० त० ।

विवृतिः— सूतपुत्राणां गानं श्रुत्वोत्थितोऽजः सुन्दरनयनबालो मधुरवदनः सर्वसार्वभौमलक्षणं मनुयाज्ञवल्क्यादिना धर्मशास्त्रे प्रणीतं सर्वं प्रातःसमयोचितमनुष्ठानं कृत्वा कृतशौचो विहितस्नानः प्रसाधननिपुणसेवकैर्विहितस्वयंवरयोग्यनेपथ्यः परिवारेण सह स्वयंवरमण्डपं जगाम यत्र खलु सर्वे राजानः प्रेक्षकाश्च सम्मीलिता आसन् ॥ ७६ ॥

## NOTES.

वि + धा + कि = विधिः । अव + सो ( स्यति 4 conj. ) णिच् + ल्यप् = अवसाय्य absolutive of the causal of अवसो. = having, finished ( अवसाययति causal ). शास् + ष्ट्रन् = शास्त्रं शिष्यते अनेन इति । दृश् + क्त=दृष्ट । अञ्च् + क्त = अञ्चित well-turned, curved or beautiful. पक्ष + मनिन् = पक्ष्मन् neuter, नेत्रावरक लोम = eye-lashes. The face is all-in-all in the body, and face means the nose and eyes. If these are charming, then the whole body may be taken to be beautiful. मुखमर्धं शरीरस्य सर्वं वा मुखमुच्यते । तत्रापि नासिका श्रेष्ठा नासिकायाश्च लोचने ॥ अज went through all the actions, usually performed in the morning, such as purification of the body, washing, cleaning, bathing, praying and contemplating कुशल = skilful. कुशान् लाति ला + क; कौ पृथिव्यां शलति चलयति कार्याणि कु + शल् + अच् । कार्यचतुरः । सम् + अज् ( अजति goes ) + घञ् = समाजः– पशुभिन्नानां समूहः सभा वा, पशूनां तु समजः । समाजः an assembly of men, समजः a flock of birds, a herd of animals. स्वयंवर by लक्षणा– indication–means the auditorium or hall where स्वयंवर– choice of the husband was to be made. अगात्

aorist third pers. sing. of इण् (इ to go) which substitutes गा in लुङ् aorist, 2nd variety.

Translate—Then finishing the morning rites (duties fit to be performed at day-break) enjoined by the scriptures, Aja with beautiful eye-lashes, put on a suitable attire with the help of his expert attendants and went to the assembly of princes, seated in the hall of the self electing marriage. 76

Thus ends the fifth canto by name " Aja's proceeding to the self-electing marriage " in the great court epic called रघुवंश " The race of the Raghus," a work of Kalidasa.

|| ॐ श्रीराघवाय नमः ||

# APPENDIX.

## A

A short note on the metres used in the V canto.

रघुवंशपञ्चमसर्ग contains, as can be seen from the commentary, verses composed in six varieties of matre which are (1) इन्द्रवज्रा, (2) उपेन्द्रवज्रा, (3) उपजाति, (4) वसन्ततिलका, (5) मालिनी and (6) पुष्पिताग्रा. The metre etymologically a combination of मात्राs or syllabic instants, is the English word for वृत्त which has three classes. समवृत्त in which all the Padas-feet or quarters-composing the verse are similar; ( e. g. इन्द्र०, उपे०, उप०, वसन्त० and मालिनी in the 5th canto. ) अर्धसमवृत्त in which the alternate feet are similar; ( e. g. पुष्पिताग्रा also called औपच्छन्दसिक in which the last verse of the 5th

canto is composed) and विषमवृत्त in which all the quarters are dissimilar ( e g. उद्गता. ) These वृत्तs are formed of गणs or groups of syllables, each group consisting of three successive syllables and these गणs are eight, given in the following verses.

मस्त्रिगुरुस्त्रिलघुश्च नकारो
भादिगुरुः पुनरादिलघुर्यः ।
जोगुरुमध्यगतो रलमध्यः
सोऽन्तगुरुः कथितोऽन्तलघुस्तः ॥ १ ॥

आदिमध्यावसानेषु यरता यान्ति लाघवम् ।
भजसा गौरवं यान्ति मनौ तु गुरुलाघवम् ॥ २ ॥

ल means लघु short or light and ग means गुरु long or heavy. A syllable is light if its vowel is short and heavy if its vowel is long or if being short, it is followed by a conjunct consonant, ends with अनुस्वार or विसर्ग or comes at the end of a पाद्. लघु is represented by the symbol ᵕ and गुरु by – , so that the eight groups given in the above two verses may be shown thus:–

| | |
|---|---|
| य ᵕ – – | ज ᵕ – ᵕ |
| र – ᵕ – | स ᵕ ᵕ – |
| त – – ᵕ | म – – – |
| भ – ᵕ ᵕ | न ᵕ ᵕ ᵕ |

Example –ताम्रोद रेपुप तितंत रुपह्न वे ग = 14 syllables
– – ᵕ – ᵕ ᵕ ᵕ – ᵕ ᵕ – ᵕ
त · भ ज ज ग ग
ज्ञेया वसन्ततिलका तभजाजगौगः

## B

Important maxims or General Truths in the V canto.

1 सूर्ये तपत्यावरणाय दृष्टेः कल्पेत लोकस्य कथं तमिस्रा ॥ 13.

2 पर्यायपीतस्य सुरैः हिमांशोः कलाक्षयः श्लाघ्यतरो हि वृद्धेः ॥ 16.
( स्वत्यस्तुते )

3 निर्गलिताम्बुगर्भं शरद्घनं नार्दति चातकोऽपि ॥ 17.

4 उष्णत्वमग्न्यातपसंप्रयोगात् शैत्यं हि यत् सा प्रकृतिः जलस्य ॥ 54.

Read these half verses with the remaining half in which विशेष or particular propositions are given and they will be examples of अर्थान्तरन्यासालंकार.

---

## C

उपमाकालिदासस्य भारवेरर्थगौरवम् ।
दण्डिनः पदलालित्यं माघे सन्तित्रयोगुणाः ॥

Some of the similes, for which कालिदास is well known, in this canto:—( उपमानs- standards of comparison with उपमावाचक शब्द–इव alone are given here to avoid repetition. )

1 लोकेन चैतन्यमिवोष्णरश्मेः ॥ 4.

2 आरण्यकोपात्तफलप्रसूतिः स्तम्बेन नीवार इवावशिष्टः ॥ 15.

3 मरुत्सखस्येव बलाहकस्य गतिर्विजघ्ने न हि ( तद्रथस्य ) ॥27.

4 पादं सुमेरोरिव वज्रभिन्नम् ॥ 30.

5 भवन्तमीड्य भवतः पितेव ॥ 34.

6 आलोकमर्कादिव जीवलोकः ॥ 35.

7 प्रवर्तितो दीप इव प्रदीपात् ॥ 37.

8 ( श्रीः साभिलापापि गुरोः ) अनुज्ञा
धीरेवकन्या पितुराचकाङ्क्ष ॥ 38.

9 चन्द्रं प्रवृद्धोर्मिरिवोर्मि माली ॥ 61.

*

10 बाल्यात्परामिव दशा मदनो ( ऽध्युवास ) ॥ 63.

11 भावावबोधकलुषा दयितेव ( रात्रौ...बभूव ) ॥ 64.

12 ( पर्युत्सुकत्वं ) अबला निशि खण्डितेव ॥ 67.

13 ताम्रोदरेषु......लीलास्मितं सदशनार्चिरिव त्वदीयम् ॥ 70.

14 मदपटु निनदद्भिर्बोधितो राजहंसैः
सुरगज इव गांगं सैकतं सुप्रतीकः ॥ 75.

THE END.